THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 366

श्रीनागेशभट्टकृतः

व्रात्यताप्रायश्चित्तनिर्णयः (महान् लघुश्च)

श्रीजयसिंहकारितः

व्रात्यताशुद्धिसङ्ग्रहश्च

साहित्याचार्य-खिस्ते-नारायणशास्त्रिणा तथा
साहित्योपाध्याय-होशिङ्ग-जगन्नाथशास्त्रिणा संशोधितः

THE

VRĀTYATĀPRĀYAS'CHITTANIRṆAYA

(*GREAT* and *SMALL*) BY

NAGES'A BHAṬṬA and

THE VRĀTYATĀS'UDDHISANGRAHA

compiled by order of

MAHARAJA JAYASINHA OF JAIPUR.

FASCICULUS I–१,

PRINTED-PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE.
Vidya Vilas Press, North of Gopal Mandir, Benares.

1927.

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—३६६

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

THE

CHOWKHAMBÂ SANSKṚIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 366

THE

VRĀTYATĀPRĀYAS'CHITTANIRṆAYA

(*GREAT* and *SMALL*)

BY

NĀGES'A BHAṬṬA

and

THE

VRĀTYATĀS'UDDHISAṄGRAHA

compiled by order of

MAHARAJA JAYASINHA OF JAIPUR.

Edited With a Prefatory Note by
Pt. Nārāyaṇa S'āstrī Khiste, Sāhityāchārya,
Assistant Librarian, Govt. Sanskrit Library,
Sarasvatī Bhavana, Benares;
And
Pt. Jagannātha S'āstrī Hoshing Sāhityopādhyāya,
Late Sādholāl Research Scholar,
Govt. Sanskrit College, Benares.

FASCICULUS I–२,

PRINTED-PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE.
Vidya Vilas Press, North of Gopal Mandir, Benares.

1927.

चौखम्बा–संस्कृत–ग्रन्थमाला

(ग्रन्थ संख्या ६६)

श्रीनागेशभट्टकृतः

व्रात्यताप्रायश्चित्तनिर्णयः

(महान् लघुश्च)

श्रीजयसिंहकारितः

व्रात्यताशुद्धिसङ्ग्रहश्च

साहित्याचार्य–खिस्ते–नारायणशास्त्रिणा

तथा

साहित्योपाध्याय–होशिङ्ग–जगन्नाथशास्त्रिणा

संशोधितः

प्रकाशकः–

जयकृष्णदास–हरिदासगुप्तः—

चौखम्बासंस्कृतसीरीज आफिस, विद्याविलास प्रेस,

गोपालमंदिर के उत्तरफाटक, बनारस सिटी ।

१९८४

श्रीः

अथेदमुपक्रम्यते व्रात्यताप्रायश्चित्तविषयं ग्रन्थत्रयं मुद्रयित्वा प्रकाशयितुम् । अत्र (१)व्रात्यताप्रायश्चित्तनिर्णयः(महान्)=श्रीनागेशभट्टकृतः (२)व्रात्यताप्रायश्चित्तनिर्णयः (लघुः)=ग्रन्थकर्तृनामनिर्देशाभावेऽपि ग्रन्थारम्भतदन्तर्गतबहुविषयसाम्यात् , नागेशभट्टस्य लघुबृहद्भेदेन द्विधा ग्रन्थनिर्माणप्रकारस्य बहुशोऽन्यत्र दर्शनात् अयमपि नागेशभट्टनिर्मित एवेति निर्विवादमेव । (३)व्रात्यताशुद्धिसङ्ग्रहः=श्रीमन्महाराजजयसिंहकारितोऽनेकैर्विद्वद्भिः कृतः । तत्र लघुर्बृहन् वा व्रात्यताप्रायश्चित्तनिर्णयः 'कलौ क्षत्रियपदव्यवहार्याणां दशविंशतिपुरुषपर्यन्तं स्मर्यमाणोपनयनाभावानां तदग्रेऽप्यस्मर्यमाणोपनयनानां संस्कारो न वेति' सन्देहं पुरस्कृत्य 'एवञ्च तादृशक्षत्रियाणामुपनयनाभावः सिद्धः' इति सिद्धान्तं व्यवस्थापयति । अग्रे च स्पष्टमेवोक्तं नागेशेन -'यावत्परीक्षितो जन्म यावन्नन्दाऽभिषेचनम् । एतद्वर्षसहस्रं तु कलौ पञ्चदशोत्तरम्' ।। इति विष्णुपुराणीयवचनानुरोधेन वस्तुतः कलौ उपनयनयोग्यक्षत्रियाभाव एव । 'एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा । कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते' ।। अत्र त्रीणि भुज्यते इत्यनेन तुर्ये कलौ पञ्चदशोत्तरसहस्ररूपात्यल्पकालं तत्सत्ता सूच्यत इति च ।

अपरोऽनेकविद्वन्निबद्धो व्रात्यताशुद्धिसङ्ग्रहस्तु विविधप्रमाणोपष्टम्भैः कलावपि क्षत्रियसत्तां तेषामुपनयनार्हत्वं च व्यवस्थापयति । किञ्च-'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' इति वचनानुरोधेन शृङ्गग्राहिकया ब्राह्मणादीनामयमयं ब्राह्मणः क्षत्रियो वेति निर्णयासम्भवेन पश्वाद्यपेक्षया मानुषकारवैलक्षण्यस्यावयवसंस्थानरूपस्य प्रत्यक्षत्वेन मानुषत्वजातेर्ज्ञातुं शक्यत्वेऽपि मानुषत्वावान्तरजातिभूतब्राह्मण्याद्यभिव्यञ्जकसंस्थानविशेषस्य चक्षुरादिमानगम्यस्याभावेन ब्राह्मण्यादिनिर्णयो भवितुं नार्हति । अतस्तत्र तत्र तेषु तेषु जनपदेषु जनसमुदायो विरोध्यविरोधी

वा ये यं समुदायं यद्यद्वर्णसमूहतया विना विगानं परम्परया वर्णयति स स तावत्तत्तद्वर्णसमुदायरूप एव। एवञ्चाऽविगीतव्यवहार एको जातिनिर्णायकः, एवमेव ये स्वस्वजात्युचितधर्माचरणरहिता अपि तत्तज्जात्युचितधर्माचरणशीलैः सह भोजनादिव्यवहारमविगीतमाचरन्ति, ये तद्व्यवहारभाजस्तेऽपि तज्जातय एव, तद्व्यवहाराभावेऽपि तद्व्याप्यधर्मव्यवहारादपि व्यापकजातेर्निर्णयो भवतीत्यादिसिद्धान्तो व्यवस्थापितः। एवमेव प्रयागादिप्रदेशेषु ब्राह्मणा इति व्यवह्रियमाणा राजपुत्रकन्योद्वाहिनो द्विकुलीना ब्राह्मणा अविगीतव्यवहाराद्ब्राह्मणा एव तत्सम्बन्धिनो राजपुत्रा अपि क्षत्रिया एव। इत्थमेव पुरोहितगोत्रेण परम्परया गर्गादिगोत्रव्यवहाराद्वणिज इत्यव्यभिचरिताविगीतव्यवहारात् अगरवालाः सर्वेऽपि तृतीयवर्णाः प्रायेणोपनयनादिसंस्कारभाजः शिष्टैः परिगृह्यमाणा भवन्ति। एते सर्वेऽपि प्रायश्चित्ते कृते तूपनयनार्हा भवेयुरिति। इत्थमनयोर्भिन्नकर्तृकयोर्ग्रन्थयोः प्रतिपाद्ये वैलक्षण्यम्। नात्र वयं स्वमतं किञ्चिदपि प्रतिपादयामः। विचक्षणानां पुरो द्वयमपीदं न्यस्तं, येभ्यो यथा रोचते तैस्तथा प्रमाणजातमवलम्ब्य तथा विधेयमिति सरलः पन्थाः।

२

जयपुरमहीमहेन्द्रेण श्रीमता राजाधिराजेन श्रीसवाईजयसिंहनरपतिना क्षत्रियपदव्यवहार्याणामुपनयनार्हतामभिलषता प्रायो भारतवर्षीयाः सर्वेऽपि पण्डिताः सम्मेलिताः। तत्र पण्डितसमाजे प्रवृत्तं मतद्वैविध्यम्। राजानुगमनप्राप्तजीविका वैभवानुभावविस्मारितस्मृतिरहस्या एके विद्वांसो व्रात्यताशुद्धिसङ्ग्रहं प्राणयन्। यत्र यथाकथञ्चित् क्षत्रियनामभृतां वैश्यनामभृतामप्युपनयनार्हत्वं निष्कण्टकमुट्टङ्कितम्। लक्ष्मीं तृणाय मन्यमाना अपरे शास्त्रमर्यादासंरक्षणप्राणाः श्रीनागेशभट्टा राजानुरोधमपि निर्धूय शास्त्रोपादिष्टमेवाध्वानमक्षुण्णं व्यवस्थापयन्तो लघुं महान्तं च व्रात्यताप्रायश्चित्तनिर्णयं प्राणयन्-इति शृणुमो वृद्धमुखेभ्यः।

३

प्रस्तुतप्रबन्धानामेकैकमेव पुस्तकं राजकीयसरस्वतीभवनपुस्तकालयस्थमशुद्धिबहुलमवलम्ब्य प्रवृत्ते मुद्रणकार्ये निसर्गजा अशुद्धीरुपेक्ष्य ग्रन्थसारमात्रमवगाहनीयं सुधीभिः। साम्प्रतिके शुद्धिप्रचारप्रचुरप्रभावे काले यस्य कस्यापि येन केनाऽपि यथा तथा वा क्रियमाणा शुद्धिर्न शास्त्रमुखप्रेक्षामपेक्षते इति साम्प्रतिकानां शुद्धिकार्यधूर्धराणां सविधेऽनपेक्षित एवायं प्रबन्धसमुच्चयः, किन्तु ये शास्त्रैकदृशो धर्मप्राणास्तैः सकौतुकमयं नाऽतिप्राचीनः पण्डितानां विवादः प्रेक्षणीयो विचारणीयश्च।

एतत्प्रबन्धत्रयमुद्रणे प्रचुरं साहाय्यमाचरतां साहित्योपाध्यायहोशिङ्ग-जगन्नाथशास्त्रिणां महान्तमुपकारभारं वहन् धन्यवादैस्तेषामुचितमर्हणमाचरामि।

येषां प्रेरणया मार्गप्रदर्शनानुग्रहेण प्रवृत्तोऽहमत्र कार्ये, तान् काशिकराजकीयपाठालयप्रधानाध्यक्षान् श्रीगोपीनाथकविराजशर्ममहोदयान् सविनयमनन्तैर्धन्यवादैः, 'चौखंबासंस्कृतसीरीज्'नामकपुस्तकमालाध्यक्ष बाबूजयकृष्णदासश्रेष्ठिवरांश्च शताधिकैराशीर्वचनैश्च सम्भाव्य विरमामीति शिवम्।

सरस्वतीभवनम्।
काशी।

विदुषां कृपाभाजनम्—
नारायणशास्त्री खिस्ते.



॥ श्रीगणेशाय नमः ॥

व्रात्यताप्रायश्चित्तनिर्णयः ।

अथ कलावब्राह्मणत्वे सति शस्त्रग्रहणप्रजापालनमात्रेण क्षत्रियसादृश्येन क्षत्रियपदव्यवहार्याणां दशविंशतिपुरुषपर्यन्तमस्मर्यमाणोपनयनानां तदग्रेऽपि तादृशानामुपनयनसंस्कारो भवति न वेति सन्देहे निर्णयः क्रियते। तत्र नैव भवतीति निर्णयः, क्षत्रियसादृश्येन तथाव्यवहारेऽपि मुख्यक्षत्रियत्वाभावात्। तथा च अर्जुनपौत्रपरीक्षिद्राज्यकाले मैत्रेयं प्रति पाराशरेणोपदिष्टे विष्णुपुराणे चतुर्थेऽशे सूर्यचन्द्रवंश्यानां तत्तत्क्षत्रियाणां वंशसमाप्तिमुक्त्वा परीक्षिद्राज्योत्तरं क्षेमकान्तान् चन्द्रवंश्यान् उक्त्वोक्तम्—

ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ॥

इति। मात्स्येऽप्येवम्—'संस्थास्यति स वै कलौ' इति। तत्र तुर्यपादः—भागवतेऽपि नवमे—

ब्रह्मक्षत्रस्य वंशोऽयं प्रोक्तो देवर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ॥

इति। अत्र वंशक्षत्रियाणां ब्राह्मणत्वप्राप्तेरुक्तत्वादस्य ब्रह्मक्षत्रयोनित्वमुक्तम्। वंश इत्युक्त्या राज्यहीनोऽपि वक्ष्यमाणबार्हद्रथवंशातिरिक्त एतद्वंशो नास्तीति सूचितम्। ततो भाविन इक्ष्वाकून् सुमित्रान्तानुक्त्वोक्तम्—

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति।
यतस्तं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ॥

इति । स इक्ष्वाकुवंशः । अन्येषां सूर्यवंश्यानां [illegible] पूर्व-मुक्तैव । नवमे भागवतेऽपि—'सुमित्रो नाम निष्ठान्तः' इत्युक्तम् । निष्ठा वंशस्थितिस्तस्या अन्त इति तदर्थः । 'इक्ष्वाकूणामयं वंशः' इति च पूर्ववदेव । तत्र 'संस्थां प्राप्स्यति वै कलौ' इति चतुर्थ-चरणपाठस्तत्र रिपुञ्जयान्ता भाविनो मागधा बार्हद्रथा उक्ताः । तत्र जरासन्धादिरिपुञ्जयान्तं सहस्रवर्षपर्यन्तं राज्यमुक्तम् । रिपुञ्जयमुक्त्वा—

बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ।

इति नवमे भागवतेऽपि । तत्र जरासन्धमारभ्याऽयुतायुःपर्यन्तं पञ्चशतं वर्षाणि परीक्षित्कालिकायुतायुतो रिपुञ्जयान्तं पञ्चशतं वर्षाणीति व्यवस्थातो नाऽग्रिमग्रन्थविरोधः । ततो रिपुञ्जयमपुत्रं हत्वा तदमात्येन स्वपुत्रस्य प्रद्योतस्य राज्यं दत्तं, तद्वंशे चाऽष्टत्रिंशदुत्तरमब्दशतं राज्यमुक्त्वा ततः शिशुनागवंशे महानन्द्यन्तं द्विषष्ट्यधिकवर्षशतत्रयं राज्यमुक्तम् । द्वादशे भागवतेऽपि—

शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयम् ।
समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥

इति । तदल्पान्तरत्वान्न विरुद्धम् । ततो महानन्दिसुतः शूद्रा-गर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवाऽपरोऽखिलक्षत्रान्तकरो भविता । ततःप्रभृति शूद्रा भूमिपाला भविष्यन्ति । स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यतीत्युक्तम् । अत्र परशुरामोपमया स्त्रीबालावधि निर्दयं हन्तृत्वं सूचितम् । महापद्म इत्यस्य तावत्सङ्ख्यधनस्तावत्सैन्य इति चाऽर्थः । परशुरामेणेव कतिपयानामहननमपि स्यादत आह—अखिलक्षत्रान्तकारीति । तेन क्षत्रियसामान्याभावः सूचितः । तदेवोक्तम्—'भूमिपालाः' इति । नन्दस्योग्रत्वेऽपि अनुलोमसङ्कराणां मातृजातीयत्वाच्छूद्रा इत्युक्तम् । तत्तद्देशीयक्षत्रियान् हत्वा तत्सन्तानभूता उग्रा-

स्तत्तद्राज्ये स्थापिता इति तात्पर्यम्। भागवते द्वादशे—

महानन्दिसुतो राजन्! शूद्रागर्भोद्भवो बली।
महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत्॥
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः।

इति नन्दादीनामुग्रत्वात् शूद्रप्राया इत्युक्तम्। एतेन राज्याधिकारिणो मागधा एवाऽनेन नाशिता न तु देशान्तरस्थाः। शूद्रराज्योक्तिरपि मगधदेशविषयैवेति निरस्तम्। सामान्यप्रवृत्तवाक्यस्य सङ्कोचे मानाभावात् वक्ष्यमाणवाक्यविरोधाच्च। मागधरिपुञ्जयकाल एव सर्वक्षत्रियवंशशाखानाशाच्च। एतच्चाऽग्रे स्फुटं भविष्यति। ततो नन्दपुत्राणाञ्च शतवर्षपर्यन्तं राज्यमुक्तम्। ततश्च कौटिल्यप्रधानत्वात् कौटिल्यः—वात्स्यायनविष्णुगुप्तादिपर्यायः—चाणक्यो नन्दपुत्रानुच्छिद्य नन्दस्य कनीयस्यां भार्यायां मुरासंज्ञायां जातं चन्द्रगुप्तं राज्येऽभिषेक्ष्यति। मौर्याणां सप्तत्रिंशदधिकं वर्षशतं राज्यम्। ततोऽन्त्यं मौर्यं तत्सेनापतिः शुङ्गजातीयः पुष्पमित्रं हत्वा राज्यं करिष्यति। तद्वंशे द्वादशाधिकं वर्षशतं राज्यम्। ततोऽन्त्यं शुङ्गं देवभूतिमपुत्रं तदमात्यः कण्वजातीयो वसुदेवनामा ब्राह्मणो हत्वा स्वयं राज्यं करिष्यति। तद्वंशे शतत्रयं पञ्चचत्वारिंशच्च वर्षाणि राज्यम्। ततस्तद्भृत्य आन्ध्रजातिः शिप्रकनामाऽन्त्यं कण्वं सुशर्माणं हत्वा स्वयं राज्यं करिष्यति। तद्वंशे षट्पञ्चाशदधिकचतुरुद्दशतं राज्यम्। ततः सप्ताऽऽभीराः, दश गर्दभिल्लाः, षोडश कङ्का इति। भागवते—अष्टौ यवनाः, चतुर्दश तुषाराः, चतुर्दश पुक्कसा इति। भागवते—त्रयोदश गुरुण्डा, एकादश मौना नवनवत्यधिकत्रयोदशवर्षशतानि राज्यं करिष्यन्ति। तेषु छिन्नेषु केलिङ्किला यवना भूपतयो भविष्यन्ति। तेषां षडधिकवर्षशतं राज्यमिति। भागवते—'मूर्धाभिषिक्तस्तेषां विन्ध्यशक्तिः'—इत्युक्तम्। मूर्धाभिषिक्तो मुख्यः। मूर्धसिक्त इति पाठे तादृशाक्ष-

त्रियवन्मुख्य इत्यर्थः। ततः पुरञ्जयादयो नव षड्वर्षाऽधिकं वर्ष-शतं राज्यं करिष्यन्ति। तत्पुत्रास्त्रयोदश वाह्लीकास्ततः पुष्प-मित्राद्यस्त्रयः, ततस्त्रयोदश मेकलाः, सत्यकौशला निषधा नव, ततो मागधो विश्वस्फूर्जिसंज्ञोऽन्यान् वर्णान् करिष्यति। कैवर्त-पटुपुलिन्दसंज्ञान् म्लेच्छप्रायान् ब्राह्मणान् राज्ये स्थापयिष्यति। 'उत्साद्याऽखिलक्षत्रजातिम्' इत्युक्तम्। क्षत्रजातिमित्यस्य क्षत्रजा-तिमुग्रादिरूपामित्यर्थः। एतेन तावत्पर्यन्तमुग्रादिजातिस्थितिः। अग्रे साऽपि नास्तीति सूचितम्। अतो नैतद्बलान्नन्दोत्तरं क्षत्रिय-सत्तासिद्धिरिति बोध्यम्। भागवतेऽपि—

मागधानान्तु भविता विश्वस्फूर्जिः पुरञ्जयः।
करिष्यत्यपरान्वर्णान् पुलिन्दपटुमद्रकान्॥
प्रजाश्चाऽब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः।
वीर्यवान् क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि॥
गङ्गाद्वारादाप्रयागं गुप्तां भोक्ष्यति मेदिनीम्।

इति। अत्र क्षत्रपदं तज्जन्यत्वादुग्रपरम्। मागधानामित्यस्य मगध-देशीयानां सङ्कीर्णराज्ञामित्यर्थः। ततोऽन्ते व्रात्यद्विजाऽऽभीरशूद्राद्याः समकालं पृथ्वीं भोक्ष्यन्ति। ततोऽनुदिनमल्पह्रासाद्धर्मस्य व्यवच्छे-दादर्थस्य च सङ्क्षयो भविष्यति। ततश्च धनमेवाऽभिजनहेतुः, रुचिरेव दाम्पत्ये हेतुः, आढ्यतैव साधुत्वे हेतुः इत्येवमनेकदो-षोत्तरे भूमण्डले सर्ववर्णेषु यो बलवान् स भूपतिर्भविष्यतीत्युक्तं 'सर्ववर्णेषु' इति। अस्याऽवशिष्टेषु ब्राह्मणवैश्यशूद्रेष्वित्यर्थः। तेऽपि कलावतिव्रात्यतया शूद्रत्वेनैव पूर्वं गणिता इति न विरोधः। 'अक्ष-त्रियाश्च राजानः' इति वक्ष्यमाणहरिवंशात्। एतेनैतद्बलात् क्षत्रियस-त्तासाधनमपास्तम्। यदि तु—

कलौ न क्षत्रियाः सन्ति कलौ नो वैश्यजातयः।
ब्राह्मणाश्चैव शूद्राश्च कलौ वर्णद्वयं स्मृतम्॥

इत्युक्तेः—

नाधीयन्ते तदाम्नयः न यजन्ते द्विजातयः।
उत्सीदन्ति तदा चैव वैश्यैस्सार्द्धन्तु क्षत्रियाः॥

इति मात्स्योक्तेश्च वैश्यस्याऽप्यभावस्तदा सर्वपदं बहुपदञ्च व्यक्तिविषयं बोध्यम्।

ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः।

इति भागवते। तत्तद्वृत्त्या ब्राह्मणेष्वेव विट्क्षत्रव्यवहारो द्रष्टव्यः। एवमेव 'शूद्रप्रायेषु वर्णेषु' इत्यपि व्याख्येयम्। येऽपि तत्तद्वृत्त्या तत्तद्वर्णत्वेन व्यवह्रियमाणास्तेऽप्याचारतः शूद्रतुल्या एवेत्यर्थः। तथा त्रेतायां ब्राह्मणोत्तराः प्रजा, द्वापरे ब्रह्मक्षत्रोत्तरा इत्युक्त्वा कलौ शूद्रदाशोत्तरा इत्युक्तं द्वादशे भागवते। एवं क्रमेण कलियुगे क्षयमायाति सर्वधर्मेषु विप्लवङ्गतेषु भगवतो वासुदेवस्यांऽशः शम्भलग्रामप्रधानविष्णुयशसो गृहे कल्किरूपोऽवतीर्य सकलदस्युम्लेच्छदुष्टाचरणचेतसामशेषाणां क्षयं करिष्यति स्वधर्मेषु चाऽखिलं जगत् स्थापयिष्यति। अनन्तरं प्राचेतसाऽर्धकलेरवसाने प्रबुद्धानां तेषां जनपदानाममलस्फटिकविशुद्धा मतयो भविष्यन्ति। प्रबुद्धानामित्यनेन सत्त्वगुणोद्रेको दर्शितः। तेषाञ्च बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यति, तेन कालेन कृतानामाहितशक्तीनामित्यर्थः। तानि च तदपत्यानि कृतयुगधर्मानुसारीणि भविष्यन्तीत्युक्तम्। भागवते—

दिव्याब्दानां सहस्रान्ते चतुर्थे तु पुनः कृते।
भविष्यति यदा नृणां मन आत्मप्रकाशकम्॥

इति। चतुर्थे तु कलावतीते सति यदा नृणां मन आत्मप्रकाशकं भविष्यति तदा कृतं भविष्यतीति तदर्थः।

यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ।
एकराशौ समेष्यन्ति भविष्यति ततः कृतम् ॥

प्रतिद्वादशाब्दं कर्कस्थे गुरावेषां त्रयाणां पुष्येण योगाद्वावृत्तिप्रसङ्गादेकराशाविति । अनागतः क्षत्रियवंशः कियत्कालं स्थास्यतीत्यपेक्षायां दार्ढ्यायोक्तमेवाह—

यावत्परीक्षितो राज्यं यावन्नन्दाभिषेचनम् ।
एतद्वर्षसहस्रन्तु कलौ पञ्चदशोत्तरम् ॥

तावत्पर्यन्तमेव शुद्धक्षत्रियवंशः स्थास्यति । अनन्तरं नन्देन सर्वक्षत्रियनाशादित्यर्थ इति रत्नगर्भः । 'परीक्षितो जन्म' इति पाठे पञ्चदशोत्तरस्य पञ्चावृत्ता दशेत्यर्थः । उग्रादिरूपक्षत्रवंशस्याऽग्रेऽप्यवस्थानाच्छुद्ध इत्युक्तम् ।

अथ कलिकाललक्षणमाह—

सप्तर्षीणाञ्च यौ पूर्वौ दृश्येते उदितौ दिवि ।
तयोस्तु मध्यनक्षत्रं दृश्यते यत्समं निशि ॥
तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ।

प्रागग्रशकटाकारतारासप्तकसप्तर्षिमण्डलस्य पूर्वभागे ईषाकारेऽग्रमध्यमूलेषु क्रमेण मरीचिसभार्यवसिष्ठाऽऽङ्गिरसः, पश्चाद्भागे खट्वाकारे ताराचतुष्के ईशानादिविदिक्षु चतसृषु क्रमेणाऽत्रिपुलस्त्यपुलहक्रतवः, तेषां यौ पूर्वावाद्युदितौ पुलहक्रतू दृश्येते दिवि तयोर्मध्ये च समं दक्षिणोत्तरे रेखायां समदेशावस्थितं यदश्विन्यादिष्वन्यतमऋक्षं दृश्यते निशि तेन तथैव युक्ताः सप्तर्षयो नृणामब्दशतं तिष्ठन्ति ।

ोरंशो यातो दिवं द्विजः ।
तस्तदैव कलिरागतः ॥
यावत्स पादपद्माभ्यां पस्पर्शेमां वसुन्धराम् ।
तावत्पृथ्वीपरिष्वङ्गे समर्थो नाऽभवत् कलिः ॥

गते सनातनस्यांऽशे विष्णोस्तत्र भुवो दिवम् ।
तत्याज तनुराज्ये यो धर्मपुत्रो युधिष्ठिरः ॥
विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ।
याते कृष्णे चकाराऽथ सोऽभिषेकं परीक्षितः ॥
प्रयास्यन्ति यदा चैव पूर्वाषाढां महर्षयः ।
तदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥

अथ कलिप्रवृत्तिमाह—

ते तु पारीक्षिते काले मघास्वासन् द्विजोत्तमाः ।
तदा प्रवृत्तश्च कलिर्द्वादशाब्दशताधिकः ॥

इति दैवमानेन सन्ध्यासन्ध्यांशाभ्यां सह स द्वादशाब्दशतात्मकः कलिः पूर्वसन्ध्यारूपेण प्रवृत्तोऽपि सन्ध्यारूपमतिक्रम्य स्वेन रूपेण प्रवृत्तः प्रकर्षेण वृत्त इत्यर्थ इति रत्नगर्भादयः । भागवताटिप्पणे श्रीधरोऽप्येवमेतद्व्याख्याति—

यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि ।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे ॥
त्रीणि लक्षाणि वर्षाणां द्विजमानुषसंख्यया ।
षष्टिं चैव सहस्राणि भविष्यत्येष वै कलिः ॥

इति स्वपुराणकथनकालादेतावान् भविष्यति मुख्यः कलिरित्यर्थः । सन्ध्यांशश्चोत्तरसन्ध्यारूपस्तदुत्तरभावीति बोध्यम् । किञ्च—

तदा नन्दात्प्रभृत्येष कलिर्वृद्धिङ्गमिष्यति ।

इत्युक्तम् । नन्दात्प्रभृति भूलोके क्षत्रियाणामभावान्न्यायदण्डाभावेन कलेर्वृद्धिरिति भावः । अत एव 'नन्दान्तं क्षत्रियकुलम्' इति सकलजनप्रसिद्धिः । अत्र नाशकवाच्यन्तशब्देन बहुव्रीहिः । मोक्षधर्मेषु नारायणीये—

द्वापरस्य कलेश्चैव सन्धौ पार्यवसानिके ।
प्रादुर्भावः कंसहेतोर्मथुरायां भविष्यति ॥

इत्युक्तं भगवता। पार्यवसानिके समाप्तिकल्पे इत्यर्थः। एवञ्च

द्वापरान्ते हरेर्जन्म यदुवंशे भविष्यति।

इति ब्राह्मवाक्ये द्वापरधर्माणां केषाञ्चिदनुवृत्तेः कलिसन्ध्यापि तत्त्वेन गृहीतेति बोध्यम्। तत्रैव मुचुकुन्दप्रस्तावे—

ततः कलियुगं ज्ञात्वा प्राप्तप्रायं ततो नृपः।
नरनारायणस्थानं प्रययौ गन्धमादनम्॥

इत्युक्तेः—

यस्मिन् दिने हरिर्यातो दिवं सन्त्यज्य मेदिनीम्।
तस्मिन्दिनेऽवतीर्णोऽयं कालकायः कलिः किल॥

इत्युक्तेश्च। भागवते एकादशे—

मया निष्पादितं ह्यत्र देवकार्यमशेषतः।
यदर्थमवतीर्णोऽहमंशेन ब्रह्मणाऽर्थितः॥
न वस्तव्यं त्वया चेह मया त्यक्ते महीतले।

हरिवंशे मुचुकुन्दजागरे तत्प्रश्ने कृष्णवाक्यम्—

त्रेतायुगे प्रसुप्तोऽसि विदितो मेऽसि जागरात्।
इदं कलियुगं विद्धि किमन्यत्करवाणि ते॥
महीतले जनोऽधर्मरुचिः सद्यो भविष्यति।
कलौ युगे—

इत्युद्धवं प्रति भगवदुक्तेश्च। एतेनेदानीं कलेः सन्ध्येवास्तीति मन्दोक्तिः परास्ता। गदापर्वणि भारते—अधर्मेण दुर्योधनवधं दृष्ट्वा क्रुद्धं बलदेवं प्रति 'प्राप्तं कलियुगं विद्धि' इति कृष्णवचनाच्च।

आसन्नं विप्रकृष्टं वा यतः कालं न विद्महे।
तस्माद्द्वापरसंविद्धं युगान्तं स्पृहयाम्यहम्॥
प्राप्ता वयन्तु तत्कालमनया धर्मतृष्णया।
आद्यां परमं धर्मसुखमल्पेन कर्मणा॥

इति हरिवंशे जनमेजयोक्तेश्च। कालं मोक्षस्य द्वापरेण समधर्माणं

संविद्धमधर्माधिक्याद् दूषितं, युगान्तं कलिम् , अतोऽस्माभिः कलौ जन्म प्रार्थितमित्यर्थः। अल्पेन कर्मणा अनायाससाध्येन भगवन्नामसंकीर्तनेन।

महापद्माख्यनन्देन क्षत्रियाणां नाशेऽपि पुनः प्रवृत्तिमाह—

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुसम्भवः।
महायोगबलोपेतौ कलापग्रामसंश्रयौ॥
कृते युग इहागत्य क्षत्रप्रवर्तकौ हि तौ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ॥

एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते॥
कलौ तु बीजभूतास्ते केचित्तिष्ठन्ति भूतले।
यथैव देवापिमरू साम्प्रतं समवस्थितौ॥

प्रघट्टकान्तरेऽपि—ततो मरुः पुत्रोऽभूत्, योऽसौ योगमास्थायाऽद्यापि कलापग्राममाश्रितस्तिष्ठति। आगामियुगे सूर्यवंशक्षत्रप्रवर्तयिता भविष्यतीति क्षत्रस्य क्षत्रियवंशस्य प्रवर्तकौ भविष्यतः। यतो मनोर्वंशे सोमसूर्यवंशरूपे बीजभूतौ व्यवस्थितावित्यर्थः। कलेः सन्ध्यायामेव क्षत्रियसत्त्वात् त्रीणि युगानि भुज्यते इत्युक्तमिति रत्नगर्भः।

तत्र सन्ध्याशब्देन कलिप्रारम्भ उच्यते—यथा सूर्योदयोत्तरमपि सूर्यास्तात्पूर्वमपि किञ्चित्कालं सन्ध्याव्यवहारस्तद्वत्कलिप्रवेशानन्तरमपि सहस्रवर्षपर्यन्तं सन्ध्याव्यवहार इति तदाशयः। वैश्यानामप्यभावे तु एतावेव तेषां प्रवर्तकौ बोध्यौ शुद्धवैश्याया अपि क्षत्रियावत्ताभ्यां सहवासात्। अत्रत्यक्षत्रपदञ्च ब्राह्मणावरजाद्विजोपलक्षणम्। भागवतेऽपि—

देवापिर्योगमास्थाय कलापग्राममाश्रितः।
सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति॥

[illegible]

[illegible] कलापग्रामे [illegible] महायोगबलान्वितौ ॥

ताविहैत्य कलेरन्ते [illegible] क्षितौ ।
वर्णाश्रमयुतं धर्मं पूर्ववत् प्रथयिष्यतः ॥

इति । कलापग्रामे योगिनामावासत्वेन प्रसिद्ध इति श्रीधरः । एवञ्च—

अनन्ताऽर्कग्रहा भूमिर्भवेदपि कदाचन ।
अपौरवा न तु मही भविष्यति कदाचन ॥

इति ययात्युक्तश्लोकस्य भविष्ये हरिवंशे सत्त्वेनेदानीं क्षत्रियसत्ता-ऽसाधनं परास्तं देवापेः सत्त्वेन तदनुपपत्त्यभावात् । कलौ देवापिमरुवदन्यत्राऽपि कलौ बीजभूतानां स्थितिमाह—

कलौ तु बीजभूतास्ते केचित्तिष्ठन्ति भूतले ।
यथैव देवापिमरू साम्प्रतं समवस्थितौ ॥

इति रत्नमोदय । ये तु यथैव देवापिमरू समवस्थितौ, तथा साम्प्रतं कलौ बीजभूता अन्येऽपि केचित्तिष्ठन्ति—इतीमं श्लोकं व्याख्याय एतद्बलेन सम्प्रति क्षत्रियसत्तां वदन्ति, ते एतेन परास्ता व्याख्यानग्रन्थविरोधात् । किञ्चैवं सति ब्राह्मणादीनामिव तेषामपि सत्त्वगुणोद्रेकेन तत्रत्यानां कृतयुगानुसारिमतित्वोपपत्तौ देवापिमर्वोरिहागत्य क्षत्रप्रवर्तकत्वोक्तेर्वैयर्थ्यात् ब्राह्मणानामिव तेषाञ्चेति दिक् । मात्स्येऽपि—

यैषु संस्थास्यते क्षत्रमुत्पत्स्यन्ते नृपाश्च ये ।

तान् वद—

इति ऋषीणां प्रश्ने—

येषु संस्थास्यते तत्र ऐलेक्ष्वाकुकुलं शुभम् ।
तान् सर्वान् कीर्तयिष्यामि भविष्ये कथितान् नृप ॥
तेभ्योऽपरे तु ये त्वन्ये उत्पत्स्यन्ते नृपाः पुनः ।
उग्राः पारशवाः शूद्रास्तथाऽन्ये ये बहिश्चराः ॥
आन्ध्राः शकाः पुलिन्दाश्च कलिङ्गा यवनास्तथा ।
कैवर्ताभीरशबरा ये चाऽन्ये म्लेच्छसम्भवाः ॥
पर्यायतः प्रवक्ष्यामि नामतश्चैव तान्नृपान् ।

इत्युपक्रमे क्षेमकान्तमैलं वंशमुक्त्वा—

ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥

इत्युक्तम् । तत्र पारशवा विक्रमादयः । ततोऽन्ते—

पूरोर्वंशस्त्वया सूत ! भविष्यति निवेदितः ।
सूर्यवंशे तथा ये तु भविष्यास्तान् वदस्व नः ॥
तथैव यादवे वंशे राजानः कीर्तिवर्द्धनाः ।
वसन्ति जातयो याश्च राज्यं प्राप्स्यन्ति सुव्रत ॥

इति ऋषीणां प्रश्ने ततः सुमित्रान्तं सूर्यवंशमुक्त्वा—

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यन्ति ।
सुमित्रं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥

इत्युक्त्वा—

प्रतिबाहुरभूद्वज्रात्सुबाहुस्तस्य चाऽऽत्मजः ।
सुबाहोः शान्तसेनस्तु शतसेनस्तु तत्सुतः ॥
शतसेनाद् यदोर्वंशः संस्थां प्राप्स्यति वै कलौ ।

इत्युक्त्वा इतरसर्वक्षत्रियवंशशाखासमाप्त्याशयेन—

अत ऊर्ध्वं प्रवक्ष्यामि मागधा ये बृहद्रथाः ।

इत्यादिना रिपुञ्जयान्तास्ते उक्ताः । श्रीधरस्वाम्यपि द्वादशे सर्वसो-मवंशशाखापेक्षया मागधवंश एवैकश्चिरस्थायीत्याह । ततो महानन्द्यन्तं क्षत्रबन्धून् शैशुनागानुक्त्वा तत्समकालं चतुर्विंशत्यै-क्ष्वाकान् सप्तविंशतिपाञ्चालान् चतुर्विंशतिकाशेयान् अष्टाविंशतिहै-हयान् द्वात्रिंशत्कलिङ्गान् पञ्चविंशत्यश्मकान् षट्त्रिंशत्कुरून् अष्टाविंशतिमैथिलान् त्रयोविंशतिशूरसेनान् विंशतिवीतिहोत्रान् क्षत्रबन्धूनेव नृपानुक्त्वा—

महानन्दिसुतश्चाऽपि शूद्रायां कलिवर्द्धनः ।
उत्पत्स्यते महापद्मः सर्वक्षत्रान्तको नृपः ॥
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
सर्वक्षत्रमथोत्साद्य भाविनाऽर्थेन चोदितः ॥
एकराट् स महापद्म एकच्छत्रो भविष्यति ।

तत्सन्ततौ राज्यं वर्षशतं, ततो मौर्याणां सप्तत्रिंशदधिकं शतं, ततः शुङ्गानां द्वादशाधिकं वर्षशतं, ततः काण्वायनानां पञ्चचत्वा-रिंशदधिकत्रिशतवर्षाणि राज्यं, तत आन्ध्राणां षष्ट्युत्तरं चतुःशतं, ततः सप्ताभीराः, सप्त गर्दभिल्लाः, अष्टादश शका यवनास्तुषाराश्च-तुर्दश, त्रयोदश मुण्डाः, ततः कैलिङ्किला यवना इत्याद्युक्तम् ।

राजानः शूद्रभूयिष्ठाः पाखण्डानां प्रवृत्तये ।

इति चाऽन्यत्रोक्तम् । क्वचिद्ब्राह्मणानां राज्यदर्शनाद् भूयिष्ठा इत्युक्तम् ।

महापद्माभिषेकात्तु यावज्जन्म परीक्षितः ।
एकवर्षसहस्रन्तु ज्ञेयं पञ्चाशदुत्तरम् ॥

परीक्षिद्राज्याच्च पञ्चदशोत्तरं सहस्रं, पञ्चत्रिंशेऽतीतेर्हि तस्य विदाम् ।

यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि ।
प्रतिपन्नं कलियुगं प्रमाणं तस्य मे शृणु ॥

त्रीणिशतसहस्रन्तु वर्षाणां तत्स्मृतं बुधैः ।
षष्टिवर्षसहस्राणि सङ्ख्यातं मानुषेण तु ॥
दिव्यं वर्षसहस्रन्तु तदा सन्ध्या प्रवर्तते ।
निःशेषे तु तदा तस्मिन् कृतं वै प्रतिपत्स्यते ॥
देवापिः पौरवो राजा ऐक्ष्वाकुश्चाऽत्र वै मरुः ।
महायोगबलोपेतौ कलापग्राममाश्रितौ ॥
एतौ क्षत्रप्रणेतारौ नवविंशे चतुर्युगे ।
सुवर्चा मरुपुत्रस्तु ऐक्ष्वाकाद्यो भविष्यति ॥
नवविंशे युगेऽसौ वै वंशस्यादिर्भविष्यति
देवापिपुत्रः सत्यस्तु ऐडानां भविता नृपः ॥
क्षत्रप्रवर्तकावेतौ भविष्यौ च चतुर्युगे ।

अत्र पुत्र इत्युपलक्षणम् । एकैका कन्याऽपि तयोर्बोध्या । भागवते नवमे जरासन्धपुत्रवंशे रिपुञ्जयान्तान् भाविनो राज्ञ उक्त्वा द्वादशे—

स्वधामाऽनुगते कृष्णे यदुवंशविभूषणे ।
कस्य वंशो भवेत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥

इति राज्ञः प्रश्नः । स्ववंशस्य क्षेमके संस्थाया नवमे उक्तत्वात्-अयं प्रश्नः । तत्र सोमवंशशाखापेक्षया चिरस्थायी मागधवंश एवेत्याशयेन शुकस्योत्तरम्—

योऽन्त्यः पुरञ्जयो नाम भविष्यो बार्हद्रथः ।
तस्याऽमात्यस्तु शुनकः—

इत्यादिना रिपुञ्जय एव पुरञ्जयः । तेन च पञ्चशतवर्षोत्तरमेव कलौ सङ्करादिदुष्टाः क्षत्रिया इत्युक्तं स्पष्टमेव । यत्तु वनपर्वणि भारते कलिधर्ममुपक्रम्य—

परस्परवधोद्युक्ता मूर्खाः पण्डितमानिनः ।
भविष्यन्ति युगस्यान्ते क्षत्रिया लोककण्टकाः ॥

क्षत्रियाश्चाऽपि वैश्याश्च विकर्मस्था नराधिप ।
अल्पायुषः स्वल्पबलाः स्वल्पवीर्यपराक्रमाः ॥
ब्राह्मणाः क्षत्रियाः वैश्याः सङ्कीर्यन्तः परस्परम् ।
शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः ॥

इत्युक्तम् । तत्र रिपुञ्जयहननोत्तरं तदमात्यादिषु महानन्द्यन्तं पञ्चशतं वर्षाणि क्षत्रियाणां राज्यसत्त्वात्तेषाञ्च विकर्मस्थतायाः स्पष्टत्वात्तेषां मात्स्ये क्षत्रबन्धुत्वेन विशेषणाच्च न तद्विरोधः । तत्रैव—

अन्त्या मध्या भविष्यन्ति मध्याश्चाऽन्त्या न संशयः ।
ब्राह्मणाः क्षत्रिया वैश्या न शिष्यन्ति जनाधिप ॥
एकवर्णस्तदा लोको भविष्यति युगक्षये ।

इत्युक्तेः । युगक्षये कलावन्त्याः शूद्राः मध्याः क्षत्रियाः वैश्याः शूद्रास्तत्सदृशाः स्वधर्मं सर्वथा त्यक्त्वा तिष्ठन्तीत्यर्थः । तत्र क्षत्रियवैश्यनाशो मात्स्यवैष्णवयोः स्पष्टमेवोक्तः सर्वथोच्छेदरूपः । ब्राह्मणनाशस्तु स्वधर्महान्येति बोध्यम् । विप्राणामपि शूद्राचारत्वादेकवर्ण इत्युक्तम् । यथा सत्ययुगे सर्वेषां धर्मनिष्ठत्वादेकवर्णत्वं मात्स्यादिषूक्तम् । किञ्च—

द्वापरे व्याकुलो धर्मः प्रणश्यति कलौ पुनः ।
वर्णानां द्वापरे ध्वंसः सङ्कीर्यन्ते तथाश्रमाः ॥
नैका श्रुतिः स्मृतिश्चैव निश्चयो नाऽधिगम्यते ।
द्वापरे सन्निवृत्तास्तु वेदा नश्यन्ति वै कलौ ॥
ब्राह्मणैः कल्पसूत्रैश्च भाष्यैर्वेदैस्तथैव च ।
व्याकुलो द्वापरेऽप्यर्थः क्रियते भिन्नदर्शनैः ॥
पूर्वस्वभावास्सन्ध्यासु अवतिष्ठन्ति पादतः ।

इति मात्स्येन द्वापरेऽपि केषाञ्चिदेव स्वधर्मेऽवस्थितिबोधनेन सम्प्रति कलौ स्वधर्मेऽवस्थितिं लोकानां वदन्तो भ्रान्ता एवेत्यलम् ।

नारदीयेऽपि—

भविष्यन्ति कलौ प्राप्ते राजानो ह्यन्तजातयः।

इत्युक्तम्।

ननु क्षत्रियशूद्राभ्यामुत्पन्नस्योग्रस्य पितृत उपनयनादिप्राप्तिः कुतो न—

यस्माद्बीजप्रभावेन तिर्यग्जा ऋषयोऽभवन्।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते॥

इति मनूक्तेरिति चेन्न, मनुनैव तेषां तदनधिकारबोधनात्। तथा हि—

सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते॥

तुल्यासु सवर्णासु। पत्नीष्विति विवाहितास्वित्यर्थकं, यज्ञसंयोगे एव तथाप्रयोगात्। अक्षतयोनिषु अन्याभुक्तासु।

द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते।
अवराट इति ख्यातः शूद्रधर्मा स जातितः॥
व्रतहीना न संस्कार्याः स्वतन्त्रास्वपि ये सुताः।
उत्पादिताः सवर्णेन व्रात्या इव बहिष्कृताः॥

इति देवलोक्तेश्च। आनुलोम्येनेत्युत्तरास्वपि।

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान्।
सदृशानेव तानाहुर्मातृदोषविगर्हितान्॥

अनन्तरजातासु विवाहितक्षत्रियादिषु तान् मातुर्हीनजातीयत्वदोषेण गर्हितान् पितृसदृशान् न तु तज्जातीयानाहुरित्यर्थः। एवञ्च ते मातृजातेरुत्कृष्टाः पितृजातेर्हीनाः। एषां मूर्द्धावसिक्तमाहिष्यकरणेत्याख्या याज्ञवल्क्येनोक्ताः।

द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम्।

इमं वक्ष्यमाणमित्यर्थः।

ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते।

ऊढायामिति शेषः ।

निषादः शूद्रकन्यायां यः पारशव उच्यते ।
क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् ॥
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ।

जन्तुरित्यनेन निषादादप्यस्य नीचता सूचिता ।

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः ॥

सवर्णापुत्रेभ्यो हीनाः । यद्यपि पूर्वपूर्वस्मादुत्तरोत्तरे हीनाश्चेत्यर्थः ।

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
ताननन्तरजातांस्तु मातृदोषात् प्रचक्षते ॥

अनन्तरेत्युपलक्षणम् । अनन्तरैकान्तरद्व्यन्तरजातिस्त्रीष्वानुलोम्येनोत्पन्नाः पूर्वमुक्तास्तान् मातुर्हीनजातित्वदोषात् अनन्तरनाम्नो मातृजातीयान् प्रचक्षते, तेन मातृजातिसंस्कारस्तेषामित्यर्थः । एवञ्चोग्राणामुपनयनाभावः स्पष्ट एवोक्तो मनुना । 'बीजं प्रशस्यते' इति तु योनेर्धर्माद्यनधिकारे बीजं प्रधानमिति सारम् । अप्सरसः शापेन गृहीतदेहान्तरा अपि धर्माद्यनधिकारिण एवेति बोध्यम् ।

[पूर्वं हि] बीजं प्रधानमित्येके [प्रशंसन्ति] क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवाऽन्ये तत्रेयं तु व्यवस्थितिः ॥

तत्रोभयप्रशंसावर्णविषये उभयप्राशस्त्य एव ब्राह्मणत्वाद्यङ्गीकारात् । क्षेत्रप्रशंसा मूर्धावसिक्तादिविषये, बीजप्रशंसा प्रतिलोमविषये । ते हि बीजदोषवशादधमा एवेत्युक्त्वा तद्विषयेऽपि बीजप्राधान्यं वक्तं तेनेदमुक्तम् । तथा च मनुरेव—

जातो नार्यामनार्यायामार्यादार्यो भवेद् गुणैः ।
जातोऽप्यनार्येणाऽऽर्यायामनार्य इति निश्चयः ॥
तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः ।
सुबीजश्चैव सुक्षेत्रे जातं सम्पद्यते यथा ॥

तथार्याज्जात आर्यायां सर्वसंस्कारमर्हति ।

इति । अनार्या नारी शूद्रा । आर्यः शूद्रात्किञ्चिच्छ्रेष्ठ इत्यर्थः । पाकयज्ञाद्यनुष्ठानादिति भावः । अनार्यात् शूद्रात्, आर्या त्रैवर्णिकी, अनार्यः सर्वधर्महीनः । तथाऽनुलोमान्तरं तेनोक्तम्—

ब्राह्मणादुग्रकन्यायामावृतो नाम जायते ।
आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः ॥

इति ।

अथ प्रतिलोमानाह—

आयोगवश्च क्षत्ता च चण्डालश्चाऽधमो नृणाम् ।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥

क्रमेण वैश्याक्षत्रियाविप्रासु वैश्यान्मागधवैदेहौ क्षत्रियाविप्रयोरिति शेषः । 'क्षत्रियात् सूत एव तु'–विप्रायामिति शेषः ।

प्रतीपमेते जायन्ते परेणाऽपसदास्त्रयः ।

अपसदाः पुत्रकार्यादपगताः । लोमहर्षणोऽपि प्रतिलोमज एव । तथा हि—

लोमानि हर्षयाञ्चक्रे श्रोतॄणां यः स्वभाषितैः ।
कर्मणा प्रार्थितस्तेन लोमहर्षणसंज्ञया ॥

इति । कौर्मे—

वैन्यस्य तु पृथोर्यज्ञे वर्तमाने महात्मनः ।
सुत्यायामभवत्सूतः प्रथमं वर्णवैकृतम् ॥
ऐन्द्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः ।
जुहावेन्द्राय देवेन ततः सूतो व्यजायत ॥
शिष्यहव्येन संपृक्तमभिभूतं गुरोर्हविः ।
अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतम् ॥

इति वायुपुराणे । वर्णवैकृतं 'ब्राह्मण्यां क्षत्रियात्सूतः' इति याज्ञवल्क्याद्युक्तं विलोमजत्वम् । अयं रोमहर्षण एव ।

अग्निकुण्डसमुद्भूत सूत निर्मलमानस।

इति रोमहर्षणं प्रति शौनकवाक्यस्य पुराणान्तरे दर्शनात्। अस्य च तपोबलात् व्याससङ्कल्पात्पुराणाऽधिकारः। तत एव शौनकादिसङ्कल्पाद् ब्रह्मासनार्हत्वम्।

अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनन्दन।

इति बलभद्रं प्रति शौनकोक्तेः। 'रोमहर्षणमासीनम्' इत्युपक्रम्य-

कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः।
धर्मपालांस्तथैवाऽस्मान्वधमर्हति दुर्मतिः॥

इति तत्रैव बलभद्रोक्तेः। अयं न ब्राह्मणः, अत एव तद्वधस्त्वजानतेवाचरितस्त्वया ब्रह्मवधो यथेत्यनेन ब्रह्मवधसादृश्यमुक्त्वा—

ततश्च भारते वर्षे परीत्य सुसमाहितः।
चरित्वा द्वादशान्मासांस्तीर्थस्नायी विशुध्यति॥

इति अल्पमात्रकृच्छ्रप्रायश्चित्तमुक्तम्। सूतानां मन्त्रित्वाऽश्वसारथ्यादाविव पुराणाध्ययनतच्छ्रावणयोरप्यधिकारः। परन्त्वन्त्ययोर्ब्राह्मणसङ्कल्पादेव। यथा व्याससङ्कल्पादध्ययनं शौनकसङ्कल्पाच्छ्रावणं तदीयाऽतितपोवशाच्च तयोस्तथा सङ्कल्पेन न हीनता। 'परमभयाद्दीत' इति निषेधस्य नाऽत्रावकाशः, तेन सूतमात्रस्य नाऽत्राधिकारः। मन्त्रित्वादि तु सञ्जयाऽधिरथादेः प्रसिद्धमेव। 'ब्रह्मासनं दत्तम्' इति ऋष्युक्तेश्च ब्राह्मणानामेव श्रावणेऽधिकारो नाऽन्येषामिति सिद्धम्। अत एव जनमेजयस्य पुराणश्रावयितृत्वं वैशम्पायनस्य स्मर्यते। तत्पुत्रस्योग्रश्रवसोऽपि तत्सङ्कल्पादेव पुराणाध्ययनश्रावणादावधिकार इति सिद्धम्। एतेन लोमहर्षणो ब्राह्मण एव। सूतशब्दस्तु कथाप्रवक्तृत्वसामान्यात् प्रोत्साहनाय प्राचीनराज्ञां शौर्यादिकथाकथनस्याऽपि तद्वृत्तित्वादित्यपास्तम्।

जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः।
शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः॥

क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेन उच्यते ॥
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान्सावित्रीपरिभ्रष्टान् व्रात्यानिति विनिर्दिशेत् ॥

अव्रतान् अनुपनीतान्। कालेऽनुपनीतानित्यर्थ इत्यन्ये। 'अत ऊर्ध्वं त्रयोऽप्येते' इत्युक्तस्याऽपि व्रात्यलक्षणस्य पुनः प्रतिलोमप्रकरणे कथनं प्रतिलोमपुत्रतुल्यत्वेन तद्वदेव पुत्रकार्याक्षमत्वप्रतिपादनार्थमिति तद्व्याख्यातारः । एषामत्र कथने बीजं मनुनाऽप्युक्तम्-

व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्मणाञ्च त्यागेन जायते वर्णसङ्करः ॥

इति । व्यभिचारोऽन्योन्यस्त्रीगमनमविवाह्यसगोत्रादिविवाहोऽवेद्यावेदनं स्वकर्मणामुपनयनादीनां त्यागः । एवञ्च व्रात्योत्पन्नत्वमेव व्रात्योत्पन्नस्य सङ्करत्वबीजं न व्यभिचार इति बोध्यमिति तद्व्याख्यातारः ।

व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पशेखर एव च ॥

अत्र सवर्णास्वित्यनुवर्त्तते । 'पापात्मा' इत्यनेन निन्द्यतोक्ता । चत्वार्येकस्यैव नामानीति केचित् । अन्ये तु भूर्जकण्टकाद्ब्राह्मण्यामावन्त्यस्तस्मात्तस्यां वाटधानस्तस्मात्तस्यां पुष्पशेखर इत्यर्थः । एवमग्रेऽपीति व्याचक्षते—

झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खसो द्रुमिड एव च ॥
वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च ।
कारूषश्च विजन्मा च मैत्रः सात्वत एव च ॥

इत्यादिना प्रतिलोमानुक्त्वा मनुराह—

सजातिजानन्तरजाः षट् सुता द्विजधर्मिणः ।
शूद्राणान्तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ॥

इति। त्रिभिर्वर्णैः समानजातीयासु जातास्त्रयः, अनन्तरजास्त्रयः, ब्राह्मणेनाऽव्रात्येन क्षत्रियावैश्ययोः, क्षत्रियेणाऽव्रात्येन वैश्यायामेवं षट् पुत्रा द्विजधर्मिण उपनेयास्तद्भिन्नाः सर्वे उक्ता अनुलोमाः प्रतिलोमाश्चाऽपध्वंसजास्ते सर्वे शूद्रधर्माणो नैषामुपनयनमस्तीत्यर्थ इति मेधातिथिकुल्लूकभट्टौ। अपध्वंसजाः शूद्रा, विवाहन्यायोपेतत्वाच्छूद्राविवाहमुपक्रम्य–

नैतन्मम मतं यस्मात्तत्राऽऽत्मा जायते स्वयम्।

इति याज्ञवल्क्योक्तेः। अपध्वंसो व्यभिचारः स आनुलोम्येन प्रातिलोम्येन च सवर्णायामन्यपुरुषोत्पन्नस्य प्राग्लिखितदेवल–वचनेन शूद्रसधर्मत्वोक्तेः। ब्राह्मणाद्ब्राह्मण्यां जातकुण्डादेरुपनयनमात्रं केचिदिच्छन्ति। तथा मूर्द्धावसिक्तादीननुलोमप्रतिलोमान् प्रक्रम्य ब्रह्मपुराणे उक्तं–'एते मातृसधर्माणः' इति। वसिष्ठोऽपि तानेव प्रक्रम्य 'सर्वे बाह्याः सद्धर्मबहिष्कृता अन्यत्र प्राणिसंरक्षणादिति शिक्षा' इत्याह। अत्र सद्धर्मोऽनुलोमेषु पितृधर्मः, प्रतिलोमेषु मातृ-

कश्च वसिष्ठेन–'क्षत्रियवैश्याऽनुलोमानन्तरजातो

स्येज्याध्ययनाधानोपनयनसंस्काराश्चाऽप्रतिषिद्धाः रथसूत्रवास्तुविद्याध्ययनवृत्तिता च' इति राजसदृशजस्य रथकारस्यैवोपनयनमुक्तम्। तथा मिताक्षरायां शङ्खः–'क्षत्रियवैश्यानुलोमानन्तरोत्पन्नजो रथकारस्तस्याऽध्ययनेज्याधानोपनयनसंस्कारक्रियाः' इति।

माहिष्येण करण्यान्तु रथकारः प्रजायते।

इति याज्ञवल्क्योक्तोऽयम्। वैश्याच्छूद्रायामुत्पन्नस्य करणस्याऽपि रथकारपदवाच्यता। 'वैश्याच्छूद्रायां रथकारः' इति बौधायनादिति मदनपारिजातकर्तृकर्तृकायां शूद्रधर्मोत्पलद्योतन्यां स्मृतिकौमुद्यां स्पष्टम्। पूर्वोक्तो वसिष्ठोऽपि तत्रैव स्पष्टः। तथा व्रात्यवैश्योत्पन्नः सुधन्वाचा-

र्थाख्योऽपि रथकार इति जैमिनिः। तथा हि वचनाद्रथकारस्याधाने सर्वशेषत्वात् 'वर्षासु रथकार आदधीत' इति वाक्ये त्रैवर्णिकस्य रथकारस्याधानं वचनात्—अस्मादेव वाक्यात्। अस्य रथकाराधानवाक्यस्य सर्वत्रैवर्णिकाधानविधायकवाक्यशेषे पठितत्वात्। त्रैवर्णिकानामुक्तस्य कालस्य बाधे मानाभावेनेदं वचनमत्रैवर्णिकपरमिति तदर्थ इति तद्भाष्यम्। ते च के तत्राह सूत्रकारः—

सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन्।

इति। 'सौधन्वना ऋभवः' इति रथकाराधानमन्त्रैर्ऋभुपदवाच्यानां रथकाराणां सौधन्वना इत्यनेन सामानाधिकरण्यात्तेऽत्र रथकाराः सुधन्वनामाचार्याः सौधन्वनाः।

ननु व्रात्यवैश्यादुत्पन्नस्य सुधन्वाचार्यस्य वैश्यत्वमेवेति तत्राह हीनत्वात्–वैश्येभ्योऽपकृष्टत्वादित्यर्थः। अत एव मनुना सङ्करेषूक्ताः। शूद्रेभ्यस्तूत्कृष्टास्ते इति शूद्रत्वप्रयुक्तो निषेधो नाऽस्मिन्निति शबरस्वामी। इदञ्चाऽऽधानं स्वतन्त्रविश्वजिद्वत्कल्पस्वर्गरूपफलं, न तु यज्ञादिफलकमुपनयनाभावादिति। तत्र रत्नकृद्वचनादाधानमिति वदता जैमिनिनापीदं ध्वनितम्। एवञ्च व्रात्यवैश्योत्पन्नस्य नोपयनसंस्कार इति जैमिनिसम्मतम्। यद्यप्यस्य वृत्तिर्वसिष्ठेन, ब्रह्मपुराणे व्यासेन च प्रतिमादिस्थाने पूजोक्ता, तथाऽपि जैमिनिप्रामाण्यात् रथकरणवृत्तिरप्यस्य बोध्या। अत एव शबरस्वामिना 'सौधन्वना ऋभवः' इत्यत्र ऋभुपदस्य रथकारशक्तत्वेनेति 'नयन्ति ऋभवो यथा' इति मन्त्रः प्रमाणत्वेन दर्शितः। 'नेमिं नयन्ति' इत्यस्य काष्ठत्रययोजनेन नेमिं निष्पादयन्तीत्यर्थः। एवञ्च योगरूढस्तत्र रथकारशब्दः। अन्ये तु शुद्धरूढमेवेच्छन्ति। एवञ्च रूढेर्बलवत्त्वादस्यैव ग्रहणं न्याय्यमि

ब्राह्मणोत्पन्नोऽप्यसंस्कार्यः।

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रुमिडाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥

इत्यत्र मनुना वृषलत्वेन भणितद्रुमिडखशसंज्ञाया व्रात्यक्षत्रियजेस्य व्यवहारात् क्रियालोपेन वृषलत्वकथनाच्च । न च क्षत्रियाणां कलौ संन्यासनिषेधात्तत्सत्त्वानुमानमुपनयनाद्यनुमानश्चेति वाच्यम् ।

मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।
न तु बाहूरुजातानामयं धर्मो विधीयते ॥

इत्येव स्मरणात् । विष्णोर्लिङ्गं संन्यासः, तन्निषेधस्य खपुष्पायमाणत्वाच्च क्वापि युगे क्षत्रियाणां संन्यासास्मरणाच्च । आपस्तम्बेन तु 'वसन्तो ब्राह्मणस्य, ग्रीष्मो राजन्यस्य, हेमन्तो वा शरद्वैश्यस्य, वर्षा रथकारस्य, ये त्रयो वर्णानामेतत्कर्म कुर्युस्तेषामेष कालः' इत्याधानप्रकरणे उक्तम् । त्रयाणां वर्णानामन्तर्भूता गुणेच्छया कुर्वन्ति रथकरणं रथकारा इति तद्भाष्यकृतः । 'ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्योपकृष्टाः' इति आश्वलायनसूत्रव्याख्यायामुपकृष्टो रथकारो वैश्यस्तक्षकर्मोपजीवी उपकृष्ट इत्युच्यते इति तद्व्याख्यातारः । न च त्रैवर्णिकस्य शिल्पोपजीवनप्रतिषेधात्तस्य रथकारत्वासम्भव इति वाच्यं, 'गुणार्थेन' इति सूत्रेण जैमिनिना समाहितत्वात् । न च तेषामेतद्विधिविषयत्वे रथकरत्वे निमित्ते वर्षाविधानं वाक्येन कार्यं मम तु यस्याप्राप्तन्तस्याधानविधानं श्रुत्येति वसन्तादिवाक्यैरैकरूप्यमिति वाच्यम्, आपस्तम्बवचनेन तस्य नैमित्तिकत्वबोधनेनाऽक्षतेः । न हि सर्वेषामैकरूप्यनियमः सर्वत्राऽस्ति । बौधायन उपनयनमपि वर्षासु रथकारस्याह । अनेकऋषिप्रामाण्यात्सर्वत्र श्रुतेस्तात्पर्यमिति तत्त्वम् । एतेन माहिष्यात्करण्यामुत्पन्नस्य रथकारस्य नाधानाधिकार इति तन्त्ररत्नोक्तमपास्तं प्रागुक्तवसिष्ठशङ्काविरोधात् ।

नन्वस्तूग्राणां शूद्रत्वं तथापि तेषां कलौ कर्माधिकारोऽस्त्येव। तथा हि मात्स्ये—

ब्राह्मणाः शूद्रयोनिस्थाः शूद्रा वै मन्त्रयोनयः।

इत्युक्तम्। अभिलिप्सवो धनमिति शेषः। वेदार्थमुपस्थास्यन्ति उपस्थापयिष्यन्ति बोधयिष्यन्ति। शूद्रयोनिस्थाः तत्तुल्या एव। मन्त्रयोनय इति मन्त्रयोनिब्राह्मणवदुपनयनादिसंस्कारवन्त इत्यर्थः। तथा कौर्मे—

अध्यापयन्ति वै वेदान् शूद्रान्धर्मार्थकोविदान्।

इति। लिङ्गमात्स्ययोः—

अधीयते तदा वेदान् शूद्रा धर्मार्थकोविदाः।
यजन्ते चाश्वमेधेन राजानः शूद्रयोनयः॥

इति वाक्यजालेन तदधिकारबोधनादिति चेन्न—

तस्मादायुर्बलं रूपं कालं प्राप्य प्रहीयते।

इति लैङ्गस्थवाक्यशेषेणैतद्वाक्यानां कलावपि शूद्रान् प्रत्येतन्निषिद्ध-मित्यत्रार्थ एव तात्पर्यात्। किञ्च—

विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्।
कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च।
वेदाक्षराविचारेण शूद्रश्चण्डालतां व्रजेत्॥

इति पराशरोक्तेरयमेवार्थ उचितः। अभक्ष्यं गोमांसादि, वेदाक्ष-क्षरादिविचारस्तदुच्चारणन्तदर्थज्ञानञ्च, चरेर्गतिभक्षणार्थत्वात्। तत्र गतिर्ज्ञानन्तच्चार्थविषयं सामर्थ्यात्। भक्षणञ्चोच्चारणमेव। तथा—'अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपूरणं यद्युवा एतत् श्मशानं यच्छूद्रः' इति श्रुतेरुक्त एव मात्स्यादिवचनार्थः। यद्युवा जङ्गमम्। भागवतेऽपि—

स्त्रीशूद्रद्विजबन्धूनां न त्रयी श्रुतिगोचरा।

इति । द्विजबन्धवो व्रात्या द्विजेभ्यः शूद्रायामुत्पन्नाश्च । ब्रह्मपुराणेऽपि–

विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा ।

इति मात्रपदेन स्मृतिषु शूद्रं प्रति विहितगर्भाधाननामकरण-निष्क्रमणकर्णवेधान्नप्राशनविवाहातिरिक्तसंस्कारनिवृत्तेः ।

ननु वनपर्वणि युधिष्ठिराऽजगरसंवादे 'ये यजामहे' इति श्रुत्या ब्राह्मणत्वे सन्देहमुपन्यस्य शीलेन निर्णय इत्युक्तम् । तद्व्याख्यातृभिश्च ब्राह्मणत्वसन्देहे कथं यज्ञो नानिष्टफल इत्याशङ्क्य यजमानस्य होत्राऽध्वर्युणा च प्रवरवरणेनाऽब्राह्मणस्यापि यजमानस्य ब्राह्मण्यं सम्पाद्यत इति व्याख्यातम् । तथेदानीमक्षत्रियाणामपि क्षत्रि-यत्वप्राप्तिरस्त्विति चेन्न, ब्राह्मणत्वेन निश्चिते तच्छ्रौततात्पर्याभा-वात् । तथा हि सर्प उवाच–

ब्राह्मणः को भवेद्राजन् ! वेद्यं किञ्च युधिष्ठिर ! ।

वेद्यं–ज्ञानमात्रप्राप्यम् । युधिष्ठिर उवाच––

सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा ।
दृश्यते यत्र नागेन्द्र ! स ब्राह्मण इति स्मृतः ॥

सत्यं यथार्थमहिंस्रं वचनम् । आनृशंस्यमनैष्ठुर्यम् । तपः स्व-धर्माचरणम् । घृणा कृपा ।

वेद्यं सर्प ! परं ब्रह्म निर्दुःखमसुखञ्च यत् ।
यत्र गत्वा न शोचन्ति भवतः किं विवक्षितम् ॥

असुखत्वं कार्यसुखानाश्रयत्वात् । यत्र ब्रह्मणि न शोचन्ति पुनः संसारं न प्राप्नुवन्ति । सर्प उवाच–

चातुर्वर्ण्यं प्रमाणञ्च सत्यञ्च ब्रह्म चैव हि ।
शूद्रेष्वपि च सत्यञ्च दानमक्रोध एव च ॥
आनृशंस्यमहिंसा च घृणा चैव युधिष्ठिर ! ।
वेद्यं यच्चात्र निर्दुःखमसुखञ्च नराधिप ! ॥
ताभ्यां हीनं पदञ्चान्यन्न तदस्तीति लक्षये ॥

चातुर्वर्ण्यं चतुर्वर्णहितं सत्यं प्रमाणञ्च ब्रह्म धर्मव्यवस्थापकं वेद-स्मृत्याचारादि। सत्यादीनां शूद्रेऽपि दर्शनात्तत्राऽतिव्याप्तिर्ब्राह्मणलक्षणस्येति भावः। एवं ब्रह्मापि नास्तीति प्रश्नः। युधिष्ठिर उवाच—

शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते।
नैव शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः॥
यत्रैतल्लक्ष्यते सर्प! वृत्तं स ब्राह्मणः स्मृतः।
यत्रैतन्न भवेत्सर्प! तं शूद्रमिति निर्दिशेत्॥

शूद्रलक्ष्म कामादिकं, ब्राह्मणलक्ष्म शमादिकं, तत्क्रमेण ब्राह्मणे शूद्रे च नास्तीत्यर्थः। शूद्रोऽपि शूद्रत्वेन निश्चितोपि शमाद्युपेतो ब्राह्मणसदृशो मान्यः। ब्राह्मणोपि कामादियुतः शूद्रतुल्यतयाऽनादर्तव्यो न तु मुख्ये शूद्रे ब्राह्मणत्वादि वक्तुं शक्यमनेकश्रुतिस्मृति-विरोधात्। पूर्वपक्षिणा मुख्यतत्त्वापत्तौ शङ्कितायाङ्गौणतत्पदप्रयोगे इष्टापत्तिः सिद्धान्तिनः, अन्यथा तादृशवृत्तवतः शूद्रस्य वेदाध्ययनापत्तेः।

यत्पुनर्भवता प्रोक्तं न वेद्यं विद्यतीति च।

सुखदुःखहीनन्नास्तीत्युक्तमित्यर्थः।

एवमेतन्मतं सर्प! ताभ्यां हीनन्न विद्यते।

कर्म प्राप्यमिति शेषः। वेद्यन्त्वस्त्येवेत्याह—

यथा शीतोष्णयोर्मध्ये भवेन्नोष्णं न शीतता।
एवं वै सुखदुःखाभ्यां हीनन्नास्ति पदं क्वचित्॥
एषा मम मतिस्सर्प! यथा वा मन्यते भवान्।

यद्यपि तत्कर्म प्राप्यन्न तथापि तन्नास्तीति नेति काकुः, ज्ञानप्राप्यस्य तस्य श्रुतिसिद्धत्वादिति भावः।

सर्प उवाच—

यदि तेऽवृत्ततो राजन्! ब्राह्मणः प्रसमीक्षितः।
वृथा जातिस्तदा राजन्! वृत्तं यावन्न विद्यते॥

युधिष्ठिर उवाच—

जातिरत्र महासर्प ! मनुष्यत्वे महामते ! ।
संस्कारात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ॥
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ।
वाङ्मैथुनमथो जन्म मरणञ्च समं नृणाम् ॥

वागादिवन्मैथुनस्यापि साधारण्याज्जातिर्दुर्ज्ञेयेति भावः । तत्र श्रुतिं प्रमाणयति । इदमार्षं प्रमाणञ्च 'ये यजामहे' इत्यपि । ये वयं स्मो ब्राह्मणा अन्ये वा होत्रध्वर्युयजमाना वषट्कारहविःप्रक्षेपोद्देशात्यागकर्तारस्ते यजामहे इत्यर्थकेन 'ये यजामहे' इत्यनेन ब्राह्मण्येनाऽवधारणं दर्शयति । श्रुत्यन्तरमपि-'न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा वा' इति मन्त्रलिङ्गमपि 'य एवास्मि स सन्यजे' इति। एवंविधा विनयेन सत्योक्तिरेव शीलरूपा तेषां ब्राह्मण्यनिश्चायिकेत्याह—

तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्त्वदर्शिनः ।

ते शीलं प्रधानञ्च तदिष्टञ्चेत्यर्थः, जात्यनुमापकत्वादिति भावः । स्पष्टश्चायमर्थश्छान्दोग्ये जाबालोपाख्याने ।

नन्वेवं ब्राह्मण्यसन्देहे कथं यज्ञादौ प्रवृत्तिरिति चेन्न, निश्चयस्यैव प्रतिबन्धकत्वात् । शीलादिना ब्राह्मण्यमौत्कण्ठ्येन सम्भाव्यमानसव्यभिचारदुष्टमातापितृजन्यत्वप्रयुक्ताब्राह्मण्यस्यानुत्कटसन्देहाविषयस्य निवृत्तये 'आग्निर्होता' इति मन्त्रेण गौतमवदपास्यव(?)दङ्गिरोवद्ब्राह्मणवदिति यजमानादेः प्रवरवरणङ्कुर्वन्ति । तथा च श्रुतिः—'अग्निर्देवो होता' इत्याह। 'य एव देवानामवृणीत ततो देवा अभवन् परासुरा यस्यव विदुषः प्रवरं वृणते भवत्यात्मनापरास्य भ्रातृव्यो भवति' इति । न त्वनेनाऽब्राह्मणत्वेन निश्चितस्य ब्राह्मणत्वं भवति । अन्यथा विश्वामित्रस्य ब्राह्मण्यलाभाय गुरुतरतपःप्रयासवैयर्थ्यापत्तिः । अब्राह्मणत्वेन निश्चितस्य सङ्करजस्यात्युग्रेणापि तपसा ब्राह्मण्याप्राप्तिर्मतङ्गोपाख्याने भारते स्पष्टा । अत एव द्विजातकुण्डगोलकावसंस्कार्या-

विति मिताक्षरा। श्राद्धे कुण्डादिनिषेधस्तु ब्राह्मण्यां ब्राह्मणाज्जात इति भ्रमप्राप्तस्येत्यपि तेनैवोक्तम्। स्मृत्यर्थसारकृतापि तथैवोक्त्वा—

केचिदाहुर्द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ।

इति मतान्तरमुपन्यस्य उपनयनपूर्वं सन्ध्यावन्दनमात्रमुक्तम्। त्वद्रीत्या प्रवरवरणेन तस्य यज्ञादेरप्यापत्तिरिति बोध्यम्। उक्तमुपसंहरति—

यत्रेदानीं महासर्प! संस्कृतं वृत्तमिष्यते।
तं ब्राह्मणमहं पूर्वमुक्तवान्भुजगोत्तम!॥

इति। संस्कृतवृत्तं वैदिकसंस्कारपूर्वकं सत्यादिवचनरूपमतः सत्यादियुतस्यापि शूद्रस्य न ब्राह्मणत्वम्। ब्राह्मणत्वेन सम्भाविते च विप्रत्वप्राप्तिकर्मविशिष्टं तत्तन्निर्णायकमतस्तद्विशिष्ट एव मे ब्राह्मणो मत इति भाव इति। न तेनाऽक्षत्रियाणां क्षत्रियत्वप्राप्तिः।

कर्मभिः शुचिभिर्देवि! शुद्धात्मा विजितेन्द्रियः।
शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्माऽब्रवीत्स्वयम्॥

स्वभावः कर्म च शुभं यत्र शूद्रेऽधितिष्ठति।
विशुद्धः स द्विजातिभ्यो विज्ञेय इति मे मतिः॥
तयोर्विनापि संस्कारो न श्रुतिर्न च सङ्गतिः।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम्॥

इति ब्रह्मोक्तेः। वृत्तसहितान्येवैतानि कारणं न तु केवलानीत्यर्थः।

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्।
यद्यन्यत्रापि दृश्येत तं तेनैव विनिर्दिशेत्॥

इति भागवतस्थमपि तद्वन्मान्य इत्यर्थकं 'संस्कारा अविच्छिन्नाः स द्विजोऽजो जगाद यम्' इति तत्रैवोक्तेः। यत्र यस्मिन्संस्कारा अविच्छिन्नाः स द्विजः, यमेवम्भूतमजो ब्रह्मा द्विज इति जगादेति तदर्थ इति दिक्।

नन्वेवमपि भागवते दशमे चत्वारिंशेऽध्यायेऽक्रूरकृतस्तुतौ—

म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे।

इत्यनेन कलिकालेऽपि क्षत्रियसत्तोक्तेः कथमिदानीं तदभाव इति चेन्न,

धर्मोपलक्षितगुणैकवाच्यतया तस्यक्षत्रपदस्य क्षत्रसदृशपरत्वात् । म्लेच्छप्रायेत्यस्य म्लेच्छवत् पापाचारेत्यर्थः। 'प्रायः पापं विजानीयात्' इति स्मृतेः । प्रायशब्दोऽयम् 'प्रायस्य चित्तनिश्चयोः' इति समानत्वार्थे स्थितः । अतः क्षत्रवंशोत्पन्नेऽपि म्लेच्छबहुला अन्ये व्रात्या एव तदन्ते इत्यर्थः । अत एव द्वादशे कल्क्यवतारवर्णने—

नृपलिङ्गच्छदो दस्यून्कोटिशो निहनिष्यति ।

इत्युक्तम् ।

असंस्कृताः क्रियाहीना रजसा तमसा वृताः ।
प्रजास्ते भक्षयिष्यन्ति म्लेच्छाः राजन्यरूपिणः ॥

इति च तत्रोक्तम् । एकादशस्कन्धेऽपि—

भूमेर्भरावतरणाय यदुष्वजन्मा
जातः करिष्यति सुरैरपि दुष्कराणि ।
वादैर्विमोहयति यज्ञकृतोऽतदर्हान्
शूद्रान् कलौ क्षितिभुजो न्यहनिष्यदन्ते ॥

इति । अतदर्हान् दैत्यान् । अन्ते कलेरन्ते कल्किरूपेण । एवञ्च नृपलिङ्गच्छद इत्यस्य राजवेषच्छन्नानित्यर्थः । तथापि विष्णुपुराणे चन्द्रसूर्यवंशानुक्त्वा—

एतेषां नामलिङ्गानां पुरुषाणां महात्मनाम् ।
कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥

इत्युक्तम् । नामैव लिङ्गं ज्ञापकं येषां चन्द्रसूर्यवंश्यानां क्षत्रियाणां कीर्तिरेव स्थिता न तु राज्यं पुत्रादयो वेत्यर्थ इति श्रीधरस्वामी हरिवंशेऽपि । भविष्ये—

न क्षत्राणि नियोक्ष्यन्ति विकर्मस्था द्विजातयः ।
चौरप्रायाश्च राजानो युगान्ते पर्युपस्थिते ॥

इति । युगान्ते कलौ । क्षत्राणि क्षत्रियाः । न नियोक्ष्यन्ति लोकान्धर्मे इति शेषः । राज्याधिकारिणां तेषामभावादिति भावः । अत एव

द्विजातयो ब्राह्मणाद्या विकर्मस्था राजानो योगमात्रेण भूपालाश्चौर-प्रायाः स्वयमेव पालकाः स्वयमेवापहर्तार इत्यर्थः। कश्चिदेव तथेत्यतः प्राय इत्युक्तम्। यत्तु यतः स्वयं विकर्मस्था अतो ब्राह्मणाः क्षत्रियान् धर्मे न नियोक्ष्यन्तीत्यन्वय इति तन्न विष्णुपुराणविरोधात्। तथा—

वैश्याचाराश्च राजन्या धनधान्योपजीविनः।

इति। एतच्छ्लोकस्थभविष्यन्तीत्यस्य स्थास्यन्तीत्यर्थः। यथा सम्प्रति ब्रह्मक्षत्रियत्वेन प्रसिद्धास्तथाचारा दृश्यन्ते वाह्लिकाख्ये मद्रदेशे, ते परशुरामेण क्षत्रियधर्मं त्याजिता इति पुराणेषु प्रसिद्धम्। तथा—

अक्षत्रियाश्च राजानो विप्राः शूद्रोपजीविनः।
शूद्राश्च ब्राह्मणाचारा भविष्यन्ति युगक्षये॥

इति। युगक्षये कलौ। एतच्च स्पष्टं क्षत्रियाणां राज्याभावं बोधयति। तस्मात्कलौ राज्यपदस्थानां क्षत्रियपदव्यवहार्याणामुपनयनवदध्ययनयज्ञाद्यनधिकारः सिद्धः, तदधिकारयोग्यमुख्यक्षत्रियत्वाभावादित्यलं पल्लवितेन॥

अथ त्रिपुरुषात्पूर्वमप्यनुपनीतब्राह्मणकुलजस्योपनयनं भवति न वेति सन्देहे च निर्णयाय व्रात्यताप्रायश्चित्तनिर्णयः क्रियते; तदर्थमुपनयनकालनिर्णयः। तत्र 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इति श्रुतिः। आश्वलायनोऽपि—'अष्टमे वर्षे ब्राह्मणमुपनयेत् गर्भाष्टमे वा, एकादशे क्षत्रियं, द्वादशे वैश्यमाषोडशाद्ब्राह्मणस्यानतीतः कालः, आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्याऽत ऊर्ध्वं पतितसावित्रीका भवन्ति नैतानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुः' इति। अत्रायमुपनयननिषेधो चीर्णप्रायश्चित्तानां कैश्चिदतिक्रान्तनिषेधैरुपनयनेऽपि नाध्यापनं केनचिदतिक्रान्तनिषेधेनाध्यापनेऽपि न याजनादीत्यर्थः। अयञ्चोपनयननिषेधोऽष्टवर्षान्तमुख्यकालषोडशवर्षान्तगौणकालोभयाभावेन प्राप्तस्यैवोपनयनाभावस्याऽनुवादः। यथा 'अशूद्राणामदुष्टकर्मणामुपनयनम्' इत्यापस्तम्बसूत्रे शूद्रप्रतिषे-

धो नित्यप्राप्तानुवादः। दुष्टकर्मप्रतिषेधार्थन्तु सूत्रम्। त्रैवर्णिकस्यैवोपनयनविधानेन शूद्रस्य तदप्राप्तेरिति हरदत्तेनोक्तम्। तदनुवादफलन्तु ब्राह्मणादिभ्यः शूद्रायामुत्पन्नस्य ब्राह्मणादिजन्यत्वेऽप्युपनयनाभावबोधनम्। बौधायनोऽपि—'अथातो गर्भाष्टमेषु वर्षेषु ब्राह्मणमुपनयीत, गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यमाषोडशाद्ब्राह्मणस्य नात्ययः इत्येवमेवेतरयोर्द्वाविंशतिश्चतुर्विंशतिश्चाथाऽपि काम्यानि भवन्ति, सप्तमे ब्रह्मवर्चसकाममष्टमे आयुष्कामं, नवमे तेजस्कामं, दशमेऽन्नाद्यकाममेकादशे इन्द्रियकामं, द्वादशे पशुकामं, वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यं, वर्षासु रथकारं सर्वानेव वा वसन्ते' इति। रथकारः पूर्वमेव निरूपितः। आपस्तम्बोऽपि—'गृह्ये गर्भाष्टमेषु ब्राह्मणानुपनयीत, गर्भैकादशेषु क्षत्रियं, गर्भद्वादशेषु वैश्यं वसन्तो ग्रीष्मः शरदृतवो वर्णानुपूर्व्येण' इति। गर्भाष्टमेषु गर्भषष्ठसप्तमाष्टमेषु विप्रस्य क्षत्रस्य नवमदशमैकादशेषु वैश्यस्य दशमतास्त्रिष्विति तदर्थ इति सुदर्शनः। धर्मप्रश्ने आपस्तम्बः—'आषोडशाद्ब्राह्मणस्यानात्यय आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्य' इति। आङभिविधौ, मर्यादायामिति मिताक्षरा।

> सावित्री पतिता यस्य दश वर्षाणि पञ्च च।
> समतिक्रान्तकालाश्च पतिताः सर्व एव ते॥
> सशिखं वपनं कृत्वा व्रतङ्कुर्यात्समाहितः।
> एकविंशतिरात्रञ्च पिबेत्प्रसृतियावकम्॥
> हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च वा।
> ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्॥

इति। यमस्मृतौ पञ्चदशोर्ध्वं पतितसावित्रीकत्वोक्तेरिति तदाशयः। अभिविधिपक्षेऽपि षोडशग्रहणङ्गर्भत इति कैश्चिद्विरोधः। अत्ययोऽतिक्रमः स च प्रकरणादुपनयनस्येति गम्यते। तदभावोऽनात्ययः। आर्षो दीर्घः,आङो वा दीर्घः। अधिकमप्याह—'यथा व्रतेषु

समर्थः स्याद्यानि वक्ष्यामः' । वक्ष्यमाणव्रतेषु यथा समर्थः स्यात्तावत्कालं प्रतीक्षा कार्येति तदर्थः । एवञ्च पूर्वमेव सामर्थ्येऽष्टवर्षातिक्रमेऽपि वक्ष्यमाणं प्रायश्चित्तं भवत्येव । एवं षोडशादिभ्य ऊर्ध्वं कियत्कालमसमर्थानां यदा सामर्थ्यन्तदा विनैव प्रायश्चित्तमुपनयनम् । सामर्थ्योत्तरमपि किञ्चित्कालातिक्रमे प्रायश्चित्तं पूर्वमेव ।

तत्प्रायश्चित्तमाह—'अतिक्रान्ते सावित्र्या ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्' । यस्य यः सावित्र्याः कालस्तदतिक्रमे ऽयवयवविद्याध्येतृसम्बन्धि ब्रह्मचर्यमग्निसेवाध्ययनगुरुशुश्रूषातिरिक्तं सर्वं ब्रह्मचारिधर्मं चरेत् । ऋतुमिति कालविधानं, तेन ऋत्वारम्भे प्रायश्चित्तारम्भः । अन्ये तु वेदब्रह्मचर्यमित्येव सिद्धे त्रैविद्यकमित्युक्त्वा प्रतिवेदं ऋतुमिति ऋतुत्रयन्तदित्याह ॥

अथोपनयम् । एवं चरितव्रत उपनेतव्यः । ततः संवत्सरमुदकोपस्पर्शनम् । तत उपनयनोत्तरं संवत्सरस्नानम् । शक्तस्य त्रिषवणमशक्तस्य यथाशक्ति । तच्च वक्ष्यमाणपावमान्यादिभिरिति हरदत्तः । तूष्णीमित्यन्ये ।

अथाध्याप्य इति । अत्रैव विषये वसिष्ठः आहोद्दालकव्रतम् । 'पतितसावित्रीक उद्दालकव्रतञ्चरेत द्वौ मासौ यावकेन वर्तयेत् मासं पयसाऽऽमिक्षयाऽष्टरात्रं, घृतेन षड्रात्रम् , अयाचितेन त्रिरात्रम्, अभक्षोऽहोरात्रमुपवसेदश्वमेधावभृथङ्गच्छेत् व्रात्यस्तोमेन वा यजेत'—इति । उपवसनमश्वमेधावभृथमिति पाठान्तरम् । याज्ञवल्क्यः—

आषोडशादाद्वाविंशाच्चतुर्विंशाच्च वत्सरात् ।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥

इति । मनुरपि—

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ।

आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥

इति । व्रात्यसंज्ञाप्रयोजनञ्च व्रात्यानां याजनङ्कृत्वा त्रीन्कृच्छ्रानाचरेदिति । त्रीन् कृच्छ्रानाचरेद्व्रात्ययाजकोऽभिचरन्नपीति मनुयाज्ञवल्क्याद्युक्तप्रायश्चित्तप्राप्तिरिति तद्व्याख्यातारः । तथा शातातपोऽपि—'पतितसावित्रीकान्नोपनयेन्नाध्यापयेत् य एतानुपनयेदध्यापयेत् याजयेद्वा स उद्दालकव्रतञ्चरेत्' इति । एतदुद्दालकव्रतङ्कामकृते इति मिताक्षरा । अत्र मुख्योपनेतुरभावेन व्रतसमर्थस्याऽष्टवर्षाद्युपनयनकालातिक्रमे मासं पञ्चगव्याशनं, चान्द्रायणं, मासं पयोव्रतं वा पराको वा अनापद्यतिक्रमे उपनयीत केषूक्तं मानवं त्रैमासिकं पञ्चदशतः षोडशतो वा वर्षादूर्ध्वं कियतः कालस्यातिक्रमे उद्दालकव्रतव्रात्यस्तोमौ बोध्याविति निबन्धकृतः । यत्तु शङ्खेन गोदानसहितं चान्द्रायणमुक्तन्तदुद्दालकव्रतसमानविषयम् । उद्दालकव्रतशङ्खोक्तयोः सपाददशाधेनवः । देशाविप्लवादिना कालातिपाते सशिखं वपनङ्कृत्वेत्यादियमोक्तं द्रष्टव्यम् । आलस्यादिना कालातिपाते एव द्विगुणं शङ्खोक्तं वसिष्ठोक्तं वा । कथमप्युपनेतुरभावेन कालातिपाते मनुविष्णू—

येषां द्विजानां गायत्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन्कृच्छ्रान् यथाविध्युपनाययेत् ॥

इति । पित्रादीनामप्यनुपेतत्वे आहाऽऽपस्तम्बः—'अथ यस्य पिता पितामह इत्यनुपेतौ स्यातान्ते ब्रह्महसंस्तुताः'। यस्य माणवकस्य, जातावेकवचनम् । येषां माणवकानां पिता पितामह इत्यनुपेतौ स्वयञ्च ते तथाविधा माणवका ब्रह्महसंस्तुता ब्रह्महण इत्येवङ्कीर्तिताः । अस्मिंस्तच्छस्तद्धर्मप्राप्त्यर्थः । ततश्च यथा ब्रह्महसहिते गृहे नाध्येययमेवं तैरपि तत्प्रायश्चित्तप्राप्त्यर्थस्तच्छब्द इति हरदत्तः । एवञ्च ब्रह्म-

हत्याप्रायश्चित्तेन समुच्चयो वक्ष्यमाणस्येति लभ्यते। अत्र व्याख्याने स्वयञ्चेत्यत्र यथाकालमनुपेत इति शेषः। 'यस्य प्रपितामहादि' इति सूत्रे हरदत्तेन तथाव्याख्यानात्। 'तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्'। अभ्यागमनं आभिमुख्येन गमनम्। मातापितृपुत्रदारशरीररक्षणार्थमपि वर्जयेत्। रक्षायाः सर्वतः प्रतिग्राह्यत्वे पितृतस्तत्प्रतिग्रहे निषेधः। दुकूलकारिणामप्युद्यतं भोजनं यद्यप्यत्याज्यन्तथाप्यस्य तादृशमपि त्याज्यम्। दुष्कुलादपि स्त्रीरत्नस्य ग्राह्यत्वं यद्यपि, तथाप्येतदीयकन्याया अपि विवाहो वर्ज्यः। तेषामिच्छतां प्रायश्चित्तम्। इच्छतामिति वचनान्न बलात्कारेण प्रायश्चित्तम्।

अत्र वदन्ति आद्येऽतिक्रमे प्रायश्चित्तपदमनुक्त्वाऽत्र प्रायश्चित्तमित्युक्त्या ब्रह्महपदस्य च पूर्वं प्रयोगात्तत्प्रायश्चित्तमित्यर्थः। अत एव तेषामिच्छतां ब्रह्मचर्यमिति नोक्तम्। एतदभिप्रायेणैव हरदत्तेनातस्मिंस्तच्छब्दप्रयोगः प्रायश्चित्तप्राप्त्यर्थं इति व्याख्यातम्। ब्रह्मचर्यन्तु अधिकमिति। यथा प्रथमेऽतिक्रमे ऋतुरेवं संवत्सरः। यथा प्रथमातिक्रमे ब्रह्मचर्यस्य ऋतुः काल एवमत्रातिक्रमे संवत्सर इत्यर्थः। अत्र 'अथ यस्य' इति सूत्रे पितामह इत्यसमस्तोपादानात्पितृमात्रनुपनीतत्वे इदं पितामहस्यापि तत्त्वे द्विगुणमेतत्, द्विगुणब्रह्महत्याप्रायश्चित्तेन सह। अत्र संवत्सरं ब्रह्मचर्यमिति सूचितम्। एवञ्चात्र पितृमात्रस्याऽनुपनीतत्वे त्रिवत्सरमित्यादि बोध्यमिति वदन्ति।

अथोपनयनम्। तत उदकोपस्पर्शनं स्पष्टम्। तत्र विशेषमाह—'प्रतिपुरुषं संख्याय संवत्सरान् यावतोऽनुपेताः स्युः'। यदि पितैवानुपेतस्तदा संवत्सरमेकं, यदि पितामहोऽपि ततो द्वौ, अथ स्वयमपि यथाकालमनुपेतस्ततः संवत्सरानिति हरदत्तः। स्नाने मन्त्रा व्याहृतयः। पक्षान्तरेण मन्त्रान्तराण्यपि धर्मप्रश्ने द्रष्टव्यानि।

अथाध्याप्यः। स्पष्टम्। अत्र यस्येत्युपक्रमे एकवचनमन्तेऽप्यथाध्याप्य इति एकवचनम्। मध्ये तु ते ब्रह्महसंस्तुतास्तेषा-

मभ्यागमनमित्यादि बहुवचनं, तत्रोपक्रमोपसंहारानुसारेण एकस्यैव प्रायश्चित्तोपनयनाध्यापनानि न पित्रादेः । बहुवचनञ्च माणवकबहुत्वापेक्षम् । जातौ चैकवचनमिति हरदत्तः । युक्तञ्चैतत्, संन्यासोत्तरं गार्हस्थ्यस्येव विवाहोत्तरं ब्रह्मचर्यस्याऽप्राप्त्या तत्प्रसङ्गाभावादिति निरूपयिष्यामः । मध्ये तेषामिति बहुवचनेन पित्रादिसङ्ग्रहभ्रमव्यावृत्त्यर्थमाद्यावन्ते चैकवचनमिति बोध्यम् । 'अथ यस्य प्रपितामहादिनानुस्मर्यं उपनयनं ते श्मशानसंस्तुतास्तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्, तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यञ्चरेत्' ।

अथोपनयनं, तत उदकोपस्पर्शनं पावमान्यादिभिरिति । प्रपितामहादि प्रपितामहमारभ्य पितामहः पिता स्वयञ्च यथाकालमनुपेतास्ते तथाविधा माणवकाः श्मशानसंस्तुताः यथा श्मशानस्य सर्वतः शम्याप्रासपर्यन्तञ्चाध्ययनन्तथा एषामपि सन्निधौ नाध्येयमित्यर्थः । स्नानं माणवकबहुत्वाभिप्रायेत्यादिभिरित्युक्त्या प्रतिपुरुषं संख्याय संवत्सरानित्येतदप्यत्र द्रष्टव्यमिति सूचयति । अत्रापि बहुवचनं माणवकबहुत्वाभिप्रायेणैकवचनं जातौ । अत्र 'अथ गृहमेधोपदेशनम्' इत्युक्त्या प्रतिपुरुषं संख्यायेत्युक्तेश्च । तेषामिति तत्पदेन यत्पदपरामृष्टमाणवकग्रहणमेवोचितं, न तु पित्रादीनामित्याहुः ।

'अथ गृहमेधोपदेशनम्' । गृहमेधो गृह्यशास्त्रं गृहस्थाश्रमश्च नाध्यापनं कृत्स्नस्य वेदस्य न गृह्यमन्त्राणान्तु भवति गायत्रीजपोऽस्य सन्ध्याकाले आशौचिन इव दशवारं स्मरणमात्रम् । तथा च प्रपञ्चसारे—

जप्यः स्यादिह परलोकसिद्धिकामै-
मन्त्रोऽयं महिततरो द्विजैर्यथावत् ।
भूदेवा नरपतयस्तृतीयवर्णाः
सम्प्रोक्ता द्विजवचनेन तत्र भूयः ॥

द्विजवचनेन द्विजशब्देनोच्यन्त इति शेषः । तत्र भूयः तेषु मध्ये पुनरित्यर्थः ।

तेषां शुद्धकुलद्वयोत्थमहसामारभ्य तन्तुक्रियां
तारव्याहृतिसंयुतां सहशिरोगायत्र्युपास्या परा ।
सन्ध्योपासनया जपेन च तथा स्वाध्यायभेदैरपि
प्राणायामविधानतो मतिमता ध्यानैस्तथा नित्यशः ॥

इति । अत्र शुद्धकुलेत्याद्युक्तेरनुपनीतजानामयथाकालोपनीतजानाञ्च शुद्धमातापितृजत्वाभावेन तदुपासनानधिकारः सूचितः । स्वाध्यायभेदो ब्रह्मयज्ञः सम्पूर्णप्राणायामे । इतरत्र प्रणवव्याहृतिसंयुता गायत्रीति स्पष्टं तद्विदाम् । भागवतेऽपि सप्तमे—

संस्कारा यत्राऽविच्छिन्नाः स द्विजोऽजो जगाद यम् ।
इज्याध्ययनदानानि विहितानि द्विजन्मनाम् ॥
जन्मकर्मावदातानां क्रियाश्चाश्रमनोदिताः ।

इति । संस्काराः सोपनयना यत्र यद्वंशेऽविच्छिन्ना विच्छेदरहिताः स द्विजः । यमेवंगुणमजो ब्रह्मा वेदो वा द्विज इति जगाद जन्मना विशुद्धकुलेन कर्मणा आचारेण शुद्धानां द्विजन्मनां तद्वंश्यानामिज्यादीनि विहितानि ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च तेषामेव विहिता इति तदर्थः । एवञ्च व्रात्यानां तज्जन्यानां वा तत्राऽनधिकार इति स्पष्टमेवोक्तम् । महाभाष्येऽपि 'पुंयोगा'दिति सूत्रे उक्तम्—

त्रीणि यस्यावदातानि विद्या योनिश्च कर्म च ।
एतच्छिवे ! विजानीहि ब्राह्मणत्वस्य लक्षणम् ॥

इति । ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे, एवमाचरितप्रायश्चित्तात् गृहस्थीभूताद्यो निर्वर्तते उत्पद्यते तस्योपनयनसंस्कारो यथा प्रथमेऽतिक्रमे ऋतुं त्रैविद्यकं ब्रह्मचर्यं तथा तच्चारयित्वा कार्योऽथाध्याप्य इत्यन्तः । तत ऊर्ध्वं प्रकृतिवत् । ततस्तु यो निर्वर्तते तस्य प्रकृतिवद्यथाप्राप्तं यथाकालमुपनयनङ्-

तैव्यमित्यर्थः । तदग्रे तु न प्रायश्चित्तं नाप्युपनयनं मनूक्तेरिति बोध्यम् । एवमेवैषा स्मृतिः पराशरस्मृतिव्याख्याने माधवेन व्याख्याता । यत्तु 'यस्य प्रपितामहादि' इति सूत्रे प्रपितामहादीनामिति पाठकल्पनं, तत्त्वसङ्गतं हरदत्तमाधवादिविरोधात्, अध्येतृसम्प्रदायविरोधाच्च । यत्तु 'यस्य प्रपितामहादि' इति सूत्रं प्रपितामहादारभ्य पूर्वे उत्तरे चेति व्याचक्षते, इदमेवाभिप्रेत्य हरदत्तेन यस्य प्रपितामहस्य पितुरारभ्य नानुस्मर्यते उपनयनं तत्र प्रायश्चित्तं नोक्तमित्युक्त्वा धर्मशास्त्रैस्तु विहितमेवं पूर्वेष्वपीत्युक्तम् । तस्यार्थः-धर्मशास्त्रैस्तच्छास्त्रनिबन्धकारैरुक्तरीत्या स्मृतिं व्याख्याय तत्रापि प्रायश्चित्तं विहितमिति वदन्ति तत्तुच्छम्, कात्यायनगृह्यस्मृतिविरोधात् । तत्र हि 'आषोडशाद्ब्राह्मणस्य' इत्यादि आश्वलायनवाक्यसमानार्थकेनैतैर्व्यवहारैरित्यन्तं पठितम् । व्यवहारपदार्थश्चाऽत्र तेषामभ्यागमनमित्यादिरापस्तम्बोक्तः । ततः स आह कालातिक्रमे नियतवत् । अत्र हरिहरादयः-गर्भाधानाद्युपनयनान्तानां कर्मणां कालातिक्रमे नियतवत् । नियतेषु श्रौतेषु विध्नेषु यद्विहितमनादिष्टविषयं महाव्याहृतिहोमाख्यं सर्वप्रायश्चित्तं तत्कृत्वा तानि कार्याणीत्यर्थ इति । अन्ये तु षोडशादिरूपस्योक्तकालस्यैव कालातिक्रमे इत्यत्र ग्रहणमुचितम् । तत्र तु नेदृशं प्रायश्चित्तमुचितमत्यल्पत्वात् । तस्मान्नियतवदित्यस्य ब्रह्मचारिणो नियतं यद्वेदाध्ययनार्थं ब्रह्मचर्यन्तद्व्रतं कृत्वोपनयनङ्कार्यमित्यर्थः । तद्वदित्यनेनाऽग्निसेवाऽध्ययनगुरुशुश्रूषात्यागो बोधितः, कालश्चास्यापस्तम्बोक्त एव । एवञ्चातिक्रान्ते सावित्र्याः काले इत्यन्तसमानार्थमिदं, तन्त्रेणाऽस्यार्थरूपपरता चेत्याहुः ।

अथाऽनेकपुरुषपतितसावित्रीकविषये आपस्तम्बेन निषिद्धस्योपनयनस्य प्रतिप्रसवं वदन् कियत्पर्यन्तं संस्कार्यतेत्याकांक्षायां नियममाह-'त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनञ्च' । त्रिपुरुषमिति "संख्या वंश्येन" इत्यव्ययीभावः । पतितसावित्री-

काणां वंश्यानां त्रयाणां पुरुषाणां यदपत्यञ्चतुर्थं तत्र संस्कार उपनयनं भवति, अध्यापनन्तु नेति तदर्थः। चस्त्वर्थे तदधिकपतितसावित्रीकस्य तु न। तदाह हरिहरः—'प्रपितामहस्य पितरमारभ्य चतुर्णां पतितसावित्रीकाणामपत्ये तु न संस्कारः पूर्वनिषेधात्' इति। 'यस्य प्रपितामहादि' इति प्रक्रम्य उपनयनं नाध्याप्य इत्यापस्तम्बोक्तेरप्ययमेवार्थ उचितः। यत्तु कात्यायनसूत्रव्याख्यात्रा गदाधरेण—'तेषामपत्ये संस्कारो नाध्ययनञ्च न' इत्येवमेतत् सूत्रं व्याख्यातं हरिहरस्तु मृग्य इति चोक्तं, तदनेन परास्तं पूर्वनिषेधेनैव सिद्धेश्च। स च बहुदोषश्रवणाद्बहुपुरुषं पतितसावित्रीकविषयोऽपि संस्काराभावे अध्यापनाप्रसक्त्या नाध्यापनमित्यस्य वैयर्थ्यापत्तेश्च।

न च चतुरादिपुरुषपर्यन्तं पतितसावित्रीकाणामपत्ये त्रिपुरुषं पतितसावित्रीकाणामपत्यत्वमप्यस्तीति वाच्यं व्यापकसंख्याव्यवहारविषये व्याप्यसंख्याव्यवहाराभावात्। अत एव न हि त्रिपुत्रो द्विपुत्रव्यपदेशत्वं लभत इति 'अ इ उण्' सूत्रे भाष्ये उक्तम्। अन्यथाऽत्र बहुपुरुषमित्येव वदेत्। एवञ्चैतदेकवाक्यतया 'यस्य प्रपितामहादि' इत्यापस्तम्बस्मृतिरपि त्रिपुरुषं पतितसावित्रीकविषयैव। किञ्च यद्वंशे नोपनयनं स्मर्यत इत्येव सिद्धे यस्य प्रपितामहादीति विशिष्योक्तिर्निष्फला। अत एव धर्मशास्त्रैस्तु विहितमिति वाक्यं हरदत्तेन तु नाऽरुचिर्बोधिता। तद्बीजन्तूक्तमेव। स्मृत्योरेकमूलकल्पनालाघवानुरोधेनैकार्थ्ये सम्भवति भिन्नार्थत्वमन्याय्यमिति सर्वधर्मशास्त्रनिबन्धकृतां सिद्धान्तात्।

अभ्युपेत्याऽपि ब्रूमः—पूर्वे इत्यत्र 'कपिञ्जलाधिकरण'न्यायेन त्रयाणामेव ग्रहणापत्तौ सप्तमस्योपनयनलाभेऽपि तदूर्ध्वस्याष्टमादेरुपनयने मानाभावः। किञ्चायं प्रायश्चित्तविधिर्येषां वंशे उपनयनं स्मर्यते तद्विषये एव, न तु तदस्मरणे। यस्य प्रपितामहादीत्येतद्विषये पावमान्यादिभिः स्नानमित्यर्थके प्रतीके प्रतिपुरुषं संख्याय संवत्सरानि-

त्येतदत्रापि द्रष्टव्यमिति हरदत्तोक्तेः । तद्दृष्टणे तद्गमनाया असम्भ-वात् । किञ्च—

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥

इति याज्ञवल्क्यस्मृतिविरोधाच्च पञ्चमादीनामुपनयनम् । तथा हि सा स्मृतिरित्थं विज्ञानेश्वरेण व्याख्याता । जातयो मूर्द्धावसिकाद्यास्तासामु-त्कर्षो ब्राह्मणत्वादिजातिप्राप्तिः । युगे जन्मनि सप्तमे पञ्चमे, अपिशब्दात् षष्ठे वोद्धव्यः । व्यवस्थितश्चायं विकल्पः । व्यवस्था चेत्थम्—ब्राह्म-णेन शूद्रायामुत्पादिता निषादी, सा ब्राह्मणेनोढा दुहितरं काञ्चिज्ज-नयति सापि ब्राह्मणेनोढाऽन्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति । एवं ब्राह्मणेन वैश्यायामुत्पादिता षष्ठी साऽप्यनेन प्रकारे-ण पञ्चमी षष्ठं ब्राह्मणं जनयति । ब्राह्मणेन क्षत्रियायामुत्पादिता मू-र्द्धावसिक्ता साप्यनेन प्रकारेण चतुर्थी पञ्चमं ब्राह्मणं जनयति । एवं शूद्रायां क्षत्रियजोग्रा क्षत्रियेणोढा क्रमेण पञ्चमं क्षत्रियं जनयति । वैश्यायां क्षत्रियजा माहिष्या क्षत्रियोढा क्रमेण पञ्चमं क्षत्रियं जनयति । तथा करणी वैश्योढा पञ्चमं वैश्यमित्याद्यूह्यम् । तथा क-र्मणां वृत्त्यर्थानां व्यत्यये विपर्यासे सप्तमषष्ठपञ्चमेषु तत्साम्यम् । तथा हि ब्राह्मणो मुख्यया वृत्त्याऽजीवन् क्षात्रेण कर्मणा जीवेदित्य-नुकल्पः । तेनाऽप्यजीवन् वैश्यवृत्त्या तयाप्यजीवन् शूद्रवृत्त्या । एवं क्षत्रियस्य वैश्यशूद्रवृत्ती अनुकल्पः । वैश्यस्य शूद्रवृत्तिरिति । एवं कर्मणां विपर्यये सति यद्यापद्विमोक्षेऽपि तां वृत्तिं न त्यजति, तदा सप्तमादिजन्मनि साम्यं यस्य हीनवर्णस्य कर्मणा जीवति तत्समा-नजातिः । तद्यथा ब्राह्मणः शूद्रवृत्त्या जीवन् यदि पुत्रमुत्पादयति सोऽपि तयैव वृत्त्या जीवन् पुत्रान्तरमित्येवं परम्परायां सप्तमं शूद्र-मेव जनयति । वैश्यवृत्त्या जीवन् षष्ठे वैश्यम् । क्षत्रियवृत्त्या जीवन् पञ्चमे क्षत्रियम् । क्षत्रियोऽपि शूद्रवृत्त्या जीवन् षष्ठे शूद्रम् । वश्यै-

वृत्त्या जीवन् पञ्चमे वैश्यं, शूद्रवृत्त्या जीवन् तामपरित्यजन् पुत्रपरम्परया तदत्यागे पञ्चमे शूद्रं जनयति। पूर्ववच्चाधरोत्तरमपि वर्णसङ्करा अनुलोमाः प्रतिलोमाश्च दर्शिताः। तत्र मूर्द्धावसिक्त्यां क्षत्रियवैश्यशूद्रैरुत्पादिता अम्बष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेणोत्पादिता अधराः प्रतिलोमजा इत्यर्थः। एवं मूर्द्धावसिक्त्यम्बष्ठीनिषादीषु ब्राह्मणोत्पादिता माहिष्योग्र्योर्ब्राह्मणक्षत्रियाभ्यां करण्यां ब्राह्मणक्षत्रियवैश्यैरुत्पादिता उत्तरेऽनुलोमजा इत्यर्थः।

वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ।

वैश्यात्तु कः उपनयाभावादेव ब्राह्मणादिवृत्तिहीनतया शूद्रवृत्त्यैव जीवनश्चेति दोषाधिक्यादस्य पञ्चमे शूद्रताप्राप्त्योपनयनप्राप्त्यभावात्। एवमेवंविधस्य क्षत्रियस्य तुर्ये एव शूद्रता, न हि शूद्रस्य प्रायश्चित्तसहस्रैरप्युपनयनार्हता भवति। न हि शूद्रवृत्त्या जीवतो ब्राह्मणस्यापि सप्तममपत्यमुपनयनार्हमिति कस्यापि सम्मतम्। 'कर्मणां व्यत्यये साम्यम्' इत्यस्य तज्जातिधर्मप्राप्त्यर्थातिदेशरूपत्वात्। एतन्मूलकमेव कात्यायनेन ब्राह्मणविषये चतुर्थस्यैवोपनयनमुक्तन्न पञ्चमादीनाम्। एवञ्च तुल्यन्यायात् क्षत्रियस्य तादृशस्य तृतीयस्यैवोपनयनन्न चतुर्थादेः, वैश्यस्य द्वितीयस्यैव न तृतीयादेः। वस्तुतः क्षत्रियवैश्ययोः प्रथमव्रात्यपुत्रयोरपि नोपनयनार्हतेति प्रागुक्तम्। एतन्मूलकमेव हरदत्तेनापि पञ्चमादेः प्रायश्चित्तं नोक्तमित्युक्तं तदनर्हत्वादिति तदाशयः। एवं जातापत्यानां पितृपितामहप्रपितामहादीनामपि नोपनयनं, 'यस्य प्रपितामहादि' इत्यापस्तम्बोक्तेः 'पतितसावित्रीकाणामपत्ये' इति कात्यायनोक्तेश्च। किञ्चोपनयनं संस्कार आश्रमप्राप्तिद्वारं यथाधानं संस्कारो यज्ञद्वारम्। एवञ्च प्रागेव गृहस्थाश्रमप्राप्तौ तदनुष्ठानवैफल्यं तत्प्राप्याश्रमाभावादिति दिक्। 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्ययनञ्च' इति सूत्रान्तरम्। 'तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्ति' इति सूत्रम्।

तदित्थं व्याचक्षते केचित्—स चतुर्थस्य संस्कारः कथङ्कर्तव्यस्तत्रा-ह—तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा संस्कारं कुर्यादिति शेषः । संस्कार उपनयनं, तेषां पतितसावित्रीकाणां वंश्यानां त्रयाणां पुरुषाणां यान्यपत्यानि तेषां मध्ये यः संस्कारेप्सुः संस्कारं प्राप्तुकामः स व्रात्यस्तोमेनेष्ट्वा गुरुणाऽऽत्मानं संस्कुर्यादित्यर्थः ।

ननु व्रात्यस्तोमैर्यक्ष्यमाणः पृथगग्नीनाधीय यज्ञोपकरणानि चेष्ट्वा 'य एतेषामध्ययने नाभिक्रान्ततमः स्यादभिजनेन तदभावेऽपि भोगलाभेन तस्य गार्हपते दीक्षेरन् भक्षांश्चाऽनुभक्षयेयुः' इति छन्दोगगृह्ये उक्तत्वेनोपनयनात्प्राक् कथन्तत्राधिकारः । इष्ट्वा सम्पाद्य अभिक्रान्ततमोऽतिशयि उत्कृष्ट इति यावत् । भोगो धनम् । अत्यन्तं क्रूरकर्मा यस्तेषां स वा गृहपतिः' इति कात्यायनसूत्रे उक्ते व्रात्यस्तोमार्थमेवाऽऽधानेन पृथगग्नीनुत्पाद्य विद्यया धनेन कुलेन क्रूरकर्मणा चासम्पन्नस्य गृहपतेरग्निषु त्रयाणां त्रयाणां स्वाग्नीनिसान्निचाय्यङ्क्त्वा व्रात्यस्तोमदीक्षाङ्कुर्युः, इतरे च व्रात्यास्तु गृहपतेर्भक्षमनु सोमादि भक्षयेयुरिति तदर्थः । मानवेऽपि सूत्रे अग्नीनाधाय गृहपतेरग्निषु संयुज्य यजेरन्निति पूर्वोक्ताः पतितसावित्रीकाः व्रात्याः । अन्येऽपि द्विजातिकर्महीना विहिताकर्तारो निषिद्धकर्तारः क्रूरकर्माणो व्रात्याः।(?)एतद्धि ताण्डिब्राह्मणे स्पष्टम् । अयञ्च गणयज्ञो गणस्त्रयस्त्रिंशताम् । 'त्रयस्त्रिंशद्दाङ्प्राध्वर्यन्' इति ताण्डिश्रुतेः।(?) 'तेषां ते प्रत्येकं त्रयस्त्रिंशतं त्रयस्त्रिंशतं गा दक्षिणं हृद्यः ऋत्विगन्यः' (?)इति ताण्डिसूत्रम् । 'ता व्रात्यानन्ये ब्राह्मणा ऋत्विजो भूत्वा याजयेयुः' इति देवयाज्ञिकः । 'इमा गावो व्रात्येभ्यो देया येस्मा एतद्ददति तस्मिन्नेव मृजान्नवन्तीति साधारण्योक्तेः' (?)इति ताण्डिब्राह्मणभाष्यम् । एवञ्चान्ये व्रात्या एव। तत्र ऋत्विज इति लभ्यते तत्कथमस्मिन्ननुपनीतानामधिकार इति चेन्न, वचनादेव तेषामप्यधिकारात् । तथा च कात्यायनगृह्यकारिकाकृत्—

अथार्थस्यानधीतस्य स्यादाधानं तदर्थवत् ।

इति। इदमनुपेतस्याप्युपलक्षणं तदुपयोग्यध्ययनमपि तेषां भवति त्रिवर्षस्य पित्रादिक्रियोपयोगिमन्त्राध्ययनवत्। निषादस्य च अवकीर्णिनो गर्द्दभेज्यो लौकिके वैतानिकेषु सर्वमित्यधिकारे कात्यायनोक्तेरिति देवयाज्ञिकः। कर्कस्तु तेषां लौकिके शावे च व्रात्यस्तोमाद्या अपत्नीकस्यानधीतवेदस्याकृताधानस्यावकीर्णी पशुश्च तद्वदिति। षाष्ठन्यायेन वचनादधिकारो लौकिकाग्नौ च स इति वृद्धशङ्करभट्टाश्च। कात्यायनस्मृतावकीर्णिनो गर्द्दभेज्येति अनाहिताग्निकर्तृककर्मोपलक्षणमिति तदाशयः। युक्तश्चैतत् स्मृतेर्न्यायसिद्धार्थत्वलाभात्। ते च व्रात्यस्तोमाश्चत्वारस्तेषामितिकर्तव्यतास्तदधिकारिणश्च कात्यायनसूत्रछन्दोगसूत्रताण्डिब्राह्मणेषु स्पष्टाः। संस्कृतानामपि तेषां पूर्वं निषिद्धमध्ययनं पुनराह—'काममधीयीरन् व्यवहार्य्या भवन्ति' इति वचनादिति व्रात्यस्तोमेनेष्ट्वेत्यनुवर्तते। तेनैव पुनरिष्ट्वा कामं वेदमवेदमधीयीरन्नित्यर्थः। व्रात्यस्तोमेन पतिता अपि व्यवहार्या भवन्ति अध्यापनादियोग्या भवन्तीति वचनात् श्रुतेरित्यर्थः। 'एतेन पाप्मनो निधिमुच्यते' इति व्रात्यस्तोमं प्रक्रम्य ताण्डिब्राह्मणोक्तेः 'व्रात्यस्तोमेन यजेत पुनस्सवनमायाति' इति बौधायनगौतमादिधृतश्रुतेश्च। तपाशूतेषां तत ऊर्ध्वं भुञ्जीनापि चैतान् कामं याजयेत्' इति छान्दोगसूत्राच्चेति वदन्तस्तदयुक्तं याज्ञवल्क्येन प्रथमेऽतिक्रमे एव तदुक्तेः। अत एव विज्ञानेश्वरेण याज्ञवल्क्यमन्वादिवचांस्युदाहृत्य पित्रादीनामनुपेतत्वे त्वापस्तम्ब आहेत्युक्तम्। तस्मादापस्तम्बोक्तप्रायश्चित्तेनोपनयनसंस्कारः, अध्ययनाधिकार एव तु व्रात्यस्तोमेन। सूत्रार्थस्त्वेवं—तेषां पतितसावित्रीकापत्यानां मध्ये ये संस्कारेप्सवो वेदाध्ययनजसंस्कारप्राप्तिकामा इति। जातावेकवचनम्। व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् इत्यर्थः। शिष्टः प्राग्वदिति। इतरे तु सावित्रीपतितसंज्ञिकत्वं पतितसावित्रीकसंज्ञाकत्वं व्रात्यसंज्ञकत्वञ्च षोडशाद्यूर्ध्वमनाचरिताऽऽपस्तम्बोक्तव्रतानां जातोपनयनानामेव।

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।

सावित्रीपतिता व्रात्याः—

इति याज्ञवल्क्यवाक्ये अत ऊर्ध्वमापस्तम्बोक्तप्रायश्चित्तानुष्ठानं विना संस्कृता अपि ते व्रात्यस्तोमानुष्ठानं विना सावित्रीपतितसंज्ञा व्रात्यसंज्ञाश्चाऽत एव सर्वधर्मबहिष्कृता इत्यर्थः। सावित्रीपतिता इत्यस्य स्वकालात्पतिता सावित्री येषामित्यर्थः। आहिताग्न्यादित्वात्परनिपातः पतितशब्दस्य। अत एवार्थे पतितसावित्रीका इत्यपि साधु। अत एव मनुवाक्ये—

अत ऊर्ध्वं पतन्त्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या सर्वकर्मविगर्हिताः॥

इत्यत्र यथाकालमित्युक्तेः। तेनाऽयथाकालं संस्कृता इति लभ्यते। अत एव कथमप्युपनेत्रभावेन कालातिपातकृतव्रात्यताया निबन्धोदाहृते मनुविष्णुवाक्ये

येषां द्विजानां गायत्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन्कृच्छ्रान् यथाविध्युपनाययेत्॥

इत्यस्मिन् उभयत्रापि यथाविधीत्युक्तं तत्र, विधिश्च शास्त्रोक्तकालिकत्वरूपः पूर्वार्द्धे। तेनाकाले उक्तेत्यर्थलाभः। उत्तरार्द्धे यथाविधीत्यस्य पूर्वतनोपनयनस्याऽशास्त्रीयत्वात्। पुनर्मुख्योपनयनविध्युक्तप्रकारेणेत्यर्थः। अत एव 'यस्य पिता पितामह इत्यनुपतौ' इति सूत्रे इत्यनुपेतावित्युक्तमिति प्रकारे, उक्तकालिकत्वेन प्रकारेणानुपनीतावित्यर्थः। तेनाकाले षोडशाद्यूर्ध्वप्रकृतप्रायश्चित्तावुपेतौ इत्यर्थलाभः। अत्र सूत्रेऽतिक्रान्ते सावित्र्या ते ब्रह्महसंज्ञका इत्यर्थः। अत एव 'यस्य पिता पितामहादि' इति सूत्रे स्वयञ्च यथाकालमनुपेत इत्युज्ज्वलायां व्याख्यातम्। युक्तञ्चैतत्, अन्यथा त्रैवर्णिकस्य त्रयाणामाश्रमाणां क्रमिकत्वेन वेदाध्ययनफलकब्रह्मचर्याश्रमस्योपनयनं विना सम्भवेन तत्संस्कारं विना ब्राह्मणत्वाब्राह्मणत्वाद्यनभिव्यक्त्या विवाहासम्भवेन पुत्राद्युत्पत्तेरेवासंभवात्। यस्यां कस्याञ्चित्पुत्राद्युत्पत्तौ तु तत्र त्रै-

वर्णिकत्वसन्देह एव। अत एवोपनयनानन्तरं ब्रह्मचर्यं सर्वेषां समानमित्यापस्तम्बः। 'सर्वेषां गृहस्थवानप्रस्थयतीनां तं विना कस्याप्याश्रमस्याप्रवृत्तेः' इति हरदत्तः। बौधायनोऽपि—

नास्य कर्माणि कुर्वन्ति किञ्चिदामौञ्जबन्धनात्।
वृत्त्या शूद्रसमो ह्येष यावद्वेदैर्न जायते ॥

इति। अत एव—

वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥

इति याज्ञवल्क्येन ब्रह्मचर्याश्रमानन्तरमेव विवाह उक्तः। ब्रह्मचर्याश्रमपरिग्रहश्च उपनयनं विना नेति ततः प्राग्विवाहाप्रसक्तिः। अविप्लुतब्रह्मचर्यः अस्खलितब्रह्मचर्यः। तत्स्खलने तु तत्स्खलननिमित्तप्रायश्चित्तपूर्वमेव विवाहः। मनुरपि—

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥

तथा—

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः।
यथोक्तकारिणं विप्रं नयन्ति परमाङ्गतिम् ॥

इति। गृहस्थप्रभवत्वं तदुपाजीवित्वम्। अश्वस्तनवृत्त्यादेर्गृहस्थस्यापि गृहस्थोपजीवित्वाच्चतुर्णान्तद्विशेषणम्। त(?)वामस्ते येन गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति गार्हस्थ्योत्तरं ब्रह्मचर्याश्रमोक्तेर्विरोधः, तस्योद्देश्यमात्रे तात्पर्येण क्रमे तात्पर्याभावात्। अत एव तदग्रे तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीत्युक्तम्। तत्र यथोपदेशमित्यस्य मन्वाद्युक्तक्रमोपदेशमनतिक्रम्येत्यर्थः।

तथा च दक्षः—

त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते।
प्रातिलोम्येन यो याति न तस्मात्पापकृन्नरः॥

इति प्राह। त्रयाणामिति ब्रह्मचर्योत्तरेषाङ्ग्रहणम्। ब्रह्मचर्यस्तु सर्वेषां समानत्वेनेत्यावश्यकत्वान्न ग्रहणम्। यद्वा त्रयाणां ब्रह्मचारिगृहस्थवानप्रस्थानामानुलोम्यं क्रम एव लगतु पूर्वपूर्वानुष्ठानं विनोत्तरोत्तरोनुष्ठानम्। तदाह-'प्रातिलोम्यन्न विद्यते'इति। चतुर्थस्य संन्यासस्य तु न नियमः। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति जाबालश्रुतेरित्यर्थः। कात्यायनवाक्येऽपि पतितसावित्रीकाणामपत्ये संस्कार उपनयनं भवति आपस्तम्बोक्तं प्रायश्चित्तपूर्वकम्। नाध्यापनन्तु इत्यर्थः। एकद्विपुरुषपतितसावित्रीकविषये तदीयस्यैवाऽनुष्ठेयत्वात्। तेषां मध्ये यः कश्चिन्माणवको वेदाध्ययनकृतसंस्कारं प्राप्तमिच्छुर्भवति। जातावेकवचनम्। 'ते व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्रात्यस्तोमयष्टारो व्यवहार्य्या भवन्ति' इति वचनात् श्रुतेरित्यर्थः। यस्य तूपनयनमेव नास्ति तस्य कदाचिदुपनीतत्वभ्रमेण विवाहेऽपि तदपत्ये न प्रायश्चित्तप्रवृत्तिर्नापि संस्कारः त्रैवर्णिकत्वहानेः, असंस्कृतमातापितृजत्वात्। किञ्च 'व्यत्यये कर्मणां साम्यम्' इति सकलब्राह्मणसंस्कारवतां वृत्तिमात्रेण समस्य शूद्रतोक्ता। तेन न्यायेनासंस्कृतजन्यस्य द्वितीयस्यैव शूद्रवृत्तिर्युक्ता। अत एव मनुना व्रात्योत्पन्नस्य प्रतिलोमसङ्करेषु कथनं विना प्रायश्चित्तम्। अतिक्रान्ते काले उपनयनवतां सर्वधर्मबहिष्कृता इति स्मृत्या सकलद्विजातिकर्महान्या शूद्रवृत्तेरेव प्राप्त्या च पञ्चमस्य शूद्रतैव। एतन्मूलकमेव कात्यायनापस्तम्बाभ्यां चतुर्थस्यैवोपनयनमुक्तं न पञ्चमादीनामित्याहुः। एवञ्चेदृशाविप्राणामप्युपनयनाभावस्सिद्धः। अत एव 'ऐन्द्राग्नं पुनरुत्सृष्टमालभेत त्रिपुरुषा सोमपीथिनः आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' इति श्रुतिश्चतुर्थपुरुषस्यैव प्रायश्चित्तेन

सोमपानमाह न पञ्चमादेरधिकप्रायश्चित्तानुक्तेः। गोभिलोऽपि—

सोमेन यक्ष्यमाणस्य यस्य पित्रादयस्त्रयः।
नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमकः॥
आलभेत स ऐन्द्राग्नमवशीर्णगवं पशुम्।
यस्य वेदश्च वेदी च विच्छेद्येते त्रिपूरुषम्॥
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः।
आलभेताश्विनं धूम्रललामं स्तवजं पशुम्॥

इति। अत्र दुर्ब्राह्मण इति ब्राह्मणपदोपादानादीदृशान्यवर्णस्य सोमाभाव एवेति बोधितः। कार्ष्णाजिनिः—

अनाहिताग्नौ पित्रादौ यक्ष्यमाणः सुतो यदि।
स हि व्रात्येन पशुना यजेत्तन्निष्कतामयायतु(?)॥

इति। तत्र पित्रादावित्यस्य पितृपितामहप्रपितामहेष्वित्यर्थः। अधिकृतस्यानाहिताग्नित्वे गोवधोक्तव्रतचतुष्टयं वत्सरादूर्ध्वमापदि शक्त्यपेक्षया योज्यमाना यदि मानवं त्रैमासिकमिति मिताक्षरा। वत्सरादर्वाक्तु कार्ष्णाजिनिः—

काले त्वाधाय कर्माणि कुर्याद्विप्रो विधानतः।
तदकुर्वंस्त्रिरात्रेण मासि मासि विशुध्यति॥

तथा—

कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनम्।
चान्द्रायणश्चरेद्वर्षं प्रतिमासमहोपि च॥

इति। द्विपुरुषाः सोमपीथीनोप्यैन्द्राग्न एवोक्तः कात्यायनेन। 'ऐन्द्राग्नमपुनरुत्सृष्टमालभ्य द्विपुरुषाः सोमपीथिनः' इति। द्विपुरुषाः सोमपीथिनो यजमानस्य तमालभ्य सोमो भवतीत्यर्थस्तथाशाखान्तरे श्रवणात् इति व्याख्यातारः। यस्य पिता पितामहो वा सोमपीथी स ऐन्द्राग्नमिति शाखान्तरे पाठात्। एकपुरुषाः सोमपीथिनोप्ययन-

श्चैवमुत्तरोत्तरं प्रायश्चित्ताधिकार्यादागमिष्यति तदा त्रेतापरिग्रहः ।

सन्न्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ।

इति । यावद्वर्णस्य व्रात्यतान्यायेनात्रावश्यकत्वादिदमनुचितमिति वाच्यम् । न च पुरुषीयसोमपानाभावप्रयुक्तस्मार्तप्रायश्चित्तेन सहाऽस्यानुष्ठानेनादोषात् । एवञ्च पितर्यसोमपे यत्तदधिकं पितामहे तादृशे तदधिकं च प्रपितामहे तादृशे इति विशेषात् तस्य च व्रात्यताविषये आपस्तम्बोक्तवत् कल्पना द्रष्टव्या । यथा च शुद्धिः 'पूतो मेध्यो विपाप्मा' इति बौधायनवचनेनाऽपतनीयानां पतनीयानां वा कर्मणां स्मार्तप्रायश्चित्तं कृत्वा कूष्माण्डीहोमः कार्य इति श्रौतसर्वस्वादावुक्तम् । तद्वत्स्मार्तप्रायश्चित्तेन यथावदाचरितेन शुद्धोऽप्यात्मानमपूतं मन्यते स कूष्माण्डीहोमैः पूतः । अत एव विपाप्मा मेध्यो यज्ञार्हस्तदधिकारीति तदर्थः । पित्रादिदोषेणोत्तरोत्तरं पुत्रस्याप्यधिकदोषवज्ञाया(?) व्रात्यतासूत्रे आपस्तम्बेनोक्तत्वात् ।

देशं कालं वयः शक्तिं पापञ्चापेक्ष्य यत्नतः ।

प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ॥

इति याज्ञवल्क्योक्तेः । श्रौतस्मार्तत्यागवेदत्यागयोरुपपातकत्वेऽपि 'उपपातकमभ्यस्तं महापातकवद्भवेत्' इति स्मृत्याऽऽत्यन्तिकस्य तस्य पतनहेतुत्वात् । अस्तु वा तत्र यथाकथञ्चित् सर्वथा चतुष्पञ्च पुरुषाः सोमपीथिनः । चतुष्पञ्चपुरुषं वेदमुच्छेदवन्तो दुर्ब्राह्मणस्य वा तत्र यथाधानादिसंस्कार इति सिद्धम् । तन्न्यायेन चतुर्थस्यैवोपनयनानुष्ठानं, न पञ्चमादेरित्यभिप्रायेणैव कात्यायनीयापस्तम्बाभ्यां तथोक्तम् । संप्रत्यग्निहोत्राद्यननुष्ठाननिबन्धनव्रात्यता तु नास्ति । तथा च संन्यासपद्धतौ व्यासः—

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ।

कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥

सन्न्यासश्च न कर्तव्यो ब्राह्मणेन विजानाता ।

इति ।

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
अग्निहोत्रञ्च सन्न्यासं तावत्कुर्यात्कलौ युगे ॥

इति देवलाच्च । अत्र वर्णविभागो नाम सङ्करेभ्यो वर्णानां पृथक्करणम् । न च तदधुनास्ति नापि वेदस्य नियमाध्यापनरूपाप्रकर्षेण वृत्तिरस्ति अन्यस्य वर्णविभागपदार्थस्य दुर्वचत्वात् । क्षत्रियाणां सर्वथाऽभावेन तद्घटिताविभागासम्भवात् । भारते वनपर्वणि—

नाशुचिर्नाप्यनिर्णिक्तपादो
नाब्रह्मविज्जुहुयान्नाविपश्चित् ।
बुभुत्सवः शुचिकामा हि देवा
नाश्रद्दधानाद्धि हविर्जुषन्ति ॥
नाश्रोत्रियं देवहव्ये नियुज्या-
न्मोघं पुरा सिञ्चति तादृशो हि ।
अपूर्वमश्रोत्रियमाह तार्क्ष्य !
न वै तादृक् जुहुयादग्निहोत्रम् ॥

अनिर्णिक्तपादः अप्रक्षालितपाणिपादः अनाचान्तश्च । अब्रह्मवित् वेदं पठतोऽर्थतश्चाविद्वान् । अविपश्चिद्वेदादधिगतार्थस्यानुभवहीनः । अनेन तयोर्विहीनत्वं सूचितम् । बुभुत्सवः परिचितं ज्ञातुमिच्छवः । ऋत्विगप्येवंविध एवेत्याह नाश्रोत्रियमिति । देवहव्ये यज्ञादौ, मोघं निष्फलं, सिञ्चति जुहोति । पुरा शीलगोत्रादिज्ञानात्प्राक् । अश्रोत्रियपदार्थमाह अपूर्वमश्रोत्रियमिति । अपूर्वमज्ञातकुलशीलमाह-वेद इति शेषः । ईदृशस्यैवाग्निहोत्राधिकारो नान्यस्येति भावः ।

अर्द्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रिता ॥

इति लौगाक्षिवाक्ये पूर्वयुगानि द्वापरान्तानि तदाश्रितेत्यर्थः । कलावर्द्धाधानमेव तदपि चतुःशताधिकचतुःसहस्रवर्षपर्यन्तम् ।

श्राद्धं प्रकृत्य—

त्रिषु वर्णेषु कर्तव्यं पाकभोजनमेव तु ।
शुश्रूषामभिपन्नानां शूद्राणाञ्च वरानने ॥

इति पाकश्राद्धमुक्तम् । तच्छूद्रायां द्विजोत्पन्नविषयमिति केचित् । युक्तन्तु तस्मिन् शूद्रत्वाभावात् । 'शूद्राश्चपाककर्तारः' इत्यापस्तम्बोक्तम् । यत्तु पाककर्तृगोपालादिसच्छूद्रपरमिति, तच्च कलियुगातिरिक्तयुगविषयमिति । यत्तु भविष्यपुराणे—

आवाहनादि कर्तव्यं तथा शूद्रेण तच्छृणु ।
देवानां देवनाम्ना तु पितॄणां नामगोत्रतः ॥
पिण्डांश्च निर्वपेद्धारनामतो गोत्रतस्तथा ।

इति शूद्राणाङ्काश्यपगोत्रमुक्तम् । 'तस्मादाहुः सर्वाः प्रजाः काश्यपः' इति सामान्यदर्शनात्सर्वशूद्राणां काश्यपं गोत्रम् । तस्य च श्राद्धे एवोत्कीर्तनं नान्यत्र 'यावद्वचनं वाचानिकम्' इति न्यायात् । अन्यथा सर्वशूद्राणामेकगोत्रत्वादविवाहः प्रसज्येतेति । अन्ये तु मुख्याशूद्रस्य (?) सत्यर्थान्यतमापत्यत्वाभावाच्छूद्रायामुत्पन्नः पारशवो गृह्यत इत्याहुः । युक्तन्तु ब्राह्मणेनोत्पादितः पारशवस्तेन ऊढावदुत्पन्नेन पुनः शूद्रोढेत्येवं सप्तमे शूद्रो भवति । तस्य परम्परया सत्यर्थः । यतमापत्यत्वेन गोत्रसत्त्वात्तत्परमेवेति । वस्तुतस्तु 'तस्मादाहुः सर्वाः प्रजाः' इति तु यस्य नाम्ना ते गोत्रं तद्विषयमेवेति व्यासेनोक्तम् । यत्तु युगस्य पूर्वे पूर्वयुगे कलेः पूर्वभाग इति तन्न, पूर्वाणि च तानि युगानि चेति कर्मधारयस्यैवौचित्यात् । द्वापरकल्योः सन्धावेव स्मृतीनां प्रवृत्त्या तथार्थस्यैव युक्तत्वाच्चेत्यलं पल्लवितेन । (?) 'अरुकं दुरुकमिति य आह स गराशी' इति ताण्डिब्राह्मणम् ॥

इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृतो व्रात्यताप्रायश्चित्तनिर्णयः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

व्रात्यताप्रायश्चित्तनिर्णयः ।

अथ कलौ क्षत्रियपदव्यवहार्याणां दशविंशतिपुरुषपर्य्यन्तं स्मर्यमाणोपनयनाभावानां तदग्रेऽप्यस्मर्यमाणोपनयनानां संस्कारो न वेति सन्देहे निर्णयाय व्रात्यताप्रायश्चित्तनिर्णयः क्रियते।

तत्राऽऽपस्तम्बः—'आषोडशाद्ब्राह्मणस्य नात्यय आद्वाविंशात्क्षत्रियस्याच चतुर्विंशाद्वैश्यस्य'। आङभिविधौ। अत्ययोऽतिक्रमः, प्रकरणादुपनयनस्येति गम्यते। इदं चाऽष्टवर्षत्वादावपि ब्रह्मचर्यव्रतासमर्थान्प्रत्यनुकल्पविधानम्। यथा व्रतेषु समर्थः स्यात्तावत्कालं प्रतीक्षा। पूर्वमेव सामर्थ्ये सति अष्टवर्षाद्यतिक्रमे वक्ष्यमाणं प्रायश्चित्तं कात्यायनोक्तं वा 'कालातिक्रमे नियतवत्' इति। षोडशादूर्ध्वमपि किञ्चित्कालमसमर्थानां पश्चात्सामर्थ्ये प्रायश्चित्तं भवत्येव। तदाह—'अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्'। त्रैविद्यकं वेदत्रयसम्बन्धि। अग्निसेवाऽध्ययनगुरुशुश्रूषातिरिक्तं सर्वं ब्रह्मचारिधर्मं कुर्यात्। तत्र ऋतुमिति कालविधानं, तेन ऋत्वारम्भे प्रायश्चित्तारम्भः। एवञ्च प्रतिवेदमृतुमिति ऋतुत्रयं तत्। 'अथोपनयनं, ततः संवत्सरमुदकोपस्पर्शनम्'। उपनयनादारभ्य संवत्सरपर्यन्तं त्रिषवणं स्नानं पावमान्यादिभिरशक्तस्य यथाशक्ति। 'अथाध्याप्य'इति। अत्रैव वसिष्ठोक्तमुद्दालकव्रतं शङ्खोक्तं गोदानसहितं चान्द्रायणं द्रष्टव्यम्। एतयोः सपादनवधेनवः। एवं यममन्वाद्युक्तमपि। अत्रैव विषये ब्रह्मशक्तिकालाधिक्यन्यूनत्वालस्यदेशविप्लवोपनेत्रभावाविकृतत्वादिपर्यालोचनीयानि, तानि च मिताक्षरादौ स्पष्टानि। अथ 'यस्य पिता पितामह इत्यनुपेतौ

स्यातां ते ब्रह्महसंस्तुताः' । यस्य माणवकस्य जातावेकवचनम् । ते माणवकाः ब्रह्महण इत्येवं संस्तुताः कथिताः, तेन ब्रह्महसमीप इव तत्समीपेऽध्ययननिषेधः । 'तेषामभ्यागमनं भोजनं विवाहमिति वर्जयेत्' । अभ्यागमनं प्रत्युत्थानादि, स्वरक्षाद्यर्थं तत्समीपगमनं च । भोजनमुद्यतमपि त्याज्यं तस्याऽत्याज्यताया उक्तत्वेऽपि । विवाहश्च तादृशकन्याया अपि पुंसश्च वर्ज्यः । 'तेषामिच्छतां प्रायश्चित्तम्' । तेषां माणवकानाम् । इच्छतामित्यनेन बलात्कारो नेति सूचयति । 'यथा प्रथमेऽतिक्रमे ऋतुरेवं संवत्सरः' । प्रतिवेदं प्रतिपुरुषं च संवत्सर इत्यर्थः । एवं चैकैकस्य त्र्यब्दं वेदत्रयार्थं ब्रह्मचर्यं, पितर्येवाऽनुपनीतेऽब्दद्वयं, पितामहेऽपि तादृशे त्वब्दत्रयम् ॥

'अथोपनयनं, तत उदकोपस्पर्शनं, प्रतिपुरुषं सङ्ख्याय संवत्सरान्यावन्तोऽनुपेताः स्युः' । यदि पितैवाऽनुपेतस्ततः संवत्सरमेकम् । अथ पितामहोऽपि ततो द्वौ । अथ स्वयमपि यथाकालमनुपेतस्तदा संवत्सरानिति । एतद्व्रतविषयेऽपि योज्यम् । तत्र स्नाने मन्त्रा 'यदन्तिके' इत्यादि सप्त पावमान्यः । 'येन देवाः पवित्रेण' इति यज्ञपवित्रम् । 'कया नश्चित्र' इति सामपवित्रम् । 'हंसः शुचिषदि'त्याङ्गिरसमिति । व्याहृतय एव ताः । अथाध्याप्यः । अत्र यस्येत्युक्तेर्माणवकस्यैव प्रायश्चित्तपूर्वमुपनयनादि न पित्रादेरिति बोध्यम् ॥

'अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं ते श्मशानसंस्तुतास्तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधोपदेशनं नाध्यापनम्' इति । एतच्चेत्थं व्याख्यातमुज्ज्वलायां हरदत्तेन–प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं यथाकालमनुपेतास्ते श्मशानसदृशा इति तत्सन्निधौ नाध्ययनम । अत्रापि प्रतिपुरुषं सङ्ख्याय संवत्सरानिति द्रष्टव्यमिति । गृहमेधो गार्ह-

स्थ्यम्। कृत्स्नस्य वेदस्य नाध्यापनं गृह्यमन्त्राणां तु भवतीति। अनेन चैकैकस्य प्रतिवेदं द्वादशाब्दमिति षट्त्रिंशदब्दमिति द्रष्टव्यम्। 'ततो यो निवर्तेते तस्य संस्कारो यथा प्रथमेतिक्रमे त्रैविद्यकं ब्रह्मचर्यं चरेत्'। अथाध्याप्य इत्यर्थः। 'तत ऊर्ध्वं प्रकृतिवत्'। यथाप्राप्तमुपनयनं कार्यमित्यर्थः। एवमेवैषा स्मृतिः पराशरीये माधवेन व्याख्याता। यत्तु 'यस्य प्रपितामहादी'ति सूत्रे प्रपितामहादीनामिति पाठकल्पनं तत्त्वसङ्गतमेव हरदत्तमाधवादिविरोधात्, अध्येतृसम्प्रदायविरोधाच्च। यत्तु केनचित् ग्रन्थकृता तदनुसारिणाऽन्येन च ग्रन्थकृता प्रपितामहादारभ्य विनिगमनाविरहेण।पूर्व अर्वाञ्चश्चेति पूर्वे उत्तरे चेति व्याख्यातम्। अत एवोज्ज्वलायां हरदत्तेनोक्तं—'यस्य प्रपितामहस्य पितुरारभ्य नाऽनुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तमित्युक्त्वा धर्मशास्त्रैस्तु विहितमेवं पूर्वेषु याति'। तस्यार्थः-धर्मशास्त्रैस्तच्छास्त्रनिबन्धकारैरुक्तरीत्या स्मृतिं व्याख्याय तत्रापि प्रायश्चितं विहितमिति तत्तुच्छं, कात्यायनस्मृतिविरोधात्। तथा हि तेन-'आषोडशाद्ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्य, अत ऊर्ध्वं पतितसावित्रीका भवन्ति, नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः' इति। अत ऊर्ध्वमित्यस्य मन्त्रादिविहितप्रायश्चित्तपूर्वकमुपनयनाभाव इति शेषः। पतितसावित्रिका इत्यस्य ते तदपत्यपरम्परा च। तथाऽनुपेता इति शेषः। तादृशेषु सर्वकर्मनिषेधो नैनामित्यादिनोक्तः। तत्रोपनयननिषेधकालाभावप्राप्तोपनयनाभावस्यैवानुवादः, अष्टवर्षादिकालाभावेन तत्राप्राप्तेः। 'अष्टवर्षं ब्राह्मणमुपनयीत' इति श्रुतिवाक्यमिति सुदर्शनकृते आपस्तम्बगृह्यभाष्ये स्पष्टम्। कैश्चिदतिक्रान्तनिषेधैरुपनयनादावपि न तदुत्तराः क्रियाः कार्या इत्यर्थः, नैनानित्यादिना बहुदोषश्रवणात्। अनेकपुरुषाणां पतितसावित्रीकाविषयो निषेधः सर्वथा त्याज्यत्वबोधनायोपनयननिषेधेन सिद्धेऽप्यन्यकथनम्। 'तेषामभ्यागमनं विवाहं वर्जये'दित्यापस्तम्बे

स्मृतौ व्यवहारपदार्थः । तत आह 'कालातिक्रमे नियतवत्' । गर्भाधानाद्युपनयनान्तकर्मणां कालातिक्रमे नियतवत् नित्यवत् नित्येषु यद्विहितं तद्वदनादिष्टं प्रायश्चित्तं महाव्याहृतिहोमाख्यं सर्वप्रायश्चित्तरूपं कृत्वा गर्भाधानाद्युपनयनान्तानि कार्याणि । इदं चाऽष्टवर्षादिरूपमुख्योपनयनकालातिक्रमे बोध्यमत्यल्पत्वात् । षोडशादिरूपगौणकालस्याऽप्यत्यये तु-'अतिक्रान्ते सावित्र्याः काले' इत्यादिनापस्तम्बाद्युक्तं द्रष्टव्यम् ॥

अथाऽनेकपुरुषपतितसावित्रीकविषये प्रतिप्रसवमाह-'त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च' । एषामपत्ये चतुर्थे संस्कार उपनयनं भवति अध्यापनं तु नेति तदर्थः । चस्त्वर्थे । प्रपितामहमारभ्य चतुर्णां पतितसावित्रीकत्वे तदपत्ये तु न संस्कारः पूर्वनिषेधादिति हरिहरः । 'यस्य प्रपितामहादी'ति सूत्रे 'उपनयनं नाध्याप्य' इत्यापस्तम्बोक्त्याऽस्याऽयमेवार्थ उचितः । यत्तु कात्यायनसूत्रव्याख्यात्रा गदाधरेण तेषामपत्ये संस्कारो नाध्यापनं च नेत्येतत्सूत्रं व्याख्यातं हरिहरस्तु मृग्य इत्युक्तं च, तदेतेन परास्तम् , अन्यथा पूर्वनिषेधेनैव सिद्धेरस्य वैयर्थ्यापत्तेः । स च बहुदोषश्रवणादापस्तम्बैकवाक्यतया बहुपुरुषं यावत् पतितसावित्रीकविषयक एव, स नाऽऽद्यातिक्रमविषय इत्युक्तम् । एवं चैतदेकवाक्यतया 'यस्य प्रपितामहादी'त्यापस्तम्बस्मृतिरपि त्रिपुरुषं पतितसावित्रीकविषयैव । अत एव धर्मशास्त्रैस्तु विहितेऽत्र वाक्ये हरदत्तेन तु नाऽरुचिर्बोधिता । तद्बीजं तूक्तमेव । स्मृत्योरेकमूलकल्पनालाघवानुरोधेनैकार्थत्वे सम्भवति भिन्नार्थत्वमन्याय्यमिति सर्वशास्त्रनिबन्धकृतां सिद्धान्तात् । अभ्युपेत्यापि ब्रूमः—पूर्वे इत्यत्र 'कपिञ्जलाधिकरण'न्यायेन त्रयाणामेव ग्रहणापत्तौ सप्तमस्योपनयनलाभे तदूर्ध्वस्याऽष्टमादेरुपनयने मानाभावः । किं चाऽयं प्रायश्चित्तविधिर्येषां वंशे उपनयनं स्मर्यते तद्विषय एव, न तु तदस्मरणे । 'यस्य प्रपितामहादी'ति सूत्रस्थे 'पावमान्यादिभिः स्नान'-

मिति प्रतीके 'प्रतिपुरुषं सङ्ख्याय संवत्सरा'नित्येतदत्रापि द्रष्टव्यमिति हरदत्तोक्तेः। तदस्मरणे तद्गणनासम्भवादिति दिक् ॥

स च चतुर्थस्य संस्कारः कथं कर्तव्यस्तत्राह कात्यायनः—'तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा'। संस्कारं कुर्यादिति शेषः। तेषां त्रिपुरुषं यावत् पतितसावित्रीकाणां यान्यपत्यानि तेषां मध्ये यः संस्कारेप्सुः संस्कारं प्राप्तुकामः स व्रात्यस्तोमेनोपनेतृद्वारा इष्ट्वा गुरुद्वाराऽऽत्मानं संस्कुर्यादित्यर्थः । तेषां निषिद्धमप्यध्ययनं पुनराह—'काममधीयीरन् व्यवहार्या भवन्तीति वचना'दिति । व्रात्यस्तोमेनेष्ट्वाऽधीयीरन् वेदमिति शेषः । व्रात्यस्तोमेन पतिता अपि व्यवहार्या भवन्ति अध्ययनादिकर्मयोग्या भवन्ति इति वचनात् श्रुतेरित्यर्थः। तथा च गौतमीये—'यथैतदयाज्ययाजनं, अभक्ष्यभक्षणं, अवन्द्यवन्दनं, शिष्टस्याऽक्रिया, प्रतिषिद्धसेवन'मिति पापान्युक्त्वा प्रायश्चित्तं कुर्यात्। 'न कुर्यादिति मीमांसते' न कुर्यादित्याहुः । न हि कर्म क्षीयते कुर्यादित्यपरे। पुनः स्तोमेनेष्ट्वा सवनमायान्तीति विज्ञायते । 'व्रात्यस्तोमैश्चेष्ट्वा तरति सर्वं पाप्मान'मिति पूर्वसूत्रे नाध्यापनं चेत्युक्तेरापस्तम्बसूत्रेऽपि' यस्य प्रपितामहादी'ति उपक्रम्य 'उपनयनं नाध्यापन'मित्यापस्तम्बोक्तेश्च संस्कारमात्रेणाऽध्ययनस्याऽप्युक्तत्वात् । व्रात्यस्तोमेनेष्ट्वेत्यनुवृत्त्या वाक्यभेदेन व्याख्यातः ईदृशे विषये व्रात्यस्तोमापस्तम्बोक्तप्रायश्चित्तयोर्विकल्पो बोध्यः। अत्रत्यं हरिहरभाष्यमपि पोषपूरणयैव व्याख्येयम्। एवं च तादृशक्षत्रियाणामुपनयनाभावः सिद्धः ॥

वस्तुतः कलावुपनयनयोग्यक्षत्रियाभाव एव । तथा च चतुर्थेऽशे विष्णुपुराणे—

यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनम् ।
एतद्वर्षसहस्रं तु कलौ पञ्चदशोत्तरम् ॥

महानन्दिनः शूद्रायामुत्पन्नो नन्दाख्यः सकलक्षत्रजात्यन्तकारी, ततःप्रभृति शूद्रा भूमिपाला भविष्यन्ति ।

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुसम्भवः ।
महायोगबलोपेतौ कलापग्रामसंश्रयौ ॥
कृते युगे समागत्य क्षत्रप्रावर्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ ॥
एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा ।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते ॥

अत्र त्रीणि भुज्यते इत्यनेन तुर्ये कलौ पञ्चदशोत्तरसहस्ररूपाल्पकालं तत्सत्ता सूच्यते ।

कलौ तु बीजभूतास्ते केचित्तिष्ठन्ति भूतले ।
यथैव देवापिमरू सांप्रतं समवस्थितौ ॥ इति ।
ब्रह्मक्षत्रस्य या योनिर्वंशो राजर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥
इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति । इति च ।

इमौ च नन्दराज्यात् पञ्चशतवर्षतः पूर्वमित्यपि तत्रैव स्पष्टमित्यमत्सरैर्धर्मविरोधं परिहाय विचार्यमित्यलम् ॥

इति व्रात्यताप्रायश्चित्तनिर्णयः समाप्तः ॥

श्रीगणेशाय नमः ।

व्रात्यताशुद्धिसङ्ग्रहः ।

व्रात्यताशुद्धिरखिलस्मृतिवाचां विवेचनात् ।
सर्वविद्वज्जनमुदे यथामति निरूप्यते ॥ १ ॥

'आषोडशाद्वर्षात् ब्राह्मणस्य नातीतः कालो भवत्याद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्याऽत ऊर्ध्वं पतितसावित्रीका भवन्ति नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः । कालातिक्रमे नियतवत्त्रिपुरुषं पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनञ्च । तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्तीति वचनात्' इति पारस्करसूत्रे ॥

अथापस्तम्बधर्मसूत्रम्—'आषोडशाद्ब्राह्मणस्यानात्यय आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्य यथा व्रतेषु समर्थः स्यात्तानि वक्ष्यामः' । अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यञ्चरेत् । अथोपनयनम् । ततः संवत्सरमुदकोपस्पर्शनम् । अथाध्याप्यः । अथ यस्य पिता पितामह इत्यनुपेतौ स्यातान्ते ब्रह्महसंस्तुताः, तेषामभ्यागमनम्भोजनं विवाहमिति वर्जयेत् । तेषामिच्छताम्प्रायश्चितम् । यथा प्रथमेऽतिक्रमे ऋतुरेवं वत्सरः । अथोपनयनम् । तत उदकोपस्पर्शनं प्रतिपुरुषं संख्याय संवत्सरान् यावन्तोऽनुपेताः स्युः सप्तभिः पावमानीभिः 'यदन्ति यच्च दूरके' इत्येताभिर्यजुःपवित्रेण सामपवित्रेणाङ्गिरसेनेति । अपि वा व्याहृतिभिः । अथाध्याप्यः । अथ यस्य प्रपितामहादीनां नाऽनुस्मर्येत उपनयनं ते श्मशानसंस्तुताः । तेषामभ्यागमनम्भोजनं विवाहमिति च वर्जयेत् । तेषामिच्छताम्प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यञ्चरेत् । अथोपनयनम् । तत उदकोपस्पर्शनं पावमान्या-

दिभिः । अथ गृहमेधोपदेशनं नाध्यापनम्, ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे । तत ऊर्ध्वं प्रकृतिवदिति ॥

याज्ञवल्क्ये प्रथमेऽध्याये ब्रह्मचर्यप्रकरणे—

आषोडशादाद्वाविंशाच्चतुर्विंशाच्च वत्सरात् ।
ब्रह्मक्षत्रविशाङ्काल औपनायनिकः स्मृतः ॥
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥ इति ।

मनौ द्वितीयाध्याये—

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ।
आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥
नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ।
ब्राह्मान् यौनांश्च सम्बन्धानाचरेद्ब्राह्मणः सह ॥ इति ।

यमः—

सावित्री पतिता यस्य दश वर्षाणि पञ्च च ।
सशिखं वपनङ्कृत्वा व्रतङ्कुर्यात्समाहितः ॥
एकविंशतिरात्रञ्च पिबेत्प्रसृतियावकम् ।
हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च च ॥
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् । इति ।

वसिष्ठः—'पतितसावित्रीक उद्दालकव्रतञ्चरेत् । द्वौ मासौ यावकेन वर्तयेत्, मासं पयसा, पक्षमामिक्षया, अष्टरात्रं घृतेन, षड्रात्रमयाचितेन, त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेत् । अश्वमेधावभृथङ्गच्छेत् । व्रात्यस्तोमेन वा यजेद्वा यजेत्' इति ॥

मनावेकादशे—

येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥ इति ।

अत्राऽषोडशादित्याङ् यदि मर्यादायान्तर्हि षोडशमारभ्य प-तितसावित्रीकत्वं, यद्यभिविधौ तर्हि सप्तदशमारभ्य तत्संपद्यते। तत्र यमवचने 'दश वर्षाणि पञ्च च' इति निर्देशात्-आषोडशादित्या-दौ मर्यादैवाङोच्यते नाभिविधिरिति केचित्। परे तु यमवचनमिदन्न पतितसावित्रीकप्रायश्चित्तपरं येनाऽऽषोडशादित्यादावाङ् मर्यादायां स्यात्। किन्तु यथाकालमुपनीतस्य तदूर्ध्वं गृहितामापन्नस्यानापन्न-स्य वा दैवान्मानुषाद्वाऽपराधात् पञ्चदशवर्षपर्यन्तं सावित्री पतिता यस्य सन्ध्यावन्दनादित्यागो यस्य तस्येदं यावकव्रतं पुनरुपनयनञ्च। अत्र पतितसावित्रीक इति समासानादरात्। 'अष्टवर्षं ब्राह्मणमुपन-यीत, एकादशे राजन्यम्, द्वादशे वैश्यम्' इति निर्देशात्। मुख्यका-लाद्द्विगुणकालपर्यन्तङ्गौणकालत्वनिरूपणात्। तत्राऽत्रध्याङ एव प्र-तीतेर्मर्यादार्थकत्वाप्रतीतेश्च। तथा च षोडशादिवर्षोर्ध्वं पतितसा-वित्रीकत्वं भवतीत्यर्थः। नैनानिति निन्दार्थवादाः। कालातिक्रम इत्यादि प्रायश्चित्तपरम्। कालातिक्रमे सञ्जातोपनयनसंस्कारस्य गृ-हिणोऽगृहिणो वा सन्ध्यावन्दनादीनां बहुकालमतिक्रमे सति नि-यतवत्स्मृतिषु नियतं नियमितं प्रायश्चित्तमिव कृतेऽपि प्रायश्चित्त-म्। तत्र यमवचनं पञ्चदशवर्षपर्यन्तं सावित्र्या उपनयनात्प्र-वृत्ताया लोपे यावकव्रतोपनयनपरम्, तथैवेहापि पतितसा-वित्रीकस्य बालकस्योपनयनं यावकव्रतपूर्वकं विज्ञेयम्। एवं पि-तर्यनुपनयने त्रिगुणं यावकव्रतङ्कार्यम्। पितामहस्याप्यनुपनयने ष-ड्गुणं यावकव्रतङ्कार्यम्। केवलयावकव्रतस्य बालकगतस्यैकर्तुब्रह्मचर्य-समत्वात्। तस्य चैकर्तुब्रह्मचर्यस्य 'यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इत्युपक्रम्य 'यथा प्रथमे ऋतुरेवं संवत्सरः' इति एकर्तुव्रतस्य षाड्गुण्यविधानेन यावकव्रतस्यापि षाड्गुण्यौचित्यात्। एवञ्च कालाति-क्रम इति सूत्रं बालकस्यैकस्य तस्य पितुश्च द्वयोस्तयोः पितामहस्य च त्रयाणां पतितसावित्रीकत्वप्रायश्चित्तपरम्। यद्यथाऽऽषोडशादि-

त्युपक्रम्याऽत ऊर्ध्वमित्यनेन बालकस्यैव पतितसावित्रीकत्वमित्युक्त्वा कालातिक्रम इति सूत्रं पठितं बालकस्यैव पतितसावित्रीकत्वप्रायश्चित्तपरं भवितुमर्हति, तथापि त्रिपुरुषं पतितसावित्रीकाणामिति त्रिपुरुषपतितसावित्रीकापत्यप्रायश्चित्तविधानेन प्रथमप्रायाश्चित्तं पुरुषत्रयसाधारणत्वेनैव नेतुमुचितमिति दिक् ॥

अपरे तु कालातिक्रमे नियतवत्प्रियते नित्ये कालातिक्रमे व्याहृतिहोमः प्रसिद्धस्तद्वचनं तुल्यं व्याहृतिहोमात्मकं प्रायश्चित्तम्भवति । तच्च प्रायश्चित्तमेकतुंब्रह्मचर्योद्दालकव्रतयावकव्रतसाम्यसम्पत्त्यै उद्दालकव्रतप्रत्याम्नायत्वेन चतुर्दशप्राजापत्यनिर्णयात् । तथैव सहस्रव्याहृतितिलहोमस्यैकप्राजापत्यतुल्यत्वाच्चतुर्दशसहस्रव्याहृतिहोमः कालातिक्रमे बालकस्य प्रायश्चित्तरूप इति पितृपितामहयोरपि पतितसावित्रीकत्वे चतुर्दशषड्गुणाश्चतुरशीतिसहस्रव्याहृतिहोमाः प्रायश्चित्तरूपा बालकपित्रोरुभयोरेव पतितसावित्रीकत्वे द्विचत्वारिंशत्सहस्रव्याहृतिहोमा भवेयुः प्रायश्चित्तरूपा इति विवेचयाम्बभूवुः ॥

याज्ञवल्क्ये—

उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा ।
पयसा वापि मासेन पराकेणाऽथवा पुनः ॥

मनौ—

एतदेव व्रतङ्कुर्युरुपपातकिनो द्विजाः ।
अवकीर्णिवर्जं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥

एवङ्गोवधप्रायश्चित्तेनेत्यर्थः । पतितसावित्रीकताया उपपातकरूपत्वेन स्मर्तृभिः पापगणनादुपपातकशोधकानि यानि कर्माणि प्रसिद्धानि तानि सर्वाण्यपि यथायोगं सङ्ग्रहीतुमेव कालातिक्रमे योग्यतयोपपातके कालातिक्रमोपलक्षिते व्रात्यत्वे नियतवन्नियतेनोपपातकनिवृत्तिनियतेन प्रायश्चित्तेन तुल्यं प्रायश्चित्तं विधेयमिति बहुविधवैकल्पिकप्रायश्चित्तपरिग्रहाय 'कालातिक्रमे नियतवत्' इति सामान्यात्मना सूत्रं रचितमिति दिक् ॥

अथ कालातिक्रमे नियतवदिति पुरुषत्रयपर्यन्तमपि वृद्धिक्रमेण पतितसावित्रीकत्वे प्रायश्चित्तपरम्। तत्प्रायश्चित्तं वृद्धिमत् त्रिपुरुषादूर्ध्वं पतितसावित्रीकत्वे भवेदपि, परन्तु तेन प्रायश्चित्तेनोपनयनसंस्कारेऽपि नैवाध्यापनमधिकप्रायश्चित्तं विना, किन्तु व्रात्यस्तोमेनेत्याह-त्रिपुरुषमिति। संस्कारो नोपनयनलक्षणोऽध्यापनञ्च नेत्यन्वयः। तेषां पुरुषाणां त्रयाणां पुत्रस्य च चतुर्णां मध्ये कोऽपि जनः व्रात्यस्तोमेनेष्ट्वा संस्कारेप्सुरुपनयनसंस्कारेप्सुर्भवेत्। व्रात्यस्तोमं विना नियतवदिति प्रायश्चित्तेन वार्द्धितेन संस्कारेऽप्यधिकप्रायश्चित्तं विना नाध्यापनेच्छुर्भवेदिति यावत्। तत्र प्रमाणमाह—'काममधीयीरन् व्यवहार्या भवन्तीति वचनात्' इति। काममधीयीरन्नित्यर्थपरं ताण्ड्यब्राह्मणवचनात्। ताण्ड्यब्राह्मणे ईदृग्वचनाभावेनैतदर्थस्य तत्रार्थसिद्धत्वेनैतदर्थपरवचनादित्येव व्याख्यातुमुचितत्वात्। 'तैरिष्ट्वा त्रैविद्यवृत्तिं समातिष्ठेयुः, तेषां तत ऊर्ध्वं भुञ्जीत याजयेच्चैनान्' इति छन्दोगसूत्रात्। 'व्रात्यस्तोमेनेष्ट्वा व्रात्यभावाद्विरमेयुर्व्यवहार्या भवन्ति' इति कात्यायनसूत्रात्। एवञ्च व्रात्यस्तोमोऽतिविशिष्टत्वात्प्रबलैनोनिबर्हको भवति प्रबलपातकनिवर्तकस्य क्षुद्रपातकनिवर्तकत्वं साहजिकमिति याज्ञवल्क्येन प्रथमादिव्रात्यतायामपि निवर्तकत्वेन व्रात्यस्तोमो निबद्धो 'व्रात्यस्तोमादृते क्रतो'रिति। व्रात्यस्तोमं विना सर्वधर्मबहिष्कृताः सावित्रीपतिता व्रात्याः। व्रात्यस्तोमे कृते सति सर्वधर्माधिकारिणो निष्पापाः शुद्धा इति तदाशयात्। अत्र त्रिपुरुषं पतितसावित्रीकापत्यत्वं व्रात्यस्तोमे निमित्तं तत्र त्रिपुरुषाधिकपतितसवित्रीकत्वेऽपि सहस्रे शतमितिवत्त्रिपुरुषपतितसावित्रीकापत्यत्वं भवेदेवेति चतुरादीनां पतितसावित्रीकत्वेऽपि व्रात्यस्तोमानुष्ठानं भवतीति 'ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आतृतीयात्सोमं न पिबेत्' इति वाक्यविचारावसरे निरूपयिष्यामः—इति पारस्करसूत्रयोजना॥

अथाऽऽपस्तम्बसूत्रयोजना वर्णविभागेन विहितमुपनयनकालमाह-

वर्षं ब्राह्मणमुपनयीतैकादशे राजन्यं द्वादशे वैश्यम्' इत्येवंलक्षणादूर्ध्वं मुख्यकालसमसङ्ख्याकं गौणकालं मनसि निधायाह—आषोडशादिति । यथेति । वक्ष्यमाणव्रतसामर्थ्यसम्पत्तिपर्यन्तमेव गौणोऽपि कालः प्रतीक्ष्यो नाऽधिकः । गौणकालेऽपि सामर्थ्योत्तरक्कालो नातिक्रमणीयः । अतिक्रमणे तु तदुचितं प्रायश्चित्तमपि विधेयमिति भावः । गौणकालस्य सर्वस्यापि उल्लङ्घने प्रायश्चित्तं किञ्चिद्दर्शयति—अतिक्रान्त इति । त्र्यवयवां विद्यामधीयत इति त्रैविद्यास्तेषामिदं त्रैविद्यकम् । वेदत्रयग्रहणोचितं ब्रह्मचर्यं वेदाध्ययनवर्जं गुरुसेवादिलक्षणं तत्तद्वेदगतं तत्तन्मन्त्रग्रहणकाले यो यो धर्मो विशिष्योक्तो गामुखरीत्या भोजनसमिदाद्याहरणविशेषादि च तत्तदुक्तं ऋग्यजुःसामगुरुत्रयस्य कालविभागेन यथायोगं सेवनेन संवलितं निखिलमपि चरेदित्यर्थः । अथेति । ऋतुकालव्यापिब्रह्मचर्यानन्तरं यथापूर्वमुपनयनं कार्यम् । तत इति । उपनयनानन्तरं त्रिषवणस्नानमुचितं नियतमन्त्रत इति भावः । अथेति । संवत्सरस्नानेनाधिकारसिद्धौ सत्यामध्याप्योऽध्यापनार्हो भवति । अत्रैतावता ग्रन्थेन बालकस्यैकस्यैव पतितसावित्रीकत्वे प्रायश्चित्तरूपैकर्तुब्रह्मचर्यपूर्वकमुपनयनं संवत्सरस्नानपूर्वकाध्यापनार्हत्वञ्च निरूपितम् ॥

सम्प्रति बालकतत्पितृपितामहानां पतितसावित्रीकत्वे त्रैविद्यब्रह्मचर्यलक्षणप्रायश्चित्तं, तत उपनयनं, ततः स्नानभेदेनाऽध्ययनार्हतां च दर्शयति-अथ यस्येति । अथाऽस्मिन्विषये प्रायश्चित्तादि निरूप्यते 'यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इति । अत्र पितृपितामहयोरनुपनीतत्वानुवादपूर्वकं त्रयाणां 'ते ब्रह्महसंस्तुता' इति निन्दाबोधनादुपनयनविधानपूर्वकमेकस्याध्याप्यतायाः 'अथाध्याप्य' इति निर्देशात्। यस्येति पदमनुपनीतबालकपरम्। बहुवचनञ्च 'ते ब्रह्महसंस्तुतास्तेषामभ्यागमनम्' इति निन्द्यबहुत्वात्सङ्गतमिति भेदनिर्देशाकरणं संवत्सरमात्रमेव साधारण्येन ब्रह्मचर्यं परिमितं सङ्गतं भवति ।

वस्तुतस्तु बालकस्य पितुः पितामहस्य च संवत्सरं त्रैविद्यकं ब्रह्मचर्यं समानमेव त्रयाणामपि पतितसावित्रीकत्वम् । तत्रैवं विभजनीयम्-पितामहव्रात्यतानिमित्तमेकर्तुब्रह्मचर्यं,पितृव्रात्यतानिमित्तं द्यृतुब्रह्मचर्यं, बालकव्रात्यतानिमित्तं त्र्यृतुब्रह्मचर्यमुत्तरोत्तरं व्रात्यताभिवृद्धेः । एवं च बालकस्य सांवत्सरब्रह्मचर्यमपेक्षितम् । पितामहस्य पुनः स्वार्थमेकर्तुब्रह्मचर्यं व्रात्यतादशायां व्रात्यपुत्रोत्पादनाद्व्रात्यताऽभिवृद्धेति द्यृतुब्रह्मचर्यं, व्रात्यपुत्राद्व्रात्यपुत्रजननाद्व्रात्यतायाः पुनरतिवृद्धेः त्र्यृतुब्रह्मचर्यञ्चापेक्षितमिति संवत्सरब्रह्मचर्यमपेक्षितम् । पितुरुपनयन एवम् । पितुः पुनः स्वपितुर्व्रात्यतानिमित्तमेकर्तुब्रह्मचर्यं, स्वार्थं द्यृतुब्रह्मचर्यं, पुत्रार्थं त्र्यृतुब्रह्मचर्यं व्रात्यतादशायां स्वस्योत्पत्तेः स्वपुत्रोत्पत्तेश्चोत्तरोत्तरं व्रात्यताप्राबल्यात् । एवञ्च बालकस्यैवैकस्याऽनुपनयनेन व्रात्यतायामेकर्तुब्रह्मचर्यं, पितुश्चाऽनुपनयनेन व्रात्यतायां द्यृतुब्रह्मचर्यं, पितामहस्याऽनुपनयनेन व्रात्यतायां त्र्यृतुब्रह्मचर्यमपेक्षितमिति विभजनीयम् । अत्र पिता पितामहश्चानुपेतौ स्यातामिति वक्तव्ये सति 'पिता पितामह' इती तेरधिकस्य कथन मितेः प्रकारपरत्वेनान्येषामपि परिग्रहाय । एवञ्च यस्येति यत्पदार्थौ यथाऽनुपनीत इति सिद्ध्यति । एवं प्रपितामहादीनामप्युपनयनं सूचितं भवति । अत्रानुपेताविति द्विवचनाभिरुच्यमानमिदं प्रायश्चित्तं संवत्सरब्रह्मचर्यादिलक्षणं न प्रपितामहादीनां भवति किन्त्वन्यदेवेति सूचितम् । तच्चैकर्तुब्रह्मचर्यस्यैकोत्तराभिवृद्धिक्रमसूचनात्प्रपितामहावलम्बने ऋतुचतुष्टयब्रह्मचर्यं संवत्सरादूर्ध्वमाधिकमपेक्षितम् । प्रपितामहादग्रपुरुषपरिग्रहे पञ्चर्तुब्रह्मचर्यमधिकमपेक्षितम् । एवञ्च वत्सरद्वयादूर्ध्वं त्र्यृतुब्रह्मचर्यमाधिकं सञ्जातम् । एवमग्रे पुरुषवृद्ध्या एकर्तुब्रह्मचर्यवृद्धिर्द्वादशवर्षपर्यन्तं नेयेति सूचितं भवति । एवञ्चैकादशपुरुषे एकादशाब्दा जायन्ते तदूर्ध्वं द्वादशाब्दसङ्ख्या वचनादेवेति दिक् ॥

'ते ब्रह्महसंस्तुतास्तेषामभ्यागमनं ते

त्रयोऽपि जीवन्तः प्रायश्चित्तार्हा इति सूच्यते । इच्छतामिति निर्देशादनिच्छतः प्रायश्चित्तं बलान्न कारणीयम् । अनिच्छुना कृतेऽपि प्रायश्चित्ते तन्मर्यादां न पालयेत् शुद्धमर्यादां जह्यादेवाऽतोऽरुचिर्दृढा जाता चेत्तर्हि प्रायश्चित्तं कारणीयमिति भावः । तथा चेच्छा चेत्त्रयाणामपि पृथक् पृथक् प्रायश्चित्तं भवति यदि ते जीवन्तः स्युः । यदि तेषु कश्चिद्विगतः स्यात्तर्हि स तावदनिच्छत्पुरुषसमो नेयः । ते इति । ते बालकपितृपितामहा ब्रह्महत्वेन निन्दिताः, तेषामेतत्सम्बन्धिभोजनाभ्यागमनविवाहान् वर्जयेत् । इतिपदं प्रकारपरम् । अन्यदपि निरुक्तसमं वर्जयेत् । अथ त्रयाणामिच्छतां प्रायश्चित्तस्वरूपमाह—यथेति । अत्र प्रथमेऽतिक्रम इति निर्देशाद्द्वितीयतृतीयाद्यतिक्रमा अपि ज्ञापिताः । तत्र बालकस्यैकस्य कालातिक्रमः प्रथमः । पितुः कालातिक्रमो द्वितीयः । स च द्विविधः—पितुः कालातिक्रमः बालकस्य पितुश्च द्वयोरपि कालातिक्रम इति द्विविधोऽप्ययं द्विविधः—पिता जीवन्नजीवन्निति । पितृपितामहयोः कालातिक्रमस्तृतीयः । सोऽपि द्विविधः—बालकेन सह कालातिक्रमो बालकं विना चेति । पितृपितामहयोर्जीवनं पितुरेव जीवनं पितामहस्यैव जीवनञ्चेति । सोऽपि त्रिविधः । सकलपक्षेपीदं प्रायश्चित्तं साधारणमुक्तम् । प्रथमातिक्रमे ऋतुरिव द्वितीयतृतीयातिक्रमयोर्वत्सर इति ॥

अयमाशयः—बालकपितृपितामहानामातिक्रमे त्रयाणामिच्छायां त्रिभिरपि प्रत्येकं वत्सरं त्रैविद्यकं ब्रह्मचर्यं विधेयम् । यदि बालकस्य कालो नातिक्रान्तः स्यात्तर्ह्यपि पितृपितामहाभ्यां सह बालेनैकवत्सरब्रह्मचर्यं कर्तव्यम् । यदि पितृपितामहयोः कश्चिदनिच्छन् मृतो वा द्वावपि मृतौ तर्ह्यपि यो य उपनयनेच्छुस्स संवत्सरब्रह्मचर्यं कुर्यात् । उपनयनवान् स तावदुचितलोकादिभाग्भवति । इतरस्तु न तथा भवतीति विवेक इति दिक् ॥

एवञ्च त्रयाणामपि पुरुषाणां नियमेनानुष्ठानाभावात् कदाचिदे-

कस्य कदाचित् द्वयोः कदाचित् त्रयाणाञ्चाऽनुष्ठानदर्शनात्सकलपक्षसाधारण्येन अपरपरपदाद्विवचनादिनिर्देशमन्तरा यथा प्रथमेऽतिक्रमे ऋतुरेवं वत्सरः ॥

अथोपनयनम्। एकस्य द्वयोस्त्रयाणां वा उदकोपस्पर्शनमप्येकादीनां यथायोगं वक्ष्यमाणवत्सरपर्यन्तमिति सूत्रं रचितम्। अत्रोदकोपस्पर्शनस्योपनयनोत्तरभाविनोऽध्ययनाङ्गतया संस्काररूपत्वेन बालकपितृपितामहानां बालकमात्रस्य सपितृकस्य वोपनयने उदकोपस्पर्शनं वत्सरमात्रमेव प्रथमपर्यायवदित्याशङ्कय मध्यमपर्यायेऽस्मिन्वत्सरभेदं स्नानमन्त्रभेदञ्च दर्शयति प्रतिपुरुषमिति। यावन्तोऽनुपेतास्तावद्वर्षपर्यन्तमुदकोपस्पर्शनं सप्ताभिरित्याम्नातमन्त्रैरित्यर्थः। नेदं प्रतीतिसूत्रं प्रतिपुरुषं संवत्सरन्यायेन ब्रह्मचर्यविधिपरं, तथा सति यथा प्रथम इति सूत्रसन्दष्टमेव पठितं स्यात्, न तथा पठितं, किन्तूदकोपस्पर्शनस्नानमन्त्रान्तराले पठितम्। तेनोदकोपस्पर्शन एवेदं सूत्रमन्वियात् न पूर्वत्र। यद्यन्वियात्तथा सति यथा प्रथमेऽतिक्रमे ऋतुरेवं प्रतिपुरुषं सङ्ख्याय संवत्सरान्यावन्तोऽनुपेताः स्युरिति सूत्रघटनं कृतं स्यात्। न तथा कृतं प्रत्युताऽधिकं वत्सर इति पदमुपादायैव सूत्रं रचितमुपलभ्यते। अतो निरुक्तयोजनमेव समुचितम्। एवञ्च यथा प्रथम इति वचनं बालकपितृपितामहानां मध्ये य उपनयनेच्छुस्तस्य वर्षमात्रब्रह्मचर्यविधानपरमिति विवेचनीयम्। आङ्गिरसेनेतीतिपदं मन्त्रान्तरसङ्ग्रहार्थम्। अनेन प्रथमे पर्याये उदकोपस्पर्शनेन मन्त्रा नियताः साधारणस्नानमन्त्रा एव तत्र भवेयुः। विशिष्य कथनान्मध्येऽन्त्ये च मन्त्रा नियता अपि भवन्ति। अपि वेति व्याहृतयो विकल्पेन स्नानमन्त्राः। अथेति। अथाध्याप्य इत्येकवचनात् त्रयाणां मध्ये य इच्छन्नमृतो भवन् सन् उक्तब्रह्मचर्यवानुपनेयो भवति पश्चात् स्नाने जातेऽध्याप्य इत्यर्थः। अत्र त्रयाणां सम्भूयैवाधिकारो नेतरथेति शङ्का अध्याप्य इत्येकवचनेन परिहृता वेदि-

तव्या । केचित्तु पितृपितामहौ प्रायश्चित्तोत्तरमुपनयनेऽपि स्नाने वृत्तेऽपि नाध्याप्यौ बालक एवाध्याप्य इत्येकवचनेन द्योत्यत इति प्राहुः । तत्र बालकपितृपितामहेषूत्तरोत्तरमल्पैनस्त्वात्समैनस्त्वाद्वा बालकस्याऽतिपावित्र्येणाऽध्यापनार्हता, नेतरयोरित्यस्य निर्युक्तिकत्वादिति दिक् ॥

अथ पूर्वं पितामह इतीतिपदेन प्रपितामहादीनामुपनयनं सूचितम् । तत्र प्रपितामहादावनुपनयनानुस्मरणे पितामहोत्तरमेव प्रायश्चित्तम् । बालकः पितामह इति संवत्सरत्रये स्पष्टे एकं द्वौ त्रीन्वा वत्सरानिति विवेचनेनैवं सम्भवति प्रतिपुरुषं सङ्ख्याय संवत्सरान्याक्तोऽनुपेताः स्युरित्यानिर्द्धारितत्वेन निर्देशात् । प्रपितामहादिषु ज्ञातानुपनयनस्थले सोपनयनं पुरुषं निर्णीय तदर्वाक् प्रतिपुरुषं संवत्सरस्नानमधिकं भवेत । ब्रह्मचर्यमपि प्रपितामहादौ यत्पुरुषे उपनयनं स्मृतं तदधस्तनपुरुषमारभ्य बालकपर्यन्तमेकोत्तरवृत्तिवृद्धिक्रमेण यावत्पुरुषं विधेयम् । प्रपितामहादि नाऽनुस्मर्येत इत्युपलक्षणम् । पित्रादिः प्रपितामहादिर्वा नानुस्मर्येत इति । तथा चोपनयनावधौ विज्ञाते पूर्वोक्तं प्रायश्चित्तम् । अज्ञाते द्वादशवर्षप्रायश्चित्तमिति प्रायश्चित्तविशेषं निन्दाविशेषकथनपूर्वकं दर्शयति—अथेति । 'यस्य पिता पितामह इत्यनुपेतौ' इत्यत्र पूर्वस्योपनीतत्वप्रतीतानुपनयनानुवादनैरर्थक्यात् अग्रिमानुपनयनानुवादसामर्थ्यात्पूर्वानुपनयनासिद्धेस्तथैव सर्वेषामपि 'ते ब्रह्मसंस्तुतास्तेषामभ्यागमनम्' इत्यनुपनयनप्रयुक्तनिन्दावादस्य साधारण्येन प्रत्ययात् । प्रकृते यस्य प्रपितामहादीति निर्देशात्तु प्रपितामहादीनामनुपनयनं सिद्ध्यति । पूर्वेषामुपनयनकथनात्सर्वेषां बालकपितृपितामहादीनामनुपनयन एवाग्रेतनानुपनयनोक्तिसार्थक्यात् । उत्तरत्र 'ते श्मशानसंस्तुतास्तेषामभ्यागमनम्' इति बालकादीनामनुपनीतत्वेन निन्दादर्शनात् प्रपितामहादि नानुस्मर्येत उपनयनमिति चाऽनुस्मरणाभावनिर्देशेन प्र-

पितामहादीन् [illegible] ते इति तत्पदेन प्रपितामहादी-
नामेव ग्रहणयोग्य[illegible]मप्यवश्यसङ्ग्राह्यत्वात् । एवञ्चात्र
पूर्वं यस्य पितापितामहः इति क्रमादरणात् यथा प्रथमेऽतिक्रम
इति बालकातिक्रमस्य प्रथमत्वनिर्देशेन पित्रतिक्रमस्य द्वितीयत्वं,
पितामहादिक्रमस्य तृतीयत्वमिति सूचनात् प्रपितामहादीत्यादि-
पदमग्रेतनानेव गृह्णाति योग्यत्वात्, न पूर्वतनान् तेषां प्रकारान्तर-
णैव निरुक्तदिशाऽनुपनयनलाभसम्भवेन पुनरनुचितादिपदेन ग्रहणे
प्रयोजनाभावात् । एवञ्च यस्य बालकस्य पितृपितामहसहितस्य प्र-
पितामहादि उपनयनं नानुस्मर्यते ते बालकादयः श्मशानत्वेन
निन्दिता इत्यर्थः । पूर्वमनुपेताविति प्रत्यक्षीभूतत्वेन निर्देशात्
नानुस्मर्यत इति परोक्षतया स्मरणाभावनिर्देशात्प्रपितामहादयः
प्रायेण मृता यथायोगमिति, पितृपितामहौ प्रायेण जीवन्तावि-
ति सूचितं भवति । प्रपितामहस्य जीवत इच्छा चेत्प्रायश्चित्तं भव-
ति । तत्र बालकस्यैवाऽनुपनयनेऽल्पं प्रायश्चित्तम् । अग्रिमाग्रिमपुरु-
षानुपनयने तु प्रायश्चित्तं गुरु भवतीत्यर्थः । तेषामिति जीवतामिच्छ-
तां वंशजपुरुषाणां मध्ये यस्य यस्योपनयनमपेक्षितं तेन तेन द्वादश-
वर्षं ब्रह्मचर्यं कर्तव्यमित्यर्थः । तदनूपनयनं तत उदकोपस्पर्शनं पाव-
मान्यादिभिर्मन्त्रैरित्यर्थः । अत्र बालकादिषु बहुषु जनेषु पूर्वं पिता-
महान्तं सङ्ख्यानिश्चयात्प्रतिपुरुषमिति सूत्रं प्रवर्तितम् । संवत्सर-
सङ्ख्यानिर्णयेनोदकोपस्पर्शनासम्भवात्प्रपितामहादीत्यादौ पुरुष-
सङ्ख्यानैयत्याभावात्, उदकोपस्पर्शने प्रतिपुरुषमिति सङ्ख्या न
निबद्धा किन्तु प्रायेण सर्वेषां निवृत्तये द्वादशवर्षं ब्रह्मचर्यं विहि-
तम् । तदनन्तरमुपनयनमुक्त्वा उदकोपस्पर्शनं पावमान्यादिभिरिति
स्नानं सामान्यतो विहितम् । तच्च उदकोपस्पर्शनं सकृदनुष्ठान एव
कालानादेशात्पर्यवस्यति । तावतैव शास्त्रार्थस्याऽदृष्टावहस्य सिद्धेः ।
सकृत्स्नाने जाते सिद्धमधिकारं दर्शयति

र्थज्ञानानुष्ठानगृह्यशास्त्रोपदेशनं भवति । सकृत्स्नानेन स्मार्तकर्माधिकारः सूचितः । यथा गृहधर्मेऽधिकारस्तथा श्रौतेऽप्यधिकारोऽस्त्वित्याशङ्क्याह–नाध्यापनं श्रुत्यध्यापनन्तु न भवति । तेन सकृत्स्नानेन श्रौतार्थानुष्ठानाधिकारसिद्धिरिति सिद्ध्यति ।

अयं भावः-प्रथमे पर्याये संवत्सरमुदकोपस्पर्शनमिति । द्वितीये पर्याये प्रतिपुरुषं सङ्ख्याय संवत्सरानिति स्पष्टं स्नानकालनिर्देशात् । तृतीये पर्याये तत उदकोपस्पर्शनं पावमान्यादिभिरिति मन्त्रवत्कालस्य विशिष्यानिर्देशात् । द्वादशवर्षं ब्रह्मचर्यं कर्तुमुपनयने जाते आलस्यादिना बहुकालमुदकोपस्पर्शनाकरणेऽपि पावमान्यादिभिः सकृदुदकोपस्पर्शनन्तु कर्तव्यमेव । द्वादशवर्षब्रह्मचर्यानुष्ठानस्याऽधिकारसम्पादकत्वेनोपनयनद्वारा फलपर्यन्तानुधावनावश्यंभावेनाऽधिकारसम्पादनस्य कर्मानुष्ठाने पर्यवसानौचित्येन आलस्यादिना बहुकालमुदकोपस्पर्शना करणेऽपि बहुकालं ब्रह्मचर्यकरणेन प्रायेण विनष्टसर्वैनस्त्वात् स्मार्तकर्माधिकारसम्पत्तये सकृत्स्नानं पावमान्यादिभिः कार्यमिति हृदयेनोक्तम् । तत उदकोपस्पर्शनमिति । इदञ्च कालनिर्देशाभावात्सकृदनुष्ठान एव पर्यवस्यति 'सर्वौषधस्य पूरयित्वोलूखलमवहन्ती'तिवत् । अथ गृहमेधोपदेशनमित्यनेनालस्यादिना बहुकालमुदकोपस्पर्शाभावेऽपि स्मार्तधर्मानुष्ठानन्तु भवेदेव, श्रौतधर्मानुष्ठानाभावेऽपि । एवञ्चैतावता द्वादशवर्षब्रह्मचर्यानुष्ठानं सफलमेव संपन्नं भवति । द्वादशवर्षब्रह्मचर्यानुष्ठातरि स्मार्तकर्मानुष्ठानमात्रेणोपरते सति स्मार्तकर्मानुष्ठानकाले सञ्जातपुत्रस्य तु पितुः प्रायश्चित्तेन द्वादशवर्षलक्षणब्रह्मचर्येणोपनयनद्वारा स्मार्ताधिकारात् । एतस्यापि तावत्येवाधिकारो न श्रौते कर्मण्यपि । पितुः पितामहस्य वा पूर्वपुरुषाणां सोमपानाभावेन सोमानधिकारे ऐन्द्राग्नाकरणेन सोमपीथित्वाभावे तत्पुत्रस्य विनैन्द्राग्न सोमाधिकारात् प्रकृतेऽपि द्वादशवर्षब्रह्मचर्यवतः स्मार्ता-

नुष्ठातुः पुत्रस्य पूर्णोदकोपस्पर्शे सत्येवाध्ययनेऽधिकारो नान्यथेत्याह 'ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे' इति । अत्र प्रथमातिक्रमे तावत् अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यञ्चरेत् । अथोपनयनं, ततः संवत्सरमुदकोपस्पर्शनम्, अथाध्याप्य इत्याम्नातम् । तत्र पुत्रस्य उपनीतस्मार्तकर्मठपुत्रत्वात् ऋतुं त्रैविद्यकं ब्रह्मचर्यमित्यकरणेऽप्युपनयनं भवेदेव । पितुरैन्द्राग्नेन सोमपीथित्वे पुत्रस्यैन्द्राग्नानपेक्षणात् । वेदाध्ययनेऽपि अत्रैवालस्यादिना पूर्वेणोदकोपस्पर्शनाकरणेनाधिकारासम्पादनात् । परिशेषात् तस्य संस्कारो यथा प्रथमेऽतिक्रमे इति कथनं वेदाध्यापनाधिकारसम्पादकसंवत्सरोदकोपस्पर्श एव पर्यवस्यति । एवं तृतीयपर्याये आलस्यादिनोदकोपस्पर्शनाभाववत् प्रथमद्वितीयपर्याययोरपि आलस्यादिना शास्त्रोदितकालमभिव्याप्योदकोपस्पर्शनाभावे सकृदेवोदकस्पर्शे सति गृहमेधायोपदेशनं भवति । श्रुत्यध्ययनन्तु न भवेदेव स्मार्तकर्मानुष्ठान एव तस्याधिकारो भवति । तत्कर्मानुष्ठानसमये सञ्जातपुत्रस्य श्रौतपरिग्रहमन्तरा पितर्युपरते सति तत्पुत्रस्य तु प्रकृतवदुपनीतस्य संवत्सरोदकस्पर्शादेव तृतीयपर्याय इव वेदाध्ययनाधिकारः । एवं प्रथमद्वितीयपर्याययोरिव बहुकालं तृतीयेऽपि पर्याये उदकोपस्पर्शे सति तत्पुत्रपर्यन्तानुधानमन्तरैव स्मृतिवच्छ्रुतेरप्यध्ययनमनुष्ठानोपयोगि भवति पितुः । तत्र द्वादशवर्षाणीत्युपनयनात्पूर्वमेव ब्रह्मचर्यबहुकालग्रहणात्तेनैवैनसः प्रायेण निवृत्तेरुत्तरत्र यथा प्रथमेऽतिक्रम इति संवत्सरमात्रोदकोपस्पर्शनपरिग्रहात्तत्सामान्याच्चतृतीयेऽपि पर्याये प्रथमवदेवोदकस्पर्शनमिति विवेच्यते । एवञ्चाऽर्थात्संवत्सरपरिमितमुदकोपस्पर्शनं द्वादशवर्षब्रह्मचर्यकर्तुरालस्यं विनाऽध्ययनाधिकारसम्पादने पर्यवस्यति । उपक्रमे संवत्सरारम्भात् प्रान्तेपि संवत्सरोक्तेस्तत्स्थानसन्निकर्षेण तृतीयपर्यायेपि वत्सरस्यैवोचितत्वात् ।

एवञ्च पर्यायत्रयेऽपि आलस्यादिनैकस्नानोत्तरं कालान्तरे शास्त्रन्यायसिद्धं स्नानं विधेयमितीच्छायां प्रथमस्नानमात्रेण स्मार्तकर्माधिकारसिद्धिः । सम्पूर्णे स्नाने जाते तु वेदाध्ययनात् श्रौतकर्माधिकारसिद्धिरिति सिद्धम् ॥

अथायमत्र निष्कर्षः—प्रथमपर्याये द्वितीयपर्याये च समुद्दिष्टब्रह्मचर्यानुष्ठानानन्तरं पुरुषसङ्ख्यानिर्णयेन तावत्संवत्सरपर्यन्तं स्नाने सति अध्ययनं वेदस्यानुष्ठानपर्यवसायि भवति । शास्त्रोक्तपूर्णस्नानाभावे तु स्नानमात्रे जाते स्मार्तेऽधिकारः । कालान्तरे सम्पूर्णे स्नाने जाते वेदाध्ययनादि न भवेत् । पूर्णस्नानाभावे स्मार्तकर्मानुष्ठानकाले जातपुत्रस्य तु पित्रा यावत्कृतं तावदुपनयनादिकालानतिक्रमे प्रकृतिवदेव । वेदाध्ययनन्तु पितुर्वेदाध्यायनाधिकाराय यत्परिमाणं स्नानं शास्त्रेणादिष्टं तत्प्रमाणस्नाने कृते त्वध्ययनेऽधिकारो नो चेन्नाधिकारः । एवं तृतीये पर्यायेऽपि द्वादशवर्षब्रह्मचर्येण प्रायः सर्वैनसां निवृत्तेरुपनयने वृत्ते प्रथमपर्यायवत्संवत्सरोदकोपस्पर्शे अध्ययने वेदस्यानुष्ठाने चाधिकारः । वार्षिकस्नानापूर्तौ स्नानमात्रे जाते पूर्ववदेव स्मार्तमात्रेऽधिकारः । कालान्तरे स्नाने पूर्णे तु अध्ययनेऽपि वेदस्याधिकारः । अपूर्णस्नानसमये स्मार्तकर्मानुष्ठानकाले जातपुत्रस्य तु पितृवत्स्मार्तकर्मान्ताधिकारो लोकवदेव । वेदाध्ययनकर्मानुष्ठानाधिकारस्तु संवत्सरस्नाने पूर्णे एव भवेदिति । तत इति । अध्ययनाङ्गस्नानवत्पुरुषादूर्ध्वं प्रकृतिवत्सामान्यद्विजवदिति भावः । अथ यस्य प्रपितामहादि नानुस्मर्यत इति तृतीये पर्याये उदकोपस्पर्शनपदं स्मार्ताङ्गभूतसकृदुदकोपस्पर्शनपरतयाऽध्ययनाधिकारसम्पादकप्रायश्चित्तभूतमुदकोपस्पर्शनान्तरं न्यायतो न सङ्गृह्णाति येन सकृदुदकोपस्पर्शनेऽङ्गमिति स्मार्तकर्मण्येवाधिकारः । प्रायश्चित्तभूतस्नानपूर्तौ तु श्रुत्यध्ययनेऽप्यधिकार इति सिद्ध्येत् । किन्तूदकोपस्पर्शनपदं प्रायश्चित्तभूतसम्पूर्ण-

स्नानपरमेव। एवञ्च प्रथमद्वितीयपर्यायवत् स्नानोत्तरमेव वेदाध्ययनाधिकारस्तृतीये पर्याये भवत्विति शङ्का तावत् 'अथ गृहमेधोपदेशनं नाध्यापनम्' इति सूत्रेण वारिता भवति। तथा च द्वादशवर्षे त्रैविद्यकब्रह्मचर्ये वृत्तेऽपि उदकोपस्पर्शने पूर्णे जातेऽपि चतुर्थादेर्न वेदाधिकारः, किन्तु स्मार्त एवाधिकारः। ततो यः पुत्रो भवति प्रायश्चित्तोत्तरं तस्य प्रथमपर्यायवदेकर्तुब्रह्मचर्ये संवत्सरस्नाने उपनयनवेदाध्ययनाधिकारसाधनभूते 'ततो यो निर्वर्तत' इत्यादिनोच्यते इति योज्यतामिति चेत्—अत्रोच्यते। अत्र प्रथमद्वितीयपर्याययोर्यस्योपनयनं ब्रह्मचर्येणाम्नातं तस्यैव नियतकालस्नानेनाऽध्ययनार्हता गदिता। न तु दैवान्मानुषाद्वा अपराधात्तु स्नानं सम्पूर्णं तावदवृत्ते सति तं तत्पुत्रं वाऽवलम्ब्य किञ्चिदुदितम्। तृतीये पर्याये तु स्नाने तावत्सकृदादिपदं समुचितमपि नैव समाम्नातं पूर्वपर्यायद्वयानाम्नातमपि स्मृत्यध्ययनमाम्नाय वेदाध्ययननिषेधोऽभिहितः। तदनन्तरञ्च द्वादशवर्षे त्रैविद्यकब्रह्मचर्यकर्तृपुत्रमादाय प्रथमपर्यायधर्मातिदेशः कृतः। एवञ्च तत्र दैवाद्यपराधादुपनयनोत्तरं स्नानापूर्ताविव पुत्रे जाते संस्कृते चोपरते सति तत्पुत्रस्य कर्तव्यांशाकथनान्न्यूनता स्यात्। उपनयनतोप्युपनयनानन्तरं कर्तव्यपदार्थानामनाम्नानात् स्नानपूर्तिपर्यन्तं स्मार्तकर्मानुष्ठानं प्रसज्येत। एवञ्च जातमप्युपनयनं स्नानापूर्तौ कर्माप्रयोजकत्वादनर्थकमेव स्यात्। एवमत्रोपनयनमात्रस्यैव कथनात्तत्पूर्वतनकर्मादिकमप्यकर्तव्यमेव भवेत्। उपनयनोत्तरं विवाहादिक्रियाऽपि नाऽऽवर्तनीया भवेत्। इष्टापत्तौ त्रैवर्णिकोचितविवाहाद्यभावात्स्नानपूर्त्याऽध्ययनाधिकारेऽपि स्मृत्युक्तविवाहादेस्त्रैवर्णिकसम्बन्धिनोऽसम्पत्तेरध्ययनोत्तरमपि ज्योतिष्टोमाद्यधिकारो न स्यात्। इष्टापत्तौ च विशिष्टलोकहेतुभूतकर्मपरिग्रहबुद्ध्या प्रायश्चित्तविधानमनर्थकं स्यात्। तस्मादुपनयननिर्देशसामर्थ्यात्तदन्तन्यायेन जातकर्मादिसंस्कारा अभ्युपेता इत्येष्टव्यं

भवति । एवमुपनयनोत्तरकर्माण्यपि तदादिन्यायेन "यथायोगमनुष्ठेयानीत्यभ्युपेतमित्याश्रयणीयम् । इतरथा तत्र सर्वकर्मबहिष्कृत इति व्रात्यताविशेषेण सकलस्मार्तश्रौतकर्मानधिकारकथनात्प्रायश्चित्तेनोपनयनविधानेऽपि यावद्वचनं वाचनिकमिति केवलोपनयनमेव भवेत्, न तदादितदन्तन्यायाभ्यां जातकर्मविवाहाद्यनुष्ठानं स्यात् । व्रात्येतरस्थले उपनयने वृत्ते वेदाध्ययनाद्यधिकारवत् तदादितदन्तन्यायतोऽध्ययनजातकर्माद्यधिकारबुद्धेरुदकोपस्पर्शनं प्रायश्चित्तभूतं विनाऽध्ययनाद्यनधिकार इति सूचनेन प्रतिरोधात् सर्वकर्मणामप्युपनयने कथितेऽपि तदादितदन्तन्यायतः परिग्रहबुद्धेः प्रतिरोधात् उदकोपस्पर्शनं, ततोऽध्याप्य इत्यध्ययनपदस्य श्रौतस्मार्तोभयग्रन्थाध्ययनपरत्वस्यासङ्कुचितार्थग्रहे न सङ्कुचितग्रहणमुचितमिति न्यायानुगृहीतत्वात् । विदितकर्मसामान्याधिकारबुद्धिप्रतिरोधात्स्मार्तधर्मसामान्यमात्रपरिग्रहाय तदादितदन्तन्यायमवतारयितुमिहाऽऽपस्तम्बेन सूत्रकृता प्रमाणमवश्यमुपक्षेपणीयं भवति । तत्र 'तत उदकोपस्पर्शनं पावमान्यादिभिः' इति वचसोऽपि प्रायश्चित्तरूपपूर्णस्नानपरत्वे तदादिन्यायप्रतिरोधः । प्रथमद्वितीयपर्यायस्समान एव चेत्युपनयनोत्तरसमये प्रायश्चित्तारम्भात्पूर्वञ्च स्मार्तधर्मस्याप्यप्रवृत्तिरेव स्यात् । दैवाद्यपराधादुपनयनोत्तरं प्रायश्चित्तं स्नानानारम्भे सति स्मार्तधर्मेऽप्यनधिकारेण कृतमपि तावदुपनयनमनर्थकमेव भवेत् । अतस्तृतीये पर्याये तत उदकोपस्पर्शनमिति वचो न प्रायश्चित्तरूपपूर्णस्नानपरं न तदादिन्यायप्रतिरोधकं विवक्षितं, किन्तु तदादिन्यायेनोपनयनाव्यवधानेन श्रौतस्मार्तधर्मप्रवृत्तौ सकृत्स्नानं धर्मारम्भाङ्गत्वेन विद्यते । तत्र श्रौतस्मार्तद्वयस्यापि तदादिन्यायात्प्रवृत्तौ सत्यां स्मार्तेऽधर्म एव तदादिन्यायो, न तु श्रौते धर्मे इति हृदयेनोक्तम् । ततो गृहमेधोपदेशनं नाध्यापनमिति ॥

अयश्चात्र विवेकः—प्रथमद्वितीयपर्याययोस्ततः संवत्सरमुदकोप-

स्पर्शनम्, ततोऽध्याप्य इत्यादौ श्रुतिंगृहमेधीयांवध्याप्य इत्येवार्थः स्यात् विशेषग्राहकमानाभावात्। तेन श्रौतस्मार्तसाधारण्येन तदादिन्यायाप्रवृत्तिः सूचिता भवेत्। तृतीयपर्याये उदकोपस्पर्शनस्याङ्गत्वे सति तदादिन्यायेन श्रौतस्मार्तधर्मप्रवृत्तौ 'अथ गृहमेधोपदेशनम्' इति वचसा स्मार्तधर्मानुग्रहे सत्यर्थात् श्रौतधर्मनिवृत्तिसम्भवेन पुनरपि नाध्यापनमिति विशदकथनमिह सर्वत्राऽध्यापनपदं वेदाध्ययनपरमिति विभागसूचनाय। एवञ्च प्रथमद्वितीयपर्याययोरध्ययनपदं वेदाध्ययनपरमिति नियमयति। एवञ्च पूर्वपर्याययोस्तदादिन्यायेनोपनयनोत्तरमेव गृहमेधीयधर्मस्य प्रवृत्तिरस्ति न श्रौतस्येति गमितं भवति। एवञ्च प्रथमद्वितीयपर्याययोः सकृत्स्नानभूताङ्गे सत्येव स्मार्तधर्मप्रवृत्तिः। प्रायश्चित्तरूपसंवत्सरादिस्नानोत्तरं श्रौतधर्मप्रवृत्तिरिति सूचनायैव तृतीये पर्वणि 'तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधोपदेशनं नाध्यापनम्' इति विरूपं वाक्यं विरचितम्। 'ततो यो निर्वर्तते' इति कथनमपि प्रथमद्वितीयपर्याययोरपि प्रायश्चित्तस्नानापूर्तावेवोपनीतपरमेतत्। कर्मठावस्थपुरुषपुत्रस्य तृतीयपर्यायगतपुत्रवत्पित्रननुष्ठितप्रायश्चित्तमेव कर्तव्यमिति गमयति। एवं तृतीये पर्याये पित्रा समादरणीयं संवत्सरस्नानं पुत्रवाक्य एव पठितं न पितृवाक्ये, पठिते सति तु पूर्वपर्याययोरिव प्रायश्चित्तेन श्रौतेप्यधिकारसम्पत्तेः पूर्वपर्यायवत्केवलगृहमेधीयोपदेशनं 'अथ गृहमेधोपदेशनम्' इति कर्तुमशक्यमेव स्यात्। तदर्थं संवत्सरोदकोपस्पर्शनं पितृवाक्ये पठितुमुचितमपि पुत्रवाक्य एवातिदेशेनोक्तम्। यदि तु 'तत उदकोपस्पर्शनं पावमान्यादिभिः' इति वाक्यं पूर्वपर्याययोरिवाऽभ्यस्यमानं प्रायश्चित्तरूपवत्सरादिस्नानपरं भवति। एवञ्च स्नाने प्रायश्चित्ते पूर्णे सत्यपि स्नातुः श्रुतावनधिकार एव। केवलगृहमेधीय एवाधिकार इत्याग्रहस्तर्हि 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इति पारस्करसूत्रे स्मर्यमाणास्मर्य-

माणोपनयनसाधारण्येन चतुर्थादिपुरुषेषु व्रात्यस्तोमेन प्रायश्चित्तं विधाय 'काममधीयीरन्' इति वेदाध्ययनादिकथनमसङ्गतमेव भवेत् । भवन्मते प्रायश्चित्ते कृतेऽपि प्रपितामहाद्यस्मर्यमाणानुपनयनस्थले वेदाध्ययनानधिकारनिर्णयात् । एवं वसिष्ठोद्दालकव्रताश्वमेधाभृथव्रात्यस्तोमानां पितृपितामहप्रपितामहादिलक्षणानुपादानात् स्मर्यमाणास्मर्यमाणोपनयनावधिकसकलपुरुषसाधारण्येन प्रायश्चित्तत्वेन सिद्धत्वात् । तथैव याज्ञवल्क्यस्मृतावपि व्रात्यस्तोमस्य निखिलपुरुषसाधारण्येन प्रायश्चित्तत्वसिद्धेरापस्तम्बसूत्रे चतुर्थादिस्थले सर्वथा वेदाध्ययनानधिकारसूचनमसङ्गतमेव भवति ।

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ।

इत्यत्र व्रात्यस्तोमे सति श्रौतस्मार्तसकलकर्माधिकारसूचनात् व्रात्यस्तोमादिप्रायश्चित्तेनाऽकामैरपि भवद्भिः श्रौतेऽधिकार एष्टव्य एव भवेत् । एवञ्चाऽऽपस्तम्बसूत्रेऽतिगुरुतरद्वादशवर्षत्रैविद्यकं ब्रह्मचर्यं निर्दिश्यमानं श्रुत्यध्ययनानधिकारे निरर्थकमेव स्यात् । अन्यैस्तृतीये पर्याये एवङ्गुरुभूतप्रायश्चित्तानाम्नानात्स्मृत्यन्तरानुरोधेनाऽऽपस्तम्बसूत्रे विसंष्ठुलतापरिहाराय चतुर्थादिपुरुषस्थले श्रौताधिकारः पूर्वोक्तरीत्या स्वीकर्तव्य एव । अन्यैर्व्रात्यस्तोमेन व्रात्यतानिर्हरणेन वेदाध्ययनाधिकारकथनात्स्मृत्यन्तराविरोधेनैवाऽपरस्मृतिनियोजनस्य सति सम्भवे कर्तुमुचितत्वात् । 'तत उदकोपस्पर्शनं पावमान्यादिभिः' इत्यस्याभ्यासपरकालनिर्देशमन्तरा प्रायश्चित्तत्वनिर्णायकमानाभावात् प्रायश्चित्तपरतया नेतुमशक्यत्वाच्च । आपस्तम्बेनाऽपि उपनयनात्पूर्वमेव गुरुतरद्वादशवर्षब्रह्मचर्याम्नानात् उपनयनोत्तरं वेदाधिकृतये क्षुद्रमेव संवत्सरस्नानमभिमतं भवति । अत एव पितुः संवत्सरस्नानाभावे पुत्रेण तावद्वेदाध्ययनाधिकृतये संवत्सरस्नानं कर्तव्यमिति हृदयेन 'ततो यो निर्वर्तते' इत्यादिवाक्यं प्रवर्तितं स-

ङ्गतं भवति ॥

वस्तुतस्तु यत्तावत् 'यस्य प्रपितामहादि नानुस्मर्यते' इति तृतीयपर्याये उदकोपस्पर्शनलक्षणप्रायश्चित्तेऽपि श्रौताध्ययनन्न भवतीत्येतदर्थकं नाध्यापनमित्येतदापस्तम्बसूत्रमित्युक्तं तत्तावद्व्रात्यस्तोमाद्यसमर्थपरं विज्ञेयम्। पारस्करेण 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये चतुर्थरूपे संस्कारो नाध्यापनञ्च' इत्यभिधाय 'तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्ति' इति कथितम्। तत्रेष्ट्वा संस्कारेप्सुर्भवेदित्यन्वयः। एवञ्च चतुर्थप्रभृतिषु प्रायश्चित्तान्तरकरणे व्रात्यस्तोमाद्यकरणे स्मार्तकर्मानुष्ठानमात्रम्। कृते तु व्रात्यस्तोमादौ सर्वपातकनिवृत्तौ भवत्येव श्रौताध्ययनम्। अत एव याज्ञवल्क्येनापि—

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।
सावित्री पतिता व्रात्या—

इत्यभिधाय—

व्रात्यस्तोमादृते क्रतोः।

इत्यनेन व्रात्यस्तोमे कृते श्रौतस्मार्तसर्वधर्माधिकार इति स्पष्टीकृतम्। एवं च वसिष्ठेनापि 'व्रात्यस्तोमेन वा यजेत' इति अश्वमेधावभृथस्नानविकल्पितत्वेन सर्वव्रात्यतानिवर्त्तकत्वेन सर्वश्रौतस्मार्ताधिकारो निबद्धस्तस्मान्नाध्यापनमिति सकलस्मृतिवचनानुरोधेन व्रात्यस्तोमाद्यसमर्थपरमिति विज्ञेयम्। 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इत्यत्रापत्यपदं चतुर्थपरमात्रमिति न भ्रमितव्यम्। न पतन्त्यनेनेति व्युत्पत्त्या चतुर्थप्रभृतीनामपि तद्वाचकमिति विवेचनीयम्। 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इत्यनेन चतुर्थादौ व्रात्यस्तोमाभावे नाध्यापनमित्युक्तं पारस्करेण। तद्विषय एवाऽऽपस्तम्बेन कृतोदकस्पर्शस्यापि नाध्यापनमित्यध्यापनाभावो निरुक्तः। स चैकविषये व्रात्यस्तोमकरणाकरणाभ्यामेवाध्ययनानध्ययने इति। तदयमाप-

सम्भवत्यर्थे विरोधस्याऽनुचितत्वात्। तस्मात्सकलस्मृतिवचनानुरोधेन नाध्यापनमिति वचनं व्रात्यस्तोमाद्यसमर्थविषयमिति सम्यगिदमवदातमित्यापस्तम्बवचनयोजना॥

अथ याज्ञवल्क्यवचनयोजना। आषोडशादिति। आङभिविधावित्याद्यर्थः पारस्करसूत्रवदेव योजनीयः, अत ऊर्ध्वमुपनयनाभावात्। षोडशवर्षादूर्ध्वं सर्वधर्मबहिष्कृताः स्मार्तश्रौतधर्मबहिष्कृताः सन्तः सावित्रीपतिता व्रात्याः व्रात्यशब्दार्हाः व्रात्यस्तोमादृते पतन्ति स्वोचितस्थानादधः पतन्ति, व्रात्यस्तोमे सति तु अव्रात्या अपतितसावित्रीकाः श्रौतस्मार्तधर्माधिकारिणो न पतन्तीत्यर्थः। अत्राऽऽपस्तम्बाद्युक्तप्रायश्चित्तानां क्षुद्रत्वात्तत्रोपनयनाधिकारकरमेकं वेदाध्ययनाधिकारपरमन्यदिति विभागः समादृतः। व्रात्यस्तोमस्तु सर्वोत्तरत्वान्निरवशेषं सर्वैनोनिहन्तृत्वात् व्रात्यस्तोमेनैकेनैवोपनयनस्मार्तश्रौतकर्माधिकारासिद्धेर्याज्ञवल्क्येन व्रात्यस्तोम एवैको निरुक्तः प्रायश्चित्तत्वेन। अत एव वसिष्ठवचने उद्दालकव्रतादश्वमेधावभृथस्नानमधिकफलं ब्रह्महत्यादिमहापातकनिवर्तकस्य क्षुद्रोपपातकनिवर्तकत्वे सन्देहाभावादिति पठित्वा ततोऽप्यश्वमेधावभृथस्नानादतिप्रशस्तो व्रात्यस्तोम इति पश्चात्पाठो व्रात्यस्तोमस्याऽऽदृतः सङ्गतो भवति। अत एव च पारस्करसूत्रे आषोडशादित्यादिना पतितसावित्रीकत्वं निरुच्य पतितसावित्रीकताया उपपातकरूपत्वात् 'कालातिक्रमे नियतवत्' इति उपपातकनियतं यद्यत्प्रायश्चित्तं तद्वत् प्रायश्चित्तं विधेयमिति सामान्यप्रायश्चित्तमापस्तम्बसमं विधाय 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इत्यादिना 'कालातिक्रम' इत्युपपातकप्रायश्चित्तेन न विस्पष्टा शुद्धिरिति नोपनयनादिसंस्काराध्ययनादि भवितुमर्हतीति 'तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा' इति बालकपितृपितामहादीनां व्रात्यस्तोमोत्तरमुपनयनाध्ययनादित्यसकलसंस्कारार्हतेति मनसि निधाय व्रात्यस्तोममतिविशिष्टं याज्ञवल्क्यवचनवदेवादाय

बलवत्तरदोषेऽपि बहुजनव्रात्यतालक्षणे प्रायश्चित्तरूपस्यैकद्वित्रादि-व्रात्यतानिवर्तकता सहजसिद्धेति त्रिपुरुषमिति कथं सङ्गतं भवति ॥

अथ मनुवचनयोजना । आषोडशादित्यादि । अत्राङ्गादिविवेचनं पारस्करसूत्रवदेव । 'नैतैरपूतैर्विधिवत्' इति मनौ विशिष्य पतितसावित्रीकत्वनिवृत्तये याज्ञवल्क्यादिवत् प्रायश्चित्तं नाऽऽम्नातं, परन्तूपपातकत्वादस्योपपातकसामान्यप्रायश्चित्तं चान्द्रायणपराकादिकं याज्ञवल्क्योक्तं व्रात्यस्तोमोद्दालकव्रतादि च पतितसावित्रीकत्वदोषनिबर्हणायाऽभिप्रेतमिति नैतैरित्यादिना सूच्यते ।

येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥

इति मनुवचनं न पतितसावित्रीकत्वदोषपरिहारपरम् , अविध्युपनयने घनगर्जनादिना विध्युल्लङ्घनेनोपनयने कृच्छ्रत्रयानुष्ठापनेन पुनरुपनयनपरम् , इतरथा पतितसावित्रीकप्रायश्चित्तत्वे 'नानूच्येत यथाविधि' षोडशवर्षादिमध्ये उपनयनाभावात् कृच्छ्रत्रयानन्तरं यथाविधि षोडशवर्षमध्ये एवोपनयेदित्यर्थासङ्गतेः । अतीते षोडशे पुनः षोडशवर्षमध्यत्वसम्पादनायोगात् षोडशवार्षिकताया गतायाः पुनरागमनायोगात् । घनगर्जनादौ जाते उपनयने पुनर्घनगर्जनादिरहिते काले उपनयनं विधेयमिति तु सङ्गतं भवति । स्वाध्यायघनगर्जनादिरहितकालस्याभ्यां वर्तमानतया तत्प्रतीक्षणसम्भवात् । षोडशवार्षिकत्वे जातेऽष्टवर्षत्वादेः सम्पादनानर्हत्वादिति यावकव्रतपरं यमवचनमुपनयनोत्तरं दैवान्मानुषाद्वापराधात् पञ्चदशवर्षपर्यन्तं नित्यसन्ध्यावन्दनाविलोपे उपपातकत्वात्तत्प्रायश्चित्तपरम् । तदपि प्रायश्चित्तं 'कालातिक्रमे' इति सूत्रेणोपपातकसामान्यप्रायश्चित्तेन सह सङ्गृहीतं भवति । वसिष्ठवचने तूद्दालकव्रताश्वमेधावभृथस्नानव्रात्यस्तोमा विकल्पेन पतितसावित्रीकत्वप्रायश्चित्तभूता इति केचित् । उद्दालकव्रतेन सहाऽश्वमेधावभृथस्नानव्रात्यस्तोमान्यतरः

समुच्चित इत्यपरे । अश्वमेधस्नानव्रात्यस्तोमयोरतिविशिष्टत्वात्स्वतन्त्रावेव, नोद्दालकव्रतसमुच्चयापेक्षिणौ याज्ञवल्क्येन केवलव्रात्यस्तोमस्य परिग्रहादित्यन्ये ।

अत्रायं सङ्ग्रहः—याज्ञवल्क्यवचनेन व्रात्यस्तोमतः सर्वकर्मार्हतासूचनादुपनयनमध्ययनञ्च भवति । अत्र प्रथमपर्वाणि आपस्तम्बोक्तं ऋतुं त्रैविद्यकं ब्रह्मचर्यं यमोक्तं यावकव्रतं वसिष्ठोक्तमुद्दालकव्रतमुपपातकप्रायश्चित्तचान्द्रायणादिकञ्च याज्ञवल्क्योक्तव्रात्यस्तोमेन वैकल्पिकमुपनयनाधिकारसम्पादकम् । वेदाध्ययनाधिकारसम्पादकं पुनरापस्तम्बोक्तं संवत्सरोदकोपस्पर्शनम् । वसिष्ठोक्ताश्वमेधावभृथस्नानव्रात्यस्तोमान्यतरच्च वैकल्पिकम् । अथ द्वितीये पर्याये ऋतुं त्रैविद्यकं ब्रह्मचर्यं यमोक्तयावकव्रतं वसिष्ठोक्तोद्दालकव्रतञ्चेत्येतानि वैकल्पिकानि षड्गुणितानि पितृपितामहानुपनये उपनयनाधिकारकरप्रायश्चित्तानि । तत्र यथा 'प्रथमेऽतिक्रमे ऋतुरेवं वत्सर' इत्यापस्तम्बवचने 'यस्य पितामह' इत्युपक्रमात् 'तेषां प्रायश्चित्तम्' इति निर्देशात् त्रिभिरपि संवत्सरब्रह्मचर्यं कर्तव्यम् । तत्राऽयं विभागः—पितामहव्रात्यतानिमित्तमेकर्तुब्रह्मचर्यमुत्तरोत्तरं व्रात्यताभिवृद्धेर्बालकस्य वत्सरब्रह्मचर्यमपेक्षितम् । पितामहस्य पुनः स्वार्थमेकर्तुब्रह्मचर्यं व्रात्यतादशायां व्रात्यपुत्रोत्पादनात् व्रात्यताऽभिवृद्धेति द्व्यृतुब्रह्मचर्यं व्रात्यपुत्राद् व्रात्यपुत्रजननाद् व्रात्यतायाः पुनरतिवृद्धेः त्र्यृतुब्रह्मचर्यञ्चापेक्षितमिति संवत्सरब्रह्मचर्यमपेक्षितम् । पितुः पुनः स्वपितुर्व्रात्यतानिमित्तमेकर्तुब्रह्मचर्यं स्वार्थं द्व्यृतुब्रह्मचर्यं पुत्रार्थं त्र्यृतुब्रह्मचर्यं व्रात्यतादशायां स्वस्योत्पत्तेः स्वपुत्रोत्पत्तेश्चोत्तरोत्तरं व्रात्यताप्राबल्यात् । तथा च स्वस्यैव बालकस्याऽनुपनयने एकर्तुब्रह्मचर्यं, पितुश्चानुपनयने त्र्यृतुब्रह्मचर्यमिति विभजनीयम् । एवञ्च त्रयाणामपि बालकपितृपितामहानां व्रात्यतासु यावकादीनां षाड्गुण्यानि कथितानि । तत्र ऋतुब्रह्मचर्यवदेव स्वस्य बालस्य पितुश्च व्रात्यतायां त्रिगुणमेवानुष्ठेयमिति सिद्धम् । वेदा-

ध्ययनाधिकारसम्पादकं पुनरापस्तम्बोक्तपुरुषसङ्ख्याप्रमितवत्सरोदको- पस्पर्शनं वसिष्ठोक्ताश्वमेधावभृथस्नानं तदुक्तव्रात्यस्तोमो वा । अथ तृतीये पर्याये उपनयनाधिकारसम्पादकं द्वादशवर्षत्रैविद्यकं ब्रह्मचर्य- मापस्तम्बोक्तं, यमोक्तद्विसप्ततियावकव्रतानि, वसिष्ठोक्तद्विसप्तत्युद्दालकव्र- तानि याज्ञवल्क्योक्तव्रात्यस्तोमो वा । द्वादशवर्षब्रह्मचर्यव्रतादिनाऽतिक्ले- शादालस्यादिना सकृदेवैकस्मिन्दिने पावमान्यादिभिः स्नानं करोति चेत्तर्हि तद्दिनमारभ्यैव स्मार्तधर्मपरिग्रहाधिकारः। कालेत्याद्यनुसन्धे- यम्। कालातिक्रमे बहुकालरूपे यावकप्रत्याम्नायचतुर्दशप्राजापत्या- नि ग्राह्याणि। अल्पकाले सति उद्दालकव्रतप्रत्याम्नायसपाददशप्रा- जापत्यानि, एकर्तुब्रह्मचर्यप्रत्याम्नायप्राजापत्यानि, कालातिक्रमाल्प- त्वबाहुल्याभ्यां सपाद्दश चतुर्दश वा भवन्ति। अयञ्च विभागो बा- लक एव। पितृपितामहव्रात्यतायां चतुर्दशप्राजापत्यान्येव भवेयुः, कालदैर्घ्यनैयत्यादित्यनुसन्धेयम्। पूर्वं महत्तरव्रतानुष्ठानादेनसां नि- वृत्तेरल्पमात्रे एनसि सति तत्रालस्यादिना सकृदेव स्नानात्स्मार्त- धर्मपरिग्रहेण कालयापने कालान्तरं सम्पूर्णोदकस्पर्शादध्ययनं स- म्पादनीयमितीच्छायां सत्यां सम्पूर्णोदकस्पर्शमन्तराऽस्मिन्दिवङ्गते सति स्मार्तानुष्ठानकाले जातपुत्रस्य संस्कारो 'यथा प्रथमेऽतिक्रमे' इति निर्देशात् पितुरुपनयनपर्यन्तमनुष्ठानेन पुत्रस्याप्युपनयनपर्यन्ता- धिकाराद्उपनयने जाते पश्चादध्ययनाय पित्रा सम्पूर्णोदकस्पर्शाकर- णात् पुत्रस्य संवत्सरपर्यन्तोदकोपस्पर्शोऽध्ययनेऽधिकारः । तत्पुत्रा- दूर्ध्वन्तु प्रसिद्धद्विजपुत्रादीनां यथातथैव कर्तव्यं स्वाभाविकमेव। एवञ्च पितुरपि पूर्वमुपनयनात् द्वादशवर्षव्रतेनैव सर्वैनसां विलयात् स्वल्पैनस्त्वात्प्रथमपर्याये यत्संवत्सरोदकोपस्पर्शनं तावतैवाध्ययना- धिकार इति गमितम्। तत्रालस्यादिना कालान्तरे उदकोपस्पर्शनं विधेयमितीच्छायामेव मरणे तत्पुत्रे संवत्सरोदकोपस्पर्शनेनाऽध्यना- धिकारे पितुः सुतरां संवत्सरोपस्पर्शनेनाऽधिकारौचित्यात्। एवं

तृतीये पर्याये न स्नाने गौरवं किन्तु प्रथमपर्यायवदेव स्नानं ब्रह्मचर्यादावेवाऽतिगौरवपरिग्रहात् । एवञ्च संवत्सरस्नानं तत्समकल्पमश्वमेधावभृथस्थानं व्रात्यस्तोमो वैकोऽध्ययनाधिकारहेतुरिति विवेचनीयम् । तत्र संवत्सरोदकोपस्पर्शे त्रिषवणमुदकोपस्पर्शनिर्देशात् दिनचतुष्टयेनैकं प्राजापत्यं द्वादशस्नानेनैकप्राजापत्यस्मरणात् । तथा च संवत्सरस्नानस्य नवतिप्राजापत्यानि भवन्ति । यमोक्तयावकव्रतप्रत्याम्नायानि चतुर्दश प्राजापत्यानि । उद्दालकव्रतप्रत्याम्नायानि सपाददशप्राजापत्यानि । संवत्सरस्नानस्थानेऽश्वमेधावभृथव्रात्यस्तोमयोर्विसिष्टेन निर्देशात् त्रयं समबलमेव ॥

अथ 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इत्यत्र पतितसावित्रीकाणां चतुराद्याधिक्येऽपि व्रात्यस्तोमनिमित्तमस्ति 'ऐन्द्राग्नस्थल इव' इत्युक्तं, तत्कथमिति चेदित्थम् । तथा हि-'ऐन्द्राग्नम्पुनरुत्सृष्टमालभेत य आतृतीयात्पुरुषात्सोमं न पिबेत्' इति सोमपानाभाव ऐन्द्राग्नप्रयोजक उक्तः । एवम्-'आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' इति दौर्ब्राह्मण्यसमेता सोमपिपासा आश्विनप्रयोजिकोक्ता । एवम्—

> यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
> स वै दुर्ब्राह्मणो नाम न सोमं पातुमर्हति ॥

'यश्चैव वृषलीपतिः', 'सर्वकर्मबहिष्कृत' इति पाठभेदः । तत्रानया स्मृत्या दौर्ब्राह्मण्यं समाम्नातम् । अत्रैन्द्राग्नाश्विनप्रयोजके स्मार्तेश्चेत्येतानि दौर्ब्राह्मण्यानि त्रीणि किं विजातीयानि । किं वा सर्वमेकविधमेव दौर्ब्राह्मण्यमाहोस्वित् नानापि दौर्ब्राह्मण्यानि द्वैरात्रनयेन ऐन्द्राग्नप्रयोजकतयाऽऽश्विनप्रयोजकतया च श्रुतिभ्यां परिगृहीतानि । स्मृतिस्तु श्रुतिद्वयानुमतदौर्ब्राह्मण्यद्वयप्रकाशिकेति विषये प्रमाणभेदादिह त्रीणि दौर्ब्राह्मण्यानीति कश्चित् । तन्न, त्रिभिरपि प्रमाणैर्न त्रिविधं दौर्ब्राह्मण्यं प्रतिपाद्यते, किन्तु श्रुतिभ्यां द्वे दौर्ब्राह्मण्ये प्रतिपा-

ध्येते । स्मृतिस्तु द्विविधदौर्ब्राह्मण्यानुवादिका, न तु तृतीयं दौर्ब्राह्मण्यं प्रतिपादयति । तद्दौर्ब्राह्मण्ये निमित्ते नैमित्तिकस्यापरस्याऽकथनात् । तत्र स्मृतावैन्द्राग्नो वेदीसम्बन्धविच्छेदनिमित्तकः । वेदीविच्छेदश्च सोमविच्छेदलक्षण एव । 'ऐन्द्राग्नं पुनरुत्सृष्टम्' इति मूलभूतश्रुत्या सोमपानाभावस्य निमित्तत्वेन स्पष्टं प्रत्यायनात् । आश्विनस्तु पशुर्दौर्ब्राह्मण्यनिमित्तकः । यस्य वेदश्चेति स्मृत्या वेदच्छेदस्य दौर्ब्राह्मण्यसम्पादकतया प्रत्यायनात्तद्दौर्ब्राह्मण्यस्य 'आश्विने अश्विनम्' इत्यादिश्रुत्या निमित्तप्रत्ययात् । अथ यस्य वेदश्चेति स्मृत्या वेदवेदीविच्छेदस्य दौर्ब्राह्मण्यहेतुत्वेन प्रत्यायनात् सोमविच्छेदस्य च वेदविच्छेदान्तर्गतत्वादश्विनमित्यादिश्रुतिविहिताश्विनेनैव वेदवेदीविच्छेदजनितदोषसामान्यनिवृत्तेराश्विने कृते नैन्द्राग्नः कर्तव्य इति चेत्, निमित्तभेदादुभावपि समुचितावैन्द्राग्नाश्विनावित्युपदेश इति केचित् ॥

अत्रायमाशयो माधवाचार्योल्लिखितः-'पुनरुत्सृष्टे पशौ विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्नातृतीयात्पुरुषात्सोमं न पिबति' इति निर्देशेन सोमपानविच्छेदप्रयुक्तदौर्ब्राह्मण्येन क्रत्वनधिकार इत्यैन्द्राग्नेन क्रत्वधिकारः सिध्यति । आश्विने तु 'यो दुर्ब्राह्मणः सोमं पिपासेत्' इति निर्देशात् सोमपानश्रद्धालुत्वे सति दुर्ब्राह्मणोऽधिक्रियते । एवञ्च ब्रह्मवर्चसप्रतिबन्धकीभूतदौर्ब्राह्मण्यापनुत्तये आश्विनः पशुः, क्रत्वधिकारप्रतिबन्धकीभूतदौर्ब्राह्मण्यहरणायैन्द्राग्नः पशुरिति सिद्धं भवति । तत्राश्विनवाक्ये प्रान्ते 'यद्धूम्रो भवति धूम्रिमाणमेवास्मादपहन्ति ललामो भवति मुखत एवास्मिन् तेजो दधाति इति वचसि पशोर्धूम्रवर्णेन दौर्ब्राह्मण्यलक्षणं धूम्रिमाणं मालिन्यमस्माद्यजमानादपहन्ति ललामशौक्ल्येन त्वस्मिन् यजमाने मुखत एव मुख्यमेव ब्रह्मवर्चसलक्षणं तेजो दधातीत्यर्थके ब्रह्मवर्चसफलस्य स्पष्टत्वादब्रह्मवर्चसप्रतिबन्धकीभूतदौर्ब्राह्मण्यसामान्यमाश्विनेन निवर्त्यते । अत्रैन्द्राग्नाश्विननिवर्त्यं दौर्ब्राह्मण्यद्वयं यस्य वेदश्चेति स्मृत्या

निरूपितम्। अत्र वेदविच्छेदकथनादेव वेदिविच्छेदस्याऽप्यर्थसिद्धत्वाद्वेदपूर्वकत्वाद्वेदेः पुनरपि वेदिविच्छेदकथनमर्थभेदसूचनार्थैव भवति। तत्र वेदस्याध्ययनद्वारा ब्रह्मवर्चससम्पादकत्वं मन्त्ररूपपदार्थविषया अर्थज्ञानद्वारा च कर्मोपयोगित्वञ्चेति द्वे रूपे भवतः। तत्र कर्मोपयुक्तरूपद्वारा वेदिनिर्वर्तकत्वं, रूपान्तरेण ब्रह्मवर्चसहेतुत्वम्। तत्र वेदविच्छेदकथनं ब्रह्मवर्चसप्रतिबन्धकीभूतदौर्ब्राह्मण्यपरम्। वेदिविच्छेदकथनन्तु क्रत्वनधिकारनिमित्तभूतदौर्ब्राह्मण्यज्ञापकम्। एवं वेदी चेति चकारेणैवोक्तसमुच्चयसम्भवाद्वेदश्चेति चकारोऽनतिप्रयोजनः सन्ननुक्तसमुच्चयपरः। एवञ्च 'यथाकानायथाचाना'इतिश्रुतिगमिताचारस्य शीलादिलक्षणस्य समुचितस्य विच्छेदो वेदविच्छेदसमो व्रात्यस्तोमनिवर्त्यव्रात्यतारूपस्ताण्डिब्राह्मणेन परिगृहीत इह सङ्गृहीतो भवति। अत्र 'आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' इत्यत्र पिबेदित्यनुक्त्वा पिपासेदिति सनो निर्देशात् प्राथमिकक्रतुप्रयोगेच्छैव परिगृहीता भवति न तु तदुत्तरक्रतुप्रयोगेच्छापि। 'अश्विनौ वै देवानामसोमपावास्तां तौ पश्चात्सोमपीथं प्राप्नुतामश्विनावेतस्य देवता' इति वाक्यशेषे प्रथमसोमपानस्यैव प्रत्यायनेन तद्देवताकयजमानस्यापि यादृक्कौचित्यात्। अत्र वेदादिविच्छेदमूलकदौर्ब्राह्मण्यनिबर्हणाधीयमानब्रह्मवर्चसफलाय प्राथमिकसोमप्रयोगमाश्रित्याश्विनो विधीयते। तत्र 'सप्तदशारत्निर्वाजपेयस्य यूपः' इत्यत्र साक्षाद्वाजपेये साप्तदश्यान्वयायोगेऽपि तदङ्गपशुद्वारा यथाऽन्वयस्तथा साक्षात्सोमस्य पश्वाश्रयत्वाभावेऽपि सामाङ्गभूताग्नीषोमीयतन्त्रद्वाराऽऽश्रयत्वङ्घटते। ननु सवनाय पशुतन्त्रमेव कुतो नाश्रयः, अग्नीषोमीयपर्यन्तानुधावने को हेतुरिति चेत्सत्यं, पिपासेदिति स्पष्टमिच्छाकालिकसोमाङ्गाश्रयणस्य सूचनात्। सवनीयपशुकाले ऋत्विक्कर्तृकसोमयागस्य शास्त्रयजमानानुमतिपूर्वकस्य प्रवृत्तत्वेन पिपासेदित्यस्य सोमप्रवृत्तीच्छयेत्यनिच्छाकालत्वाभावात्सवनीयपशोराश्र-

थत्वं प्रमाणाननुरूपमेवेत्यग्नीषोमीयस्यैवाश्रयत्वं प्रमाणानुगुणत्वात्परिग्राह्यम्। तथा चाऽऽश्विनपशुवचनं गुणफलविधिर्गोदोहनेन पशुकामस्येति वचनवदिति सिद्धं भवति। ऐन्द्राग्नस्तृतीयपुरुषपर्यन्तसोमविच्छेदसम्भूतदोषोपशमनद्वारा सोमाधिकारसम्पादकत्वादाधानोत्तरं सोमात्पूर्वं यथायोगं कर्तव्यो भवति। आश्विनः पुनरग्नीषोमीयकाल एव प्रथमसोमाश्रयकत्वात्। एवञ्च प्रथमसोमात्पूर्वभाविब्रह्मवर्चसाभावनिदानीभूतदौर्ब्राह्मण्यप्रथमसोमाश्रितेनाश्विनेन निवर्तते। तथाचाश्विनः काम्यो गोदोहनवत्, न तु क्रत्वनधिकारहेतुदौर्ब्राह्मण्यनिवर्तकः। ऐन्द्राग्न एव तादृग्दौर्ब्राह्मण्यनिवर्तनद्वाराऽधिकारसम्पादकः। अत एव कात्यायनेन क्रत्वनधिकारव्यावर्तनद्वाराऽधिकारसम्पादनपर ऐन्द्राग्न एव सूत्रितो न त्वाश्विनः। यदि वाऽऽश्विनोऽप्यैन्द्राग्नवदधिकारे हेतुः स्यात्समुच्चित्य तर्हि 'सर्वशाखाप्रत्यय' न्यायेन क्रत्वधिकारप्रतिपत्तये ऐन्द्राग्नवदाश्विनोऽपि सूत्रितः स्यात्, न तथा, तस्मादाश्विनो ब्रह्मवर्चसप्रतिबन्धकीभूतदोषनिर्हरणपरत्वेन भिन्नफल एव। अत एव कात्यायनिनः केवलैन्द्राग्नानुष्ठानेनैव क्रतुं सगुणं मन्वते। एवञ्च कात्यायनिनामितरेषां वा ब्रह्मवर्चसप्रतिबन्धकीभूतदोषनिर्हरणकामनायां प्रथमसोमप्रयोगे सति पशुराश्विनः कर्तव्यः। ऐन्द्राग्नेनैव प्रथमप्रयोगे सति तु ब्रह्मवर्चसप्रतिबन्धकीभूतो दोषस्तदवस्थ एव भवेत्। प्रथमसोमोत्तरं ब्रह्मवर्चसप्रतिबन्धकदोषनिर्हरणकामनायां तु ताण्ड्यब्राह्मणाद्युक्तव्रात्यस्तोमादय एवाऽनुष्ठेयाः। तत्र व्रात्यता नानाविधा। तृतीयपुरुषपर्यन्तवेदाचारादिविच्छेदस्ताण्ड्युपात्ता चेति। तत्रानुपनयनादिप्रयुक्तव्रात्यतादिनिवृत्तावपि तत्तत्प्रमाणप्रवर्तनं समर्थमिति विवेकः।

त्रिकाण्डमण्डनास्तु पक्षान् बहूनिह साक्षिक्षिपुः।
एकस्य सोमविच्छेदे केचिदैन्द्राग्नमब्रुवन्।
त्रयाणां सततं लुप्ते सोमे त्वैन्द्राग्नमाश्विनम्॥

पिता पितामहो वापि सोमं यस्य न पीतवान् ।
दुर्ब्राह्मणं तमाचष्टे कर्कः शाखान्तरश्रुतेः ॥ इति ।

गोपालस्तु—

सोमेन यक्ष्यमाणस्य यस्य पित्रादयस्त्रयः ।
नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमपः ॥
आलभेत स ऐन्द्राग्नमवशीर्णगवं पशुम् ।
पुनरुत्सृष्टवाच्यो हि बाहोत्सृष्टः पुनर्वहन् ॥
छागेऽपि संभवत्येतद्ब्रहत्येव हिमाचले ।
स्वकण्ठेन भरद्वाजः सुस्पष्टमिदमब्रवीत् ॥
विच्छिन्नसोमपीथो वा दुर्ब्राह्मण इतीरितः । इति ।

अत्र 'य आतृतीयात्पुरुषात्सोमं न पिबेत्' इत्यत्र यष्टुः पुरुषात्तृतीयः पितामहः । आङ् मर्यादायाम् । एवञ्च पितुः सोमपानाभावे ऐन्द्राग्नः । अयमर्थ एकस्येति प्रथमकल्पेन गृहीतः । यदि चाङभिव्याप्तौ, तर्हि पितृपितामहयोः सोमापाने ऐन्द्राग्नः । अममर्थः पितेत्यादितृतीयकल्पेन गृहीतः । यदि च यष्टारमपहाय पितरमारभ्य त्रिपुरुषपरिग्रहस्तर्हि प्रपितामहपर्यन्तं सोमापाने ऐन्द्राग्नः । अयमर्थस्त्रयाणां पित्रादयस्त्रय इत्येताभ्यां परिगृहीतः । तत्र 'विच्छिन्नसोमपीथो वा दुर्ब्राह्मण इतीरित' इति पक्षेण दौर्ब्राह्मण्यहराऽऽश्विनस्यैन्द्राग्नेनाऽसोमपबाहुल्यात्समुच्चितः । अयमर्थस्त्रयाणामिति मध्यकल्पेन सङ्गृहीतः । तत्र कर्कपक्ष एव साधुः, यष्टुरेव तृतीयावधित्वौचित्यात् । यस्य पिता न सोमं पिबेदिति स्पष्टमनुक्त्वा आतृतीयादिति गुरुतरनिर्देशेनाऽऽङोऽभिव्याप्तिपरत्वौचित्यात् । असोमपबाहुल्याद्दौर्ब्राह्मण्येनाश्विन इत्यप्यसङ्गतं कात्यायनसूत्रविरोधात् । तत्राऽसोमपत्वदोषपरिहारायाश्विनाश्विबन्धनात् । अत एव दौर्ब्राह्मण्यं नाऽसोमपत्वप्रयुक्तं किन्तु वेदाचारविहीनत्वप्रयुक्तम् । ब्रह्मवर्चसाभावबीजभूतकलुषं विलक्षणमिति विवेकः ॥

केचित्तु—

सावित्रीमात्रसारोऽपि नाऽसौ दुर्ब्राह्मणो भवेत्।

इति स्मृतेरतिक्रान्ते सावित्र्याः काले 'यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इति आपस्तम्बवचनात्,

आषोडशादाद्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।

इति याज्ञवल्क्यवचनात्,

आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते।
आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः।

इति मनुवचनतः, 'अत ऊर्ध्वं पतितसावित्रीका भवन्ति' इति पारस्करवचनात् मानान्तैरश्च ज्ञापितदौर्ब्राह्मण्यनिवृत्तयेऽपि आश्विनः पशुः। ऐन्द्राग्नस्तु सोमविच्छेदप्रयुक्तत्वनधिकारपरिहारायेत्याहुः॥

तदेतदतिपेशलं, 'सावित्रीमात्रसारोऽपी'ति स्मृति'र्नासौ दुर्ब्राह्मणो भवे'दिति पातित्याभावमेव ब्रूते न तु ब्रह्मवर्चसप्रतिबन्धकीभूतदौर्ब्राह्मण्याभावम्। 'यस्य वेदश्च वेदी चे'ति स्मृतिरन्यथाऽनर्थिकैव भवेत्। एवं 'यो दुर्ब्राह्मणः सोमं पिपासेत्' इति वाक्ये सोमं पिपासेदित्यंशोऽनर्थकः स्यात्। 'आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मण' इत्येतावतैवाऽभिमतार्थलाभसम्भवात्। अतः प्रागुक्तरीत्यैवाश्विनविनियोगः समुचित इति दिक्॥

अथ 'य आतृतीयात्पुरुषात्सोमं न पिबेत्' इत्यत्र तृतीयपुरुषं मर्यादीकृत्याऽभिव्याप्तीकृत्य वा सोमपानाभावस्यैन्द्राग्ननिमित्तत्वात् पुरुषत्रयादूर्ध्वमपि सोमपानाभावे कथमैन्द्राग्नानुष्ठानं निमित्ताला-भादिति चेत्सत्यम्, सहस्रे शतसङ्ख्यावद्बहुपुरुषाणां ब्रह्मसृष्टिमारभ्य

प्रवृत्तानां सोमपानाभावे सति तत्र त्रिपुरुषसोमपानाभावोऽपि सिद्ध इति निमित्तसत्त्वादैन्द्राग्नो भवेदेव । न च त्रिपुरुषोर्ध्वमधिकपुरुषसोमपानाभावे एनसो बाहुल्यादेकेनैन्द्राग्नेन तदेनसः कथं विलय इति वाच्यम्, सोमपानाभावबाहुल्यप्रयुक्तैनसां बहुत्वेऽपि सर्वैनसां सन्निधाने जायमानैन्द्राग्नादृष्टवशतो नाशसम्भवात् । अतिक्षुद्राग्निकिरणस्पर्शमात्रेण तूलराशेरल्पस्य महतो वा नाशे भेदाभावात् । एवं त्रिपुरुषमित्यादि पारस्करसूत्रमपि योजनीयम् । कालातिक्रमे नियतवदिति सूत्रं बालकस्यैकस्य पितुश्च द्वयोः पितामहस्य च त्रयाणां पतितसावित्रीकत्वप्रायश्चित्तपरम् । यद्यप्याषोडशादित्युपक्रम्याऽत ऊर्ध्वमित्यनेन बालकस्यैव पतितसावित्रीकत्वमित्युक्त्वा कालातिक्रम इति सूत्रं पठितं बालकस्यैव पतितसावित्रीकत्वप्रायश्चित्तपरं भवितुमर्हति, तथापि त्रिपुरुषं पतितसावित्रीकाणामिति त्रिपुरुषपतितसावित्रीकापत्यप्रायश्चित्तविधानेन प्रथमप्रायश्चित्तस्य पुरुषत्रयसाधारणत्वौचित्यात् । अथ कालातिक्रमे नियतवदिति पुरुषत्रयपर्यन्तपतितसावित्रीकप्रायश्चित्तं त्रिपुरुषपर्यन्तं भवेदेव । त्रिपुरुषादूर्ध्वं पतितसावित्रीकत्वे तु नानेन प्रायश्चित्तेन शुद्धिः, तेन नोपनयनसंस्कारो न वाऽध्यापनं किन्तु व्रात्यस्तोमेनेत्याह त्रिपुरुषमिति । संस्कारो नाऽध्यापनञ्च नेत्यन्वयः। तेषां चतुर्णां मध्ये जनः कोपि व्रात्यस्तोमेनेष्ट्वा संस्कारेप्सुर्भवेत् उपनयनसंस्कारेच्छुर्भवेत् । व्रात्यस्तोमं विनोपनयनेच्छा न कार्येत्यर्थः । तत्र प्रमाणमाह काममिति । 'काममधीयीरन् व्यवहार्या भवन्ति' इति वचनात् । ताण्डिब्राह्मणवचनतात्पर्यादिति भावः। ताण्डिब्राह्मणे ईदृशवचनाभावेन वचनादित्यनेन वचनतात्पर्यादिति लक्षणादिति विवेचनीयम् । अत्राऽनेकपतितसावित्रीकाणां त्रिपुरुषं पतितसावित्रीकोऽपि भवतीत्यैन्द्राग्नपशुन्यायेन सर्वैनसां व्रात्यस्तोमेन नाशः सम्भवति । विस्फुलिङ्गसम्पर्कतस्तूलराशेरल्पस्य महतो वा नाशदर्शनेन व्रात्यस्तोमाग्निना सर्वव्रात्यतातूलानां

युगपदेव विलयनात्। एवञ्चोपनयनाध्ययनाद्यधिकारः सम्भवति, सर्वस्मादपि प्रायश्चित्ताद्व्रात्यस्तोमस्य बलवत्तमत्वात्। एतत्तुल्यप्रायश्चित्तस्याऽपरस्यालीकत्वात्। अत एव याज्ञवल्क्येन प्रथमपर्वण्यपि व्रात्यस्तोमः प्रायश्चित्तमिति गमितम्। आपस्तम्बसूत्रे 'वर्षा रथकारस्य ये त्रयाणां वर्णानामेतत्कर्म कुर्युस्तेषामेव काल' इति त्रयाणां वर्णानामन्तर्भूता ये रथङ्कुर्वन्ति ते रथकारा इत्यर्थ इति व्याख्यातारः। आश्वलायनसूत्रे 'ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्योपकृष्टा' इति उपकृष्टो रथकारो वैश्यस्तक्षकर्मोपजीवीति तद्व्याख्यायां पूर्वतन्त्रे षष्ठेऽध्याये 'सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात् प्रतीयेरन्, इति।

मनौ—

व्रात्यात्तु जायते वैश्यात्सुधन्वाचार्य एव च।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च॥ इति।

एवञ्च मनूक्तो यः सुधन्वा व्रात्यवैश्यपुत्रस्तत्पुत्राः सौधन्वना ऋभवः। 'ऋभूणान्त्वे'त्याधानमन्त्रानुगृहीतास्ते शुद्धत्रैवर्णिकेभ्य आचारादिमद्भ्यो विवाहितायां सवर्णायां जाता अपि हीना आचाराद्यभावात्। तेषां विना प्रायश्चित्तमधिकाराभावादाधानान्तरं वर्षासु विधीयते। ते च 'रथकाराः नेमिं नयन्ति, इति ऋभूणामेव सौधन्वनानां निर्देशेन मन्त्रवर्णत एव रथकरणयोगसूचनात्। एवञ्च सवर्णायां सवर्णाद्विवाहितायामेवोपनयनसंस्काररहिता व्रात्यपरम्परागता रथकारा भवन्ति। आपस्तम्बवचनात्तु ब्राह्मणादिभ्यस्त्रिभ्योपि व्रात्येभ्यः सवर्णासु विवाहितासु जाता निरुपनयना रथकारा इति सिध्यति। आश्वलायनवचनमपि मनुवचनसमत्मेव नेयम्। मनौ पूर्वमुपनयनप्रकरणे आषोडशादित्यादौ कालातिक्रमे व्रात्यतायाः प्रायश्चित्तेन तत्परिहारस्य च निर्देशेन ताण्ड्यब्राह्मणोक्तव्रात्यस्य काप्यपरिग्रहात्, मनुवचनगतव्रात्यपदं निरुपनयनत्वापत्तेर्व्रात्यतापरं, न तु ताण्ड्यकथितपरम्। उपनयनाभावेन व्रात्यत्वेऽपि विवाहितसवर्णायामेव सन्तानपरम्परेति त्रैव-

र्णिकत्वेनाऽऽपस्तम्बनिर्देशः । आश्वलायनवचनेऽपि क्षत्रियवैश्याभ्यां सह-पाठश्च रथकारस्य त्रैवर्णिकत्वनिर्णायक इति विवेकः ॥

याज्ञवल्क्ये—

वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ ।
वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ॥
माहिष्येण करण्यान्तु रथकारः प्रजायते ।

इति समुपात्तो रथकार आधानेन ग्राह्यो रथकारपदरूढिमत्त्वेऽपि छागन्यायेन मन्त्रवर्णोदितस्यैव परिग्राह्यत्वेन याज्ञवल्क्योदितरथकार-स्य मन्त्रवर्णविरुद्धत्वात्। शङ्खः—'क्षत्रियवैश्यानुलोमानन्तरोत्पन्नजो रथ-कारस्तस्याध्ययनेज्यादानोपनयनसंस्कारक्रियाश्चाऽप्रतिषिद्धा रथसू-त्रवास्तुविद्यध्यायनवृत्तिता च' इति । एवमेव वसिष्ठेपि । इदं वचनद्वयमपि प्रत्यक्षमन्त्रवर्णविरोधात् याज्ञवल्क्योक्तरथकारपरिग्रहायोगात् 'वर्षासु रथकार' इति वचसो मनूक्तपरत्वात् रथकारपदभ्रमायत्ततयाऽऽधान-स्योपनयनाद्याक्षेपकत्वसामर्थ्याभावेन तदाक्षेपकत्वभ्रमायत्ततया च न्यायाभासमूलकं विवेचनीयम् । एवं बौधायनसूत्रमपि रथकारोपनय-नादिपरं न्यायाभासायत्तमिति दिक् ॥

'अथाधावेति शूद्रस्य अष्ठीवद्घ्नं शूद्रस्य मस्तु शूद्रस्य' इति श्रुतौ लिङ्गदर्शनात् परम्परया शूद्रासम्बन्धात् याज्ञवल्क्योक्तरथकारस्या-धानोपनयनादिकं श्रुत्यनुमतमेव । अत एवाऽऽपस्तम्बोपि दर्शपूर्णमास-प्रकरणे—'एहीति ब्राह्मणस्याऽऽगहीति राजन्यस्याऽऽद्रवेति वैश्यस्याऽऽ-धावेति शूद्रस्येति' शूद्रस्य दर्शपूर्णमासाधिकारं सूचयति स्मेति चेत्, सर्वमिदं श्रुत्यननुमतमेव । तथा हि शतपथदर्शपूर्णमासप्रकरणे—'अथ ह-विष्कृत मुदादयति हविष्कृदेहीति वाग्वै हविष्कृद्वाचमेवैतद्विसृजते वा-ग्वै यज्ञस्तद्यज्ञमेवैतत्पुनरुपह्वयते' इति हविष्कृदाह्वानकाले वाग्विसर्गात् मन्त्रादिवागधीनत्वाद्यज्ञानुष्ठानस्य हविष्कृद्वाग्विसर्गयोः समकालत्वा-त् वागर्पणैवं मन्त्रोपात्ता हविष्कृत्संस्तुता तदनन्तरञ्चैहीति मन्त्र-

गतपदप्रशंसार्थं प्रवृत्तं ब्राह्मणं, 'तानि वा एतानि चत्वारि वाचः एहीति ब्राह्मणस्यागह्याद्रवेति वैश्यस्य राजन्यबन्धोश्चाधावेति शूद्रस्य स यदेव ब्राह्मणस्य तदाह तद्धि यज्ञियतममेतदुह वै वाचः शान्ततमं यदेहीति तस्मादेहीत्येव ब्रूयादिति'। अत्र राजन्यबन्धोरिति निर्देशादुत्तमक्षत्रियस्येदृशमाह्वानं न भवतीति गमितम्। आगह्याद्रवेति युगपन्निर्देशात् ब्राह्मणशूद्रयोरिव पृथक्शब्दनिर्देशाभावादेतत्पदद्वयमुभयत्रापि समानमिति ज्ञापितम्। अत एवोत्तमक्षत्रियत्वाभावाद्वैश्यनिर्देशोत्तरमेव राजन्यबन्धोः पाठः कृतो वैश्यादपि जघन्यतासूचनेन वैश्यपदार्हतापि भवति। राजन्यबन्धोर्यत्पदं तत्पदं तत्पदार्हता वैश्यस्यापीति ज्ञापनाय। अत एवाऽऽपस्तम्बेन राजन्यवैश्ययोर्व्यत्ययेन पदनिर्देशः कृतः। अत्र मन्त्रगत एहीतिपदस्य नित्यवच्छ्रुतस्य लौकिकब्राह्मणाद्याह्वानवाक्चतुष्टयानुवादेन वाक्त्रयस्य एहीत्येव ब्रूयादिति निराकरणपूर्वकं यज्ञियत्वादिगुणेन प्रशंसा कृता क्रतौ नित्यता च गमिता। अत एव कात्यायनेन शतपथभावाभिज्ञैर्नैहीति वागेव क्रत्वङ्गत्वेन परिगृहीता। आगह्यादिवाक् चापरिगृहीता। आपस्तम्बवचनन्तु तैत्तिरीये क्वापि वाक्चतुष्टयस्यापि क्रत्वङ्गतानवबोधनादेहीत्यस्यैव तदङ्गताविधानात् शतपथवचनं सामान्यतः प्रतीयमानन्यायाभासमूलकमेव। एवं चयनप्रकरणे स्मशाने चयनाय वेदिपरिमाणमाम्नायते। शतपथे–'यावानुद्बाहुस्तावत् क्षत्रियस्य कुर्यात् मुखदघ्नं ब्राह्मणस्योपस्थदघ्नं स्त्रिया ऊरुदघ्नं वैश्यस्याऽष्ठीवद्दघ्नं शूद्रस्यैवं वीर्या ह्यते' इति। अधोजानु त्वेव कुर्यादिति। अत्र चयनं कर्तुं स्मृतिप्राप्तवेदिरनूद्यते। तत्र सर्वजातिसाधारण्येन वेद्यनुवादेऽपि त्रैवर्णिकानामेव चयनं सिद्ध्यति, न रथकारस्य, तस्येतरानाहितब्राह्मणानामिव स्मृतिसमायत्तवेदिकामात्रानुवाद एव। एवं कात्यायनसूत्रमपि श्रुतिवदेव योजनीयम्। तथा हि–'ऊर्ध्वप्रमाणमास्यं ब्राह्मणस्य, उरः क्षत्रियस्योर्ध्वबाहुर्वा, ऊरू वैश्यस्य, उपस्थः स्त्रियाः, जानुः

पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य, मस्तु शूद्रस्य' इति । अत्र ब्राह्मणादिवर्णानां लौकिकनियमाद्यङ्गभूतपयआदिकं वर्णचतुष्टयोचितमनूद्य सम्भावितक्रतूनां त्रैवर्णिकानां पयआदित्रयं क्रतौ नियम्यते । न त्वेतावता शूद्रस्य क्रत्वधिकारः सिध्यतीति दिक् ॥

वस्तुतस्तु यदि शङ्खवसिष्ठबौधायनवचस्सु याज्ञवल्क्योक्तो माहिष्यकरणीभवः परम्परया शूद्राभवो न गृह्यते किन्तु वैश्याक्षत्रियभवमाहिष्यस्य वैश्यायाञ्जातो रथकार इति तर्हि तस्य भवतु नामाऽध्ययनाद्यधिकारः । 'वर्षासु रथकार आदधीत' इति वचने तु मन्त्रवर्णानुरोधान्मनूक्तरथकार एव ग्राह्यो न तु शङ्खाद्युक्त इति दिक् ॥

अथ वसिष्ठवाक्ये उद्दालकव्रताश्वमेधावभृथस्नानव्रात्यस्तोमाः परिदृश्यमानाः परस्परं वैकल्पिकास्सन्तः साऽध्ययनोपनयननिमित्तभूता भवन्तु किमित्युद्दालकव्रतमुपनयननिमित्तमश्वमेधावभृथस्नानव्रात्यस्तोमान्यतरोऽध्ययनाङ्गमापस्तम्बवचनपरिपाट्येत्युच्यते । आपस्तम्बवचनमुखनिरीक्षणमन्तरैव वसिष्ठवचनप्रवृत्तौ बाधकाभावात् । अपि च—

सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ।

इति याज्ञवल्क्यवचनं,वसिष्ठवचनञ्च 'व्रात्यस्तोमेन वा यजेत' इत्येवं लक्षणं ताण्डिश्रुतिमूलकमेव भवदुपनयननिमित्तं भवतु न तु व्रात्योपनयनोत्तरभाविनोऽध्ययनस्य निमित्तम् । 'हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति न हि ब्रह्मचर्यञ्चरन्ति' इति ब्रह्मचर्यस्योपनयनावलम्बिनोऽभावेन व्रात्यतासूचनेन निरुपनयनत्वप्रयुक्तव्रात्यतापरिहारपरत्वेनैव व्रात्यस्तोमस्य ताण्ड्यब्राह्मणेन विधानमावृत्तमिति प्रत्ययादिति चेद्-त्रोच्यते, ताण्ड्यब्राह्मणं तावदुपनयनकालापराधप्रयुक्तव्रात्यतापरिहाराय न व्रात्यस्तोमान् विधत्ते ताण्ड्यभावाभिज्ञैः कात्यायनाऽऽपस्तम्बशाङ्खायनादिभिरन्यथैव तद्योजनसूचनात् । तथा हि ताण्ड्यब्राह्मणे सप्तदशेऽध्याये प्रथमतश्चतुर्भिः खण्डैः क्रमेण चत्वारो व्रात्यस्तोमाः समाम्नाताः-'देवा वै स्वर्गं लोकमापन्' इत्यादिना । तत्र प्रथमे खण्डे

'हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति न हि ब्रह्मचर्यञ्चरन्ति न कृषिं न वाणिज्यां षोडशो वा एतत्स्तोमः समाप्तुमर्हति' इति व्रात्यस्तोमे चतुर्विधे षोडशस्तोमके व्रात्यानां समान्यतोऽधिकारमुक्त्वा 'भूतौ प्रतिष्ठापयति' इत्यन्तेन ग्रन्थेन व्रात्यस्तोमचतुष्टयसाधारण्येन पित्रादिलक्षणदेवानां मरुताञ्च संवादः षोडशस्तोमस्य छन्दसश्च स्वर्गयोग्यस्य मरुद्भ्यो लाभः स्तोत्रीयाऋग्भेदोऽनेकयजमानकत्वं सामभेदो निधनविभेदश्च प्रपञ्चितः । तदनन्तरञ्च 'गरगिर' इत्यादिना खण्डान्तेन प्रथमतो निरुक्तव्रात्यस्तोमचतुष्टयधर्मसमवलम्बनेन प्रथमव्रात्यस्तोमो निरूपितः । तदनन्तरं द्वितीयखण्डेन 'अथैष षट्षोडशी' इत्यादिना द्वितीयो व्रात्यस्तोमस्तदुत्तरं तृतीयेन खण्डेन 'अथैष द्विषोडशी' इत्यादिना तृतीयो व्रात्यस्तोमस्तत्पश्चात् 'अथैष शमनीचामेढ्राणां स्तोम' इत्यादिना चतुर्थव्रात्यस्तोमश्च क्रमेण निरूपितः । तत्र प्रथमं व्रात्यस्तोमचतुष्टयसाधारण्येनाऽधिकारिणो ये व्रात्या निरूपितास्ते क्रमेण चतुर्ष्वपि व्रात्यस्तोमेषु पृथक् पृथक् विशिष्य विवृताः । तथा हि प्रथमे व्रात्यस्तोमे 'गरगिरो वा एते ये ब्रह्माद्यं जन्यमन्नमदन्ति अदुरुक्तवाक्यं दुरुक्तमाहुरदण्ड्यं दण्डेन घ्नन्तश्चरन्त्यदीक्षिता दीक्षितवाचं वदन्ति षोडशो वा एतेषां स्तोमः पाप्मानं निर्हन्तुमर्हति' इति वचसा 'हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति न हि ब्रह्मचर्यञ्चरन्ति न कृषिं न वणिज्यां षोडशो वा एतत्स्तोमः समाप्तुमर्हति' इति वाक्यार्थौ विवृतौ भवति । तत्राऽन्तिमवचसः षोडश इत्यादेः षोडश इत्यादिवाक्यं स्पष्टमेव व्याख्यारूपं षोडशस्तोमेन व्रात्यतापापनिर्हरणात् । क्रत्वाद्यधिकारे स्वर्गादिगतानूचानतमपितृपितामहादिलक्षणादेव प्राप्तिफलबोधस्योभयत्र तुल्यमेव प्रादुर्भावात् । एवं पूर्वं 'न कृषिं न वणिज्यां चरन्ति' इति जीविकाहेतुभूतशास्त्रीयवृत्त्यननुष्ठानं कथितम् । सम्प्रति गरगिरो वा एते ब्रह्माद्यं जन्यमन्नमदन्ति' इत्युक्तम् । एते विषभक्षका एव ये ब्राह्म-

णेनाऽदनीयं जन्यं जनपदभवमन्नं हठेनातीत्यर्थः(?) । एवञ्च समुचितवृत्तिं जीवनाय कृष्यादिलक्षणां न कुर्वन्ति । तद्विपरीतामशास्त्रीयामेव ब्रह्मस्वापहरणादिलक्षणां कुर्वन्तीति प्रतिपादनेनाऽर्थान्न कृषिमित्यादिवाक्यं विवृतं भवति । एवञ्च न कृषिं ब्रह्माद्यमित्युभयत्रापि क्रमेण शास्त्रीयवृत्तिसामान्यमशास्त्रीयवृत्तिसामान्यञ्चोपलक्षणविधया परिग्राह्यम् । तथा च शास्त्रीयां जीविकां परिहरन्ति, अशास्त्रीयां जीविकाञ्च स्वीकुर्वन्तीति सिद्धं भवति । अत एवाऽदण्ड्यं दण्डग्रहणानर्हं जनं दण्डेनोपायभेदतो दण्डग्रहणेन, ततो भर्त्सनाभिशापनिरोधादिना द्रव्याद्यादानेन हिंसन्तश्चरन्तीत्यशास्त्रीया वृत्तिरुक्ता । अत एव च 'अदीक्षिता दीक्षितवाचं वदन्ति' इति स्वयं दीक्षादिरहिता अपि दीक्षिता वयं क्रत्वर्थं द्रव्यमपेक्षितमिति मिथ्यादीक्षितवेषधारणेन 'दीक्षितो भृतिं चिन्वीत' इति शास्त्रार्थं प्रकाशयन्तो द्रव्यमर्जयन्तो जीविकापरा इत्यशास्त्रीया वृत्तिरुक्ता । एवञ्च 'हीना वा एते हीयन्ते' इत्यादिवाक्यविवृतिपरेऽस्मिन् वाक्ये 'गरगिर' इत्यादौ परिशेषेण 'न ब्रह्मचर्यञ्चरन्ति' इति स्थाने अदुरुक्तमाहुरिति समापतितम् । एवञ्च—

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यमेतदेवाऽष्टलक्षणम् ॥

इति ब्रह्मचर्यं न चरन्ति । दुरुक्तं शृङ्गाराद्युक्तिस्तल्लक्षणवाक्यस्यानर्हं परस्त्रीजनं प्रति दुरुक्तं शृङ्गाराद्युक्तिं वदन्ति । अत्र शृङ्गाराद्युक्तिः क्रियानिर्वृतिपर्यन्ता ब्रह्मचर्यपरा । एवञ्च 'न हि ब्रह्मचर्यम्' इति वाक्यम् 'अदुरुक्तम्' इति वाक्यञ्च द्वयमपि समार्थं सिद्धं भवति । यद्वा 'न ब्रह्मचर्यञ्चरन्ति' इत्यनेन समार्थं मा भवत्वदुरुक्तमिति वाक्यं, स्पष्टमर्थसाम्याप्रतीतेः । अदुरुक्तवाक्यं दुरुक्तवाक्यानर्हं जनं गुरुपितृमातृ-

प्रमुखं प्रति दुरुक्तं वदन्तीत्येवार्थोऽस्तु । परन्तु 'न हि ब्रह्मचर्यं'मिति वाक्यं स्मरणं कीर्तनमित्युक्त्वाऽब्रह्मचर्यपरमेव न तूपनयनाभावपरं तत्र तदशक्तेः । उपनयनोत्तरमेव ब्रह्मचर्यधर्माणामक्षारालवणाशन-गुरुकुलवासादीनां प्रवृत्त्योपनयने ब्रह्मचर्यपदप्रयोगादर्शनात् । लक्षणाया तत्परत्वे लक्षणाया एव दोषत्वात् । अत एवैतच्छ्रुतेरभिप्रायं जानताऽनुपनीतव्रात्यो नेह विवक्षित इति मनसि निधाय शाङ्खायनेन अध्ययनेऽभिक्रान्तितमः स्यात् इति, कात्यायनेन 'अनूचानतमो वा' इति निर्दिष्टम् । व्रात्यस्तोमप्रकरणसमाप्तावपि शाङ्खायनेन 'व्रात्यस्तोमेनेष्ट्वा त्रैविद्यवृत्तिं समातिष्ठेयुः' इति कात्यायनेन 'व्रात्यस्तोमेनेष्ट्वा व्रात्यभावाद्विरमेयुर्व्यवहार्या भवन्ति' इति पुनर्यथेष्टाचरणं न विधेयं वैदिकचर्यैवाऽऽदरणीयेति कथितं, न तूपनेय इति । किञ्च–'उष्णीषञ्च प्रतोदश्च ज्याहृलिका ज्याह्रोडः ह्रोडश्च वियथश्च फलकास्तीर्णः कृष्णसंवासः कृष्णवलक्षे अजिने रजतो निष्कस्तद्गृहपतेर्वलू कान्तानिदामतूषाणीतरेषां द्वे द्वे दामनी द्वे द्वे उपानहौ द्विषं हितान्यजिनान्येतद्वै व्रात्यधनम्'(?) इति व्रात्यस्तोमचतुष्टयार्थं व्रात्यस्वामिकं धनमाम्नातम् । तत्र यदि 'न हि ब्रह्मचर्यञ्चरन्ति' इत्यनुपनीतपरं स्यादिदं व्रात्यधनमुच्यमानं सकलव्रात्यसाधारणमसङ्गतमेव स्यात् । न ह्यनुपनीतव्रात्यस्येदमसाधारणं धनं किन्तु धूर्तजनानामेवाऽतो नात्र चतुर्विधे व्रात्यस्तोमेऽनुपनयनाय व्रात्यपरिग्रहः । किञ्चादीक्षिता इति निर्देशेन दीक्षार्हाणामेवाऽदीक्षितत्वात्कीर्तनतो निन्दाबोधनेन दीक्षातः पूर्वतनोपनयनादिसंस्काराणां विस्पष्टमेव ज्ञापनाद् येऽनुपनीता इति क्वापि पाठादर्शनाच्चेदं प्रकरणमनुपनीतपरमपीति वक्तुमशक्यमेवेति दिक् ॥

एवं द्वितीये खण्डे द्वितीयव्रात्यस्तोमे 'ये नृशंसा निन्दिताः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन्' इति घातुकत्वेन निन्दिततया ब्रह्मचर्याभावब्रह्मस्वापहरणादिलक्षणव्रात्यभावङ्गतत्वोत्कीर्तनेन नृशंस-

तातः पूर्वमव्रात्यताव्रात्यतयोः समतया सूचनात् । नृशंसतायां व्रात्यतायाश्च यो नियमाभावेन वृद्धतायामपि तत्संभवात्पूर्वं शुद्ध-द्विजाताया एव सिद्धेर्नृशंसताधीननिन्दोत्तरत्वानियमस्यानुपनयना-यत्तव्रात्यतायामभावात् । न तत्राप्यनुपनीतव्रात्यपरिग्रहः । एवं तृतीये खण्डे तृतीये व्रात्यस्तोमे 'ये कनिष्ठाः सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन्' इति प्रजननसामर्थ्यरूपकनिष्ठत्ववत्त्वे सति ब्रह्मचर्याभावब्रह्म-स्वापहरणाद्यन्यतमलक्षणव्रात्यभावं गतानां तृतीयव्रात्यस्तोमविधा-नात् । प्रजननसामर्थ्यानन्तरं व्रात्यभावस्य कथनेन प्रजननसमर्थस्य च बहुकालमपि सम्भवेनाऽनुपनयनस्य तदनन्तरभावित्वनियमाभा-वेन नाऽत्राप्यनुपनयनायत्तव्रात्यपरिग्रहः । एवं चतुर्थे खण्डेपि चतुर्थे व्रात्यस्तोमे 'अथैष शमनीचामेढ्राणां स्तोमो ये ज्येष्ठास्सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन्' इति प्रजननाभावरूपज्येष्ठत्वे सति परस्वा-पहरणाद्यन्यतमलक्षणव्रात्यभावं गतानां चतुर्थस्तोमविधानात् । वार्ध-क्योत्तरं व्रात्यभावप्राप्तिकथनेनाऽनुपनयनलक्षणव्रात्यभावस्य वार्ध-क्योत्तरभावित्वाभावेनाऽत्रापि नानुपनयनप्रयुक्तव्रात्यतापरिग्रहः ॥

अत्रायं विभागः—निन्दार्हनृशंसतोत्तरं ब्रह्मस्वापहरणाब्रह्मचर्या-द्यन्यतमव्रात्यत्वे सति द्वितीयो व्रात्यस्तोमः । प्रजननसामर्थ्यानन्तर-मब्रह्मचर्यपरस्वापहरणादिलक्षणव्रात्यतायां सत्यां तृतीयव्रात्यस्तो-मः । वार्धक्ये अजननलक्षणे सति पश्चात्परस्वापहरणाद्यन्यतम-लक्षणव्रात्यतायां चतुर्थः स्तोमः । प्रजननसामर्थ्याविर्भावात्पूर्वं पर-स्वापहरणादिलक्षणे व्रात्यत्वे नृशंसतानुत्तरभाविनि सति प्र-थमो व्रात्यस्तोमः । यौवनात्पूर्वं नृशंसतोत्तरभाविनि व्रात्यत्वे द्वितीयो व्रात्यस्तोमः । यौवनवार्धक्योत्तरमपि नृशंसतोत्तरभा-वित्वे व्रात्यताया द्वितीयव्रात्यस्तोम एव । यौवनवार्धक्ये च नृशंसतायाः पूर्वमेव व्रात्यत्वे सति तृतीयचतुर्थौ क्रमेण व्रा-त्यस्तोमौ भवेताम् । यौवनवार्धक्ययोः सर्वथा नृशंसत्वाभावे तु

यथायोगं तृतीयचतुर्थावेव नियतौ। युवभावात्पूर्वं सर्वथा नृशंसत्वाभावे नृशंसत्वात्पूर्वञ्च व्रात्यत्वे सति प्रथम एव। नृशंसतोत्तरं व्रात्यत्वे तु द्वितीय एव। अत्र त्रयस्त्रिंशद्यजमानानामेकरूपतया नृशंसत्वे युवत्वे वृद्धत्वे वा क्रमेण निरुक्तरीत्या त्रयः स्तोमा भवन्ति। यदि सङ्कीर्णाः केचन वृद्धव्रात्याः, केचन युवानः, केचन निन्दिताः, केचन बाला इति क्रमेणाऽनियमेन त्रयस्त्रिंशद्यजमानाः सम्पद्यन्ते तर्हि प्रथम एव व्रात्यस्तोमनियतनिरुक्तलक्षणाभावे प्रथमस्यैव साधारणस्योचितत्वात्। अत एव शाङ्खायनेन 'ये केचन व्रात्याः सम्पादयेयुस्ते प्रथमेन यजेरन्' इति कात्यायनेन 'ये व्रात्यगणस्य सम्पादयेयुस्ते प्रथमेन यजेरन्' इति व्रात्यसामान्यमात्रमेव त्रयस्त्रिंशत्सङ्ख्याकं वक्ष्यमाणनियमत्रयरहितं प्रथमव्रात्यस्तोमाधिकारीति निरूपितम्। एवं ताण्ड्यब्राह्मणानुरोधेन चतुर्विधोऽपि व्रात्यस्तोमोऽनुपनीतव्रात्यपरः, किन्तूपनीतविवाहवर्जनपरः। 'न कृषिं न वणिज्याम्' इति 'अदीक्षितम्' इत्यादिना विवाहवदुचितक्रियाया एव समुल्लेखात्। अत एव श्रुतिभावाभिज्ञेन शाङ्खायनेन सस्त्रीकान् मनसि निधाय 'व्रात्यस्तोमैर्यक्ष्यमाणाः पृथगग्नीनाधाय' इत्युक्तं सङ्गतं भवति। एवञ्च याज्ञवल्क्यवसिष्ठवचनयोः पतितसावित्रीकत्वनिबर्हणपरत्वेन व्रात्यस्तोमे श्रवणं न ताण्ड्यगतं, 'न हि ब्रह्मचर्यञ्चरन्ति' इति वाक्यमूलकम्। तत्त्वे सति न्यायाभासमूलककत्वेन प्रामाण्यमेव परिपतेत्। एवञ्च वसिष्ठयाज्ञवल्क्यवचसोर्वचनान्तरमेव किञ्चिन्मूलमित्यनुमेयम्, तत्र यावत्तन्मूलभूता श्रुतिः प्रत्यक्षतो न दृश्यते तावन्न्यायाभासमूलकत्वशङ्कयाऽननुष्ठानलक्षणमप्रामाण्यं सिद्धमेव। एवञ्च सति विरोधाभावादापस्तम्बोक्तमेव पतितसावित्रीकत्वे प्रायश्चित्तमुचितम्। वसिष्ठोक्ते उद्दालकव्रतमश्वमेधावभृथस्नानञ्च विरोधाभावादनुष्ठानार्हे। आपस्तम्बसूत्रे 'बालकापितृपितामहा' इति बालकपितृपितामहप्रपितामहादय इत्यनुपनीतान् विभज्य तत्राप्युपनयनमध्ययञ्चेति विशिष्य विभज्य त्रैविद्यकक्रतुव्रतमिति त्रैविद्यकमन्तन्मात्र-

तामिति त्रैविद्यकद्वादशवर्षव्रतमिति विशेषतः पर्वत्रयभेदेनोपनयन-निमित्तमभिधाय संवत्सरस्नानमिति निर्णीतप्रतिपुरुषसङ्ख्याकस्नान-मिति पर्वद्वयेऽध्ययननिमित्तं स्पष्टमभिधाय तृतीये पर्वणि पुरुषसङ्ख्या-निर्णयाभावात्स्नानकालनिर्णयाभावादेनसः शङ्कया नाध्यापनमिति-विस्पष्टं कथनात् । उद्दालकव्रतस्यैव भूतसकृदनुष्ठितोद्दालकव्रतनि-वर्त्यत्वकल्पनायाः स्वबुद्धिप्रभवत्वेन न्यायविरोधादापस्तम्बविभा-गेन कथनाभावात् गुरुतरैनसोऽतिलघूपायाऽऽपस्तम्बवचनानुरुद्धमेव योजनमुचितं भवति । अत्र यदि याज्ञवल्क्यवसिष्ठवचसोर्व्रात्यस्तोमा-नुष्ठानपरयोर्मूलभूतं वचनं ताण्ड्यश्रुतेरन्यत्र कल्प्यते तर्हि तत्किं विभि-न्नप्रकरणगतं किं वा ताण्डितुल्यचतुर्विधव्रात्यस्तोमविधायकप्रकरण-गतम् । तत्र प्रथमे पक्षे प्रकरणान्तरत्वात्कर्मान्तरमेव । तत्र यदि कर्मान्तरं साङ्गमेव विहितं तर्हि वसिष्ठयाज्ञवल्क्यवचसोर्नाममात्रे-णैव व्रात्यस्तोमसूचनात्तदितिकर्तव्यतानिर्देशाभावात्तदनुष्ठानमेव यावन्मूलदर्शनं रुद्धं स्यात् । यदि कर्मान्तरं प्रकरणान्तरग-तं न साङ्गं विहितं नामातिदेशेन ताण्डितो विरुद्धधर्मपरिहारे-णाऽविरुद्धा धर्मा नीयन्ते तर्हि तत्कर्म साङ्गमनुष्ठातुं शक्यम् । परन्तु प्रकरणान्तरेऽङ्गानि न सन्ति नामातिदेश एवेति प्रकरणान्त-रदर्शनं विना निर्णयानुपपत्तेः सन्देहादननुष्ठानमेव पुनरवशिष्टं या-वन्मूलदर्शनम् । यदि च सर्वशाखाद्रष्टृभिः पारस्करप्रभृतिभिरनुप-नयनायत्तव्रात्यताप्रायश्चित्तत्वेन व्रात्यस्तोमपरिग्रहात् विशिष्य तद-ङ्गान्तरानाम्नानात्ताण्डिब्राह्मणगतधर्मैरेवेतिकर्तव्यता प्राप्नोति नामाति-देशावलम्बेन सूचनात् । प्रकरणान्तरे निरङ्गं कर्मान्तरमिति निर्णीतं स्यात्तर्हि नामातिदेशतोऽविरुद्धा धर्मास्ताण्डिव्रात्यस्तोमान्नेयाः । तत्र तिर्यगुष्णीषादिव्रात्यधनानि सम्पाद्य ब्रह्मबन्धवे क्षुद्रगायकाय मा-गधदेशीयायाऽविरतव्रात्याचाराय वा देयानीत्यंशो लुप्यत एव, पतितसावित्रीके तादृशव्रात्यताया अभावेन द्वारलोपात् । यजेतेत्ये-

कवचननिर्देशेन गणयज्ञत्वाभावसूचनादेकयजमानकत्वात्। प्रतिपुरुषं त्रयस्त्रिंशद्गोसम्पादनमपि लुप्यत एव। गृहपतिस्थाने एक एव यजमान इति त्रयस्त्रिंशद्गाव एव दक्षिणा भवन्ति। पक्षान्तरे त्रयस्त्रिंशद्गवां यद्द्वैगुण्यं गृहपतित्वप्रयुक्तं तदपि न प्रवर्तते गृहपतित्वाभावादगणयज्ञत्वात्। तत्रापि चतुर्विधेषु व्रात्यस्तोमेष्वपि प्रथमस्यैव धर्मातिदेशेन गच्छन्ति नेतरेषाम्। अन्येषामपि प्रथमत एव धर्माणां नेयत्वेन प्रकृतित एव धर्मग्रहणौचित्यात् साधारणरूपत्वाच्च प्रथमस्य। एवञ्च प्रथमत एव सामादिधर्मा नेया इति सिद्धम्। स्मार्तोऽयं व्रात्यस्तोमो यद्युपनयननिमित्तं यदि वाऽध्ययननिमित्तमुभयथाऽप्यग्निर्लौकिक एवाऽवकीर्णिनिषादस्थपतिवत्, तत्राऽनुपनीतब्रह्मचारिणोराधारानधिकारात्। इतरथाऽवकीर्णिनोऽप्याधानाद्यापद्येत। यदि च ताण्डितुल्यचतुर्विधव्रात्यस्तोमविधायकप्रकरणगतमित्युच्यते तर्हि कर्मभेदाभावात् ताण्डिसमाम्नातप्रथमव्रात्यस्तोम एव पुरुषभेदेन निमित्तान्तरे विहितो भवति। तत्रापि न तिर्यगुष्णीषादिव्रात्यधनसम्पादनं न वाऽऽधानं न वा गणयज्ञत्वमित्यादिकर्मान्तरं कल्पयदेव। अथ यदि व्रात्यस्तोमो व्रात्यतापरिहाराय विहितस्तर्हि तत्राऽधिकारिभूतानां व्रात्यानां नानात्वात्। ये तावदाहिताग्नयः कृताग्निष्टोमास्तेषां व्रात्यानां समुचितमेवाऽनुष्ठानम्। ये तावदाहिताग्नयोऽपि नैव कृतज्योतिष्टोमाः, ये चाऽनाहिताग्नय एव गृहिणस्सस्त्रीकाः, ये चाऽऽहिताग्नयोपि पूर्वं पश्चाद्विधुराः, ये चाऽविवाहिता एव स्नातका, ये च ब्रह्मचारिणो, ये चानुपनीताः तेषां व्रात्यस्तोमानुष्ठानं कथं भवति 'एष वा प्रथमो यज्ञो यज्ञानां यो ज्योतिष्टोम' इति वचनेन विना ज्योतिष्टोमानुष्ठानं यागान्तरेऽनधिकारात्। ज्योतिष्टोमे च—'अर्थी समर्थो विद्वान् शास्त्रेणानपहतश्च यः'। इति वचनेन व्रात्यस्य सम्भाषणभोजनयाजनादौ निषिद्धस्य विना प्रायश्चित्तमसङ्ग्राह्यत्वात्। अधिकाराभाव[illegible]

ष्ठानमिति चेदत्रोच्यते–ताण्डिब्राह्मणविहितो व्रात्यस्तोमः सोमयागः, विद्याग्न्याद्याक्षेपकत्वाभावात् सिद्धविद्याग्नि कृतप्रथमयज्ञं त्रयस्त्रिंशद्गणं परिगृह्य चरितार्थो भवति, इतरांस्तु नैव परिगृण्हाति, अन्यत एवं चारितार्थ्यात् । अन्येषां तु प्रायश्चित्तं नेदं भवितुमर्हति प्रथमयज्ञादीनां यथायोगाभावात्, व्रात्यस्तोमस्यान्यतश्चरितार्थस्य तदाक्षेपकत्वसामर्थ्याभावात् । तस्मादन्येषां स्मृतिविहितमन्यदेव प्रायश्चित्तं व्रात्यतायाः परिहाराय भवितुमर्हति । पतितसावित्रीकत्वलक्षणव्रात्यतायाः प्रायश्चित्तं पुनरापस्तम्बोक्तं वसिष्ठोक्तं वा । व्रात्यस्तोमस्तु वसिष्ठयाज्ञवल्क्यपरिगृहीतो वचनसार्थक्याय, अन्यथाऽनुपपत्त्या रथकाराधाननिषादस्थपतियज्ञावकीर्णिपशुवदनुष्ठेय एव । स च प्रागुक्तरीत्योपनयनाध्ययनाधिकारकारी । तत्र चाऽसम्भवतां व्रात्यधनत्रयस्त्रिंशद्गणाग्न्याधानादीनां लोप एव । अथ शाङ्खायनेन 'व्रात्यस्तोमैर्यक्ष्यमाणाः पृथगग्नीनाधाय' इति स्पष्टमाधानस्यापूर्वस्य विधानादनुपनीतस्याप्याधानपूर्वकमेव व्रात्यस्तोमानुष्ठानमुचितमिति चेन्न, सूत्रमूलभूतताण्डिब्राह्मणेऽपूर्वाधानविधेरभावात् गणयज्ञत्वज्ञापनात् तदन्यथानुपपत्त्या त्रयस्त्रिंशद्यजमानाग्नीनां सत्रवत्संमेलनावश्यम्भावात्सिद्धमग्नि समुपादाय संयोगविधिपरमेवेदं सूत्रं लक्षणयेत्यभ्युपेयम् । तथा च पृथग्विद्यमानानग्नीनेकत्राऽऽधाय संयोज्येति सूत्रार्थः सम्पन्नो भवति । इतरथा श्रुतिविरुद्धमेव सूत्रमिदमापद्येत । एवञ्च लौकिकाग्निष्वेवाऽकीर्णिनिषादस्थपतिवद्व्रात्यस्तोमस्य स्मार्तस्य सावित्रीपतिते प्रवर्तनमुचितम् । आपस्तम्बवसिष्ठोक्तं प्रायश्चित्तं तु यथायोगं साक्षात्प्रतिनिधितो वा निर्विशङ्कं भवेदेवेति दिक् ॥

अथाऽयं व्रात्यताप्रायश्चित्तविचारो विफलत्वादसङ्गतः, कलौ चातुर्वर्ण्यविभागाभावेन प्रायश्चित्तकारयितॄणां व्रात्यस्तोमादिक्रतुप्रवर्तकानामृत्विजामुपनेतॄणां द्विजानां ब्राह्मणादीनामभावेन प्रायश्चित्तानुष्ठानाप्रवृत्तेः ॥

सौराष्ट्रावन्त्यभीराश्च शूद्रा अर्बुदमालवाः ।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥
सिन्धोस्तटं चन्द्रभागां कौन्तीं काश्मीरमण्डलम् ।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाऽब्रह्मवर्चसः ॥

इत्यादिवचनेन द्विजसामान्यविप्लवप्रत्ययात् ।

ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥
इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।

इति चन्द्रसूर्यवंशाविलयनिर्देशात् ।

अग्निहोत्रं च संन्यासं तावदेव समाचरेत् ।
यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ॥

इति कलिमध्ये वर्णविलयसूचनात् । एवं योऽयं पुरञ्जयनामा बार्हद्रथोऽन्त्यस्तस्य सुनिको नामाऽमात्यो भविष्यति, स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतननामानमभिषेक्ष्यतीत्यादिना प्रद्योतपालकविशाखयूपजनकनन्दिवर्द्धनशिशुनागकाकार्णक्षेमधर्मक्षत्त्वौजोबिन्दुसाराऽजातशत्रुदर्भकोदपार्श्वनन्दिवर्द्धनमहानन्दिपर्यन्तं परम्परां निरुच्य महानन्दिसुतश्च शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मः परशुराम इवाऽखिलक्षत्रान्तकारी भविष्यति । ततः प्रभृति च शूद्रा भूमिपाला भविष्यन्तीति मागधवंशनिरासपूर्वकं क्रमेण शूद्राणामेवाग्रे भूपालत्वनिर्देशाच्च । एवञ्च नन्दोत्तरं त्रैवर्णिकसामान्यस्य शशशृङ्गकल्पत्वात् राजन्या एव न सन्तीति चेत्–अत्रोच्यते, कलौ कदापि न सर्वथा चातुर्वर्ण्यविलयः । केचन पुत्रस्त्रैवर्णिका व्रात्या भवेयुस्तत्रापि कलेरन्ते बहुशो व्रात्या आदौ परिमिता मध्ये च मध्यमविधा एव न तु सर्वथा ब्राह्मणादीनामभाव एव कल्प्यते ॥

सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥

वासुदेवस्यांशः सम्भलग्रामब्राह्मणप्रधानविष्णुयशसो गृहेषु अष्टगुणर्द्धिसमन्वितः कल्किरूपधरो जगत्यत्राऽवतीर्य सकलम्लेच्छदस्युदुष्टाचरणवतामशेषाणामविच्छिन्नशक्तिमाहात्म्यः क्षयं करिष्यति, स्वधर्मं चाऽशेषमेव संस्थापयिष्यतीति ब्राह्मणस्थितिप्रदर्शनात् ॥

एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ।
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥

इति कलिमध्येऽन्त्ये च ब्राह्मणादिवर्णासिद्धवत्कारेण बलवतो भूपालकत्वकथनेन सर्वथा चातुर्वर्ण्यविलयायोगात् ॥

एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा ।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते ॥
कलौ तु बीजभूतास्तु केचित्तिष्ठन्ति वै मुने ।
यथैव देवापिपुरू साम्प्रतं समवस्थितौ ॥

इति देवापिपुरुवदेव केचनाऽन्येऽपि बीजभूताः सार्वभौमत्वरहिताः राजवंशप्रवर्तका भवेयुरिति निरूपणात् ॥

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुवंशजः ।
महायोगबलोपेतौ कलापग्रामसंस्थितौ ॥
कृते युग इहागत्य क्षत्रप्रावर्तकौ हि तौ ।
भविष्यतो मनोर्वंशबीजभूतौ महाबलौ ॥
देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ।
कलापग्राम आसाते महायोगबलान्वितौ ॥
ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ ।
वर्णाश्रमयुतं सर्वं पूर्ववत्प्रथयिष्यतः ॥

इति धर्मप्रवर्तकत्वकथनेपि क्षत्रान्तरव्यावर्तनाकथनात् ॥

एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया।
निखिलो गदितुं नैव शक्यो जन्मशतैरपि॥

इति सूर्यसोमवंशबाहुल्यनिर्देशेन सार्वभौमवंशयोरिक्ष्वाकुवंशैकदेशभूतबृहद्बलवंशैकदेशस्य सुमित्रान्तस्य सोमवंशैकदेशभूतपरीक्षिद्वंशैकदेशस्य क्षेमकाशिरस्कस्य विलयकथनेऽपि वंशान्तराणां विलयाकथनात्। मागधवंशेऽपि बार्हद्रथवंशैकदेशजरासन्धवंशैकदेशस्य पुरञ्जयान्तस्य सुनिकामात्यकृतराज्यापहारस्य पुरञ्जयवधपूर्वकस्य च निर्देशेऽपि तद्वंशसामान्यविलयानिर्देशात्। नन्दप्रभृति शूद्रा भूमिपाला भविष्यन्तीति मगधदेशावलम्बेन सार्वभौमविभेदानामेव शूद्रादिभेदेन निर्देशेन क्षत्रसामान्यस्य पृथिव्यामसत्त्वाप्रतिपादनात्। महापद्मः परशुराम इव सकलक्षत्रान्तकारी भविष्यतीति वचसोऽपि राज्याभिषिक्ततत्तत्क्षत्रान्तपरत्वेन क्षत्रजातिसामान्याभापरत्वस्य परशुरामदृष्टान्तेन ब्रह्मविट्क्षत्रेत्यादिनिरुक्तवचनादिना च वक्तुमशक्यत्वात्। यवनादीनामपि ततः शकाः षोडश भूपतयो भवितार इत्यादिना सार्वभौमत्वायोगात्। ब्रह्मविट्क्षत्रेत्यादिवचनेन खण्डितभूपातित्वेन क्षत्रादीनामपि विनिर्देशात्। अनन्तरञ्चाऽशेषकलेरवसाने निशावसान इव प्रबुद्धानां तेषामेव जनपदानाममलस्फटिकशुद्धा मतयो भविष्यन्ति। अनन्तरं तेषामेव बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यतीति तानि च तदपत्यानि कृतयुगधर्मानुसारिण्येव भविष्यन्ति॥

अथ तेषां भविष्यन्ति मनांसि विशदानि वै।
वासुदेवाङ्गरागातिपुण्यगन्धानिलस्पृशाम्॥
पौरजानपदानां वै हतेष्वखिलदस्युषु।
तेषां प्रजानिसर्गश्च स्थविष्ठः संभविष्यति॥

इति कल्पान्तस्थपौरजानपदजनानामेव कृतयुगगतब्राह्मणादिस-

कलवर्णबीजभूतत्वेन निर्देशेन कलौ सर्वथा चातुर्वर्ण्यं नेति वक्तु-मशक्यत्वात् ॥

अचन्द्रार्कग्रहा भूमिर्भवेदपि न संशयः ।
अपौरवा न तु मही भविष्यति कदाचन ॥

इति स्पष्टमेव सर्वदा पौरवाणां भूमाववस्थानकथनाच्च । एवञ्च कलौ क्षत्रसत्त्वं नियतमेव । एवञ्च चातुर्वर्ण्याभावनिरूपणं कलाव-सङ्गतमेव ॥

ननु—

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुवंशजः ।
कृते युग इहागत्य क्षत्रधर्मप्रवर्तकौ ॥

इति निर्देशनाऽचन्द्रार्कग्रहेति वाक्यं देवापिपरमेव भवतु, न तु तदतिरिक्तक्षत्रसामान्यपरमिति चेदत्रोच्यते । हरिवंशे षडशीतितमे-ऽध्याये—

जनमेजयस्य के पुत्राः पठ्यन्ते लोमहर्षण ।
कस्मिन् प्रतिष्ठितो वंशः पाण्डवानां महात्मनाम् ॥

इति शौनकीये जनमेजयस्य शतानीकादिक्षेमकान्ता परम्परा नश्यत्येवाऽन्ते तथा न नश्यति कलौ सर्वदा तिष्ठत्येवेत्येवंरूपपरम्परा-परे प्रश्ने सौतेरुत्तरम्—

पारिक्षितस्य काश्यां तु द्वौ पुत्रौ सम्बभूवतुः ।
चन्द्रापीडश्च नृपतिः सूर्यापीडश्च मोक्षवित् ॥
चन्द्रापीडस्य पुत्राणां शतमुत्तमधन्विनाम् ।
जानमेजयमित्येवं क्षात्रं भुवि परिश्रुतम् ॥
तेषां ज्येष्ठस्तु राजासीत्पुरे वारणसाह्वये ।
सत्यकर्णो महाबाहुर्यज्वा विपुलदक्षिणः ॥
सत्यकर्णस्य दायादः श्वेतकर्णः प्रतापवान् ।
अपुत्रः स तु धर्मात्मा प्रविवेश तपोवनम् ॥

तस्माद्वनगताद्गर्भं यादवी प्रत्यपद्यत ।
सुचारुदुहिता सुभ्रूर्मालिनी भ्रातृमालिनी ॥
सस्वजन्मनि गर्भस्य श्वेतकर्णः प्रजेश्वरः ।
अन्वगच्छद्व्रतं पूर्वैर्महाप्रस्थानमच्युतम् ॥
सा दृष्ट्वा सम्प्रयातं तं मालिनी पृष्ठतोऽन्वयात् ।
पथि सा सुषुवे सुभ्रूर्वने राजीवलोचनम् ॥
कुमारं सम्परित्यज्य भर्तारं साऽन्वगच्छत ।
पतिव्रता महाभागा द्रौपदीव पुरा पतीन् ॥
सुकुमारः कुमारोऽसौ गिरिकुञ्जे रुरोद ह ।
पुष्टयर्थं तस्य मेघास्तु प्रादुरासन् महात्मनः ॥
अविष्ठायास्तु पुत्रौ द्वौ पैप्पल्यादिश्च कौशिकः ।
दृष्ट्वा कृपान्वितौ गृह्य तं प्रक्षालयतां जले ॥
निघृष्टौ तस्य तौ पार्श्वौ शिलाया रुधिरस्रवौ ।
अजश्यामौ तु पार्श्वौ तावुभावपि समाहितौ ॥
तथैव च समारूढावजपार्श्वस्ततोऽभवत् ।
ततोऽजपार्श्व इति तौ चक्राते नाम तस्य ह ॥
स तु वेमकशालायां द्विजाभ्यां परिवर्द्धितः ।
वेमकस्य तु भार्या तमुद्वहत् पुत्रकारणात् ॥
वेमक्याः स तु पुत्रोऽभूत् ब्राह्मणौ सचिवौ च तौ ।
तेषां पुत्राश्च पौत्राश्च युगपत्तुल्यजीविनः ॥
स एव पौरवो वंशः पाण्डवानां प्रतिष्ठितः ।
श्लोकोऽपि चात्र गीतोऽयं नाहुषेण ययातिना ॥
जरासङ्क्रमणे पूर्वं भृशं प्रीतेन धीमता ।
अचन्द्रार्कग्रहा भूमिर्भवेदपि न संशयः ॥
अपौरवा न तु मही भविष्यति कदाचन ।

इति जनमेजयस्य प्रपौत्रश्वेतकर्णपुत्रमजपार्श्वं परिगृह्य तत्स-

न्तानस्थैर्यपरत्वेनाऽचन्द्रार्कग्रहा भूमिरिति श्लोकप्रवर्तनेन केवलदेवापिमादायैव पर्यवसानायोगात् । अतोऽन्येऽपि बहवो राजानो बीजभूताः कलावादौ मध्येऽन्त्ये च सन्त्येव । अपि च राज्याभिषिक्तयोर्द्वयोरेव क्षेमकसुमित्रयोर्वंशविलयकथनेन राज्यानभिषिक्तानां तत्परम्पराभवानां क्षत्रियाणां वंशविनाशाकथनेन यथायोगं तेषां कलावपि सन्तत्यनुवर्तनं घटत एव । न हि पाण्ड्यादिनिखिलराजवंशानां निरन्वयो विनाशः काऽप्याम्नातः । ब्रह्मसूत्रमेव विप्रत्वे हेतुः, लिङ्गधारणमेवाश्रमे हेतुरित्यादिनिन्दावादाः कलिपराः प्रायेणाऽधर्मप्रवृत्तिपरा न तु ब्राह्मणाश्रमादिसामान्याद्यभावपराः प्रागुक्तप्रमाणैर्वर्णाश्रमाणां बीजभूततया सत्त्वाभ्युपगमात् ॥

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरः ।
तस्माद्भारतमाख्यानं कृपया मुनिना कृतम् ॥

इति श्रूयते । अत्र द्विजबन्धुपदमनुपनीतव्रात्यपरं, न तु वेदाध्ययनप्रयुक्तव्रात्यतापरम् । उपनीतमात्रस्य वेदश्रवणेऽधिकारमन्तरा तदध्ययनायोगात् । अत एव छान्दोग्ये-'नानूच्य ब्रह्मबन्धुरिव भवती'ति वेदानध्ययने ब्रह्मबन्धुसदृशो भवतीति कथनेन ब्रह्मबन्धुपदमनुपनीतव्रात्यपरमिति स्पष्टीकृतम् । एवञ्च शूद्राश्च द्विजबन्धुश्च शूद्रद्विजबन्धवः, स्त्रियश्च शूद्रद्विजबन्धवश्च स्त्रीशूद्रद्विजबन्धवः । अत्र शूद्रपदं जातिपरं, तेन शूद्रायाः शूद्रस्य च ग्रहणं भवति । द्विजबन्धुपदं तु केवलपुरुषपरमेव ॥

पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।

इति वचनेन त्रैवर्णिककन्यानां त्रैवर्णिकपुरुषवदेवोपनयनाध्ययनाधिकारसत्त्वेपि त्रैवर्णिककन्यानां मौञ्जीबन्धनाध्ययनाभावकल्पस्यापि सर्वकल्पसूत्रकारसंमतत्वेनोपनयनाद्यभावे पुरुषवद्व्रात्यत्वेन द्विजबन्धुत्वाभावात् । अत्र स्त्रीपदं न स्त्रीसामान्यपरं, किन्तु शूद्रद्विजबन्धुविवाहितस्त्रीपरं सन्निधानात् । न तु त्रैवर्णिकविवाहितत्रैवर्णि-

कर्म्मीपरं तासां वैदिकैरेव मन्त्रैरुद्वाहात् बृहस्पतिसववाजपेयराजसूयज्योतिष्टोमादिक्रतुष्वप्यधिकारात् 'पत्नीं वाचयती'त्यादिश्रवणात् । उच्चैरुच्चार्यमाणादकमन्त्रश्रवणस्य कर्मसु तासां दर्शनात् । सन्ततमपि पुत्रशिष्यादिघुष्यमाणवेदश्रवणस्य सर्वसम्मतत्वात् वैवाहिकाग्निसंयोजनवियोजनयोः कर्माधिकारस्य च साहित्येन दर्शनाच्च । तत्र त्रैवर्णिककन्या द्विविधा सोपनयनाध्ययना तद्रहिता चेति ।

पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।

पुराकल्पः परकृतिरर्थवादभेदः, तत्र पुराकल्पोऽर्थवादविशेषः, न तु प्राचीनकल्पस्तथैव पूर्वमीमांसासिद्धान्तात् । एतस्मिन्वचने स्पष्टमेव त्रैवर्णिककन्यानामुपनयनादिविधानात् कल्पसूत्रेषु सर्वेष्वपि जातकर्मादीन्यमन्त्रकमेवाऽऽम्नायोपनयनाऽनाम्नानात् सोपनयनाध्यना तु पुरुषवदेव । यथा गार्गी मैत्रेयी च । पक्षे निरुपनयनाध्ययनात्त्रैवर्णिकी, तस्या विवाह एवोपनयनस्थाने भवति । अत एव पूर्वाह्णे शुक्ले पक्षे इत्यादिवचनं तच्चक्षुरिति सूर्योपस्थानं, आध्रुवदर्शनं प्रतीक्षाते कथनं च सङ्गतं भवति । रात्र्यादिविवाहोऽत्रैवर्णिकपरः । अयञ्चाऽपरो विशेषः–त्रैवर्णिकपुरुषस्य कालानुपनयने व्रात्यताकन्यायास्तु न व्रात्यता, उपनयनाभावपक्षस्योपि मानसिद्धत्वात्तदतिक्रमप्रयुक्तव्रात्यताया वक्तुमशक्यत्वादिति । तत्र व्रात्यस्य पुत्रो व्रात्यो भवति कालातिक्रमे सर्वस्मृतिष्वपि कालातिक्रमं पुरस्कृत्यैव व्रात्यतानिर्देशात् । कालातिक्रममायत्तैव व्रात्यता, कालानतिक्रमे तु स्वयमव्रात्यो व्रात्यपुत्रत्वात्तत्प्रयुक्तं प्रायश्चित्तं तेन विधेयं भवति । अथ व्रात्यपुत्रः कालानतिक्रमे विनाप्रायश्चित्तमुपनयनाधिकारी भवतु । व्रात्यपुत्रत्वेन पृथक् प्रायश्चित्ताकथनादिति चेत् न, 'ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे तत ऊर्ध्वं प्रकृतिवत्' इत्यापस्तम्बनिर्देशेन व्रात्यतापन्नपुरुषपुत्र एव प्रकृतिवत्संस्कृत-

पुत्रपरम्परावदिति स्पष्टीकरणपूर्वकं ततः संस्कृतावस्थातः पूर्वमप्रकृतिवदिति सूचनेन प्रायश्चित्तं व्रात्यपुत्रस्य कालानतिक्रमेऽपि किञ्चिदस्तीति ज्ञापनात् । आपस्तम्बेनैव 'अथ यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इत्यत्र 'तेषामिच्छतां प्रायश्चित्तं यथा प्रथमेऽतिक्रमेऋतुरेवं वत्सर' इति कथनेन बालकपितृपितामहानां कालातिक्रमे बालकस्य च कालातिक्रमे ऋतुर्व्रात्यपुत्रत्वाद्दतुद्वयं व्रात्यपौत्रत्वादृतुत्रयमपरमिति स्पष्टीकरणेन व्रात्यपुत्रस्य कालानतिक्रमे व्रात्यत्वाभावाद्व्रात्यताप्रयुक्तैकर्तुब्रह्मचर्यं नापेक्षितं व्रात्यपुत्रत्वप्रयुक्तमृतुद्वयं, व्रात्यपौत्रत्वप्रयुक्तमपरमृतुत्रयं त्रैविद्यकब्रह्मचर्यमपेक्षितमिति सूचनात् । तत्रैव प्रकरणे 'तत उदकोपस्पर्शनं प्रतिपुरुषं सङ्ख्याय संवत्सरान्यावन्तोऽनुपेताः स्युः' इति निर्देशेन समुचितकालेऽनुपेता इति स्पष्टीकरणेन बालकस्य कालानतिक्रमे व्रात्यत्वाभावेन व्रात्यपुत्रत्वपौत्रत्वादिप्रयुक्तवत्सरस्नानाभ्युपगमेन बालकस्य व्रात्यत्व एव स्वव्रात्यताप्रयुक्तस्नानमपि बालस्य कालानतिक्रमेणाऽव्रात्यत्वे स्वव्रात्यताप्रयुक्तसंवत्सरस्नानविलोपो व्रात्यजन्यत्वप्रयुक्तं स्नानं त्वपेक्षितमिति प्रकटीकरणात् । एवं तत्रैव प्रकरणे 'अथ यस्य प्रपितामहादि नानुस्मर्येत उपनयनम्' इत्यत्र 'तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यञ्चरेत्' इति वचनेनोपयनाधिकारहेतुप्रायश्चित्तस्य तस्य 'संस्कारो यथा प्रथमेऽतिक्रम' इति स्वाध्यायाध्ययनाङ्गसंवत्सरस्नानस्य चाऽस्नानेन बालकस्य कालानतिक्रमे द्वादशवर्षमध्ये एकर्तुब्रह्मचर्यविलोपः, संवत्सरस्नाने द्वादशपुरुषपर्यन्तावलम्बेन द्वादशवर्षब्रह्मचर्यादरेण प्रतिपुरुषं सङ्ख्यायेति न्यायेन द्वादशमासस्नानमध्ये बालकव्रात्यताप्रयुक्तमासस्नानविलोप इति ज्ञापनाच्च । पारस्करसूत्रेऽपि 'कालातिक्रमे नियतवत्त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनञ्च' इति वचने बालकस्य कालातिक्रमे 'कालातिक्रमे नियतव'दिति संस्कारो नाध्यापनञ्च भवति । कालानतिक्रमे तु

कालातिक्रमे नियतवदिति प्रायश्चित्तं न भवत्यव्रात्यत्वादिति ज्ञापनेन बालकस्य कालानतिक्रमे व्रात्यता नेति सूचनाच्च। एवं व्रात्यपुत्र्यास्तु पुत्रवत् प्रायश्चित्तं न भवेदेव पुत्रस्योपनयनाधिकारात्। उपनयनपूर्वकाध्ययनार्थं व्रात्यजन्यत्वस्वव्रात्यताप्रयुक्तप्रायश्चित्तकरणेनोपनयनाध्ययनाधिकारनिर्देशेन स्त्रीणामुपनयनाध्ययनाभावायत्तस्वीकारेणोपनयनाभावप्रयुक्तव्रात्यताया उपनयनाभावप्रयुक्तव्रात्यतावत्पुरुषजन्यत्वप्रयुक्तोपनयनानधिकारस्य चाभावे स्मर्तृभिः कैरपि पुरुषवत्स्त्रीणां व्रात्यभावव्रात्यजन्यत्वप्रयुक्तप्रायश्चित्तानाम्नातेन शुद्धबीजोत्पन्नत्वमात्रेण कन्यानां शुद्धत्वं संस्कृताऽसंस्कृतजनविवाह्यत्वञ्च घटते। शूद्रकन्याविवाहस्य त्रैवर्णिकेष्वभ्युपगमेन त्रैवर्णिकब्रह्मक्षत्रवैश्यबन्धुकन्याविवाहे दोषोद्भावनस्य कर्तुमशक्यत्वात्। तत्र व्रात्यत्रैवर्णिककन्याविवाहे तस्यां दोषाभावात्स्मार्तरीतिरेव समन्त्राऽऽदरणीया। शूद्रायास्तु वर्णस्वाभाव्यादमन्त्र एव विवाहः। 'तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्' इत्यत्र व्रात्योद्देशेन संस्कृतेनाभिगमनशिष्टाचारादि कुर्यात् भोजनं वर्जयेत् व्रात्यपक्वमन्नं संस्कृतो न भुञ्जीत। व्रात्यञ्च स्वगेहे दैवपित्र्यादिकर्मसु न भोजयेत्। अन्नस्य क्षुधितमिति रीत्या तु भोजयति। संस्कृतवरालाभे कन्येच्छया व्रात्यायाऽमन्त्रकमेव स्वकन्यां संस्कृतो दद्यात्, शूद्रावत्, न तु समन्त्रकमिदमेव विवाहवर्जनन्नाम यत्समन्त्रकविवाहाभावः। स्वयं व्रात्यकन्यां कन्यान्तराभावे सन्ततिसम्पत्त्यर्थे स्वेच्छया सामगताञ्च न शूद्रावत् विवहेत् किन्तु समन्त्रकमेवोद्वहेत्। विवाहोत्तरं श्वशुरे समागते मधुपर्कादिसत्कारः शास्त्रीयो न भवेदेव। श्वशुरगृहेऽपि स्वस्य विवाहादिकाले मधुपर्कश्राद्धाद्युत्सवभोजनादि न भवेदेव। 'यौनांश्च सम्बन्धान् वर्जये'दिति यौनास्सम्बन्धास्तत्तदागमनादौ मधुपर्कश्राद्धादयो ये तान वर्जयेत्। पुराकल्परीत्या सोपनयनाध्ययनकन्न

सर्वथा न कारयेत् व्रात्यस्योपनयनादिमत्कन्यानर्हत्वात्, वेदश्रवण एवाऽनधिकारात्, वरालाभे कन्यैव तिष्ठेत्। एवं यस्य वेदश्चेति दुर्ब्राह्मणकन्या सोमपेन विवाहिता विनैवैन्द्राग्नं कृत्वाद्यधिकारिणी भवति, सोमपकन्यापि दुर्ब्राह्मणेन विवाहिता विनैद्राग्नं न सोमाधिकारिणी भवति, पुरुषप्राधान्येन क्रतौ गुणभावेनैव साहित्यविवक्षणेन प्रधानानुरोधेनैवैन्द्राग्नप्रवृत्तेः। एवं व्रात्याव्रात्यकन्यासम्बन्धस्थलेऽपि विवेचनीयामिति दिक् ॥

अथेदं व्रात्यप्रायश्चित्तविवेचनं निष्प्रयोजनम्।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥

इति पारोक्ष्येण चातुर्वर्ण्यज्ञानेऽपि शृङ्गग्राहिकयाऽयमयं ब्राह्मणोऽयमयं क्षत्रियोऽयमयं वैश्योऽयमयं शूद्र इति निर्णयाभावात् तत्तद्वर्णोचितवृत्तीनां जीविकालोभेनाऽन्यत्रापि दर्शनात् समुचिताध्ययनादिकर्मणामप्यालस्यादिहेतुना परम्परया त्यागदर्शनात् घटत्वादिजातीनां संस्थानादिव्यङ्ग्यत्वात् पश्वाद्यपेक्षया मानुषाकारवैलक्षण्यस्यावयवसंस्थानरूपस्य प्रत्यक्षत्वेन मानुषत्वजातेर्ज्ञातुं शक्यत्वेऽपि मानुषत्वावान्तरजातिभूतब्राह्मण्याद्यभिव्यञ्जकसंस्थानविशेषस्य चक्षुरादिमानगम्यस्याऽभावेन ब्राह्मण्यादिनिर्णयायोगात् ब्राह्मणादिवर्णोचितधर्माणामपि प्रतिव्यक्ति नियमेन दर्शनाभावात्स्वस्वोचितं कर्माऽनुष्ठीयत एव तेन तेनेत्यत्र मानभावात् स्वोचितकर्मानुष्ठातॄणामपि बहुलमुपलम्भादिति चेत् सत्यम्, तत्तज्जातिनिश्चये हेतवो नानाविधा एव। तत्र तेषु तेषु जनपदेषु जनसमुदायो विरोध्यविरोधी वा यं यं समुदायं यद्यद्वर्णसमूहतया विना विगानं परम्परया वर्णयति स स तावत्तत्तद्वर्णसमुदायरूप एव। एवञ्चाऽविगीतव्यवहार एको जातिनिर्णायकः। निर्णीतजात्युचिताविगीतधर्माचरणं येषु तद्व्यवहारास्पदेषु वर्ततेपि निःसन्दिग्धं तज्जातय एव। तज्जात्युचितधर्माचरणरहिता अपि तद्धर्माचरणशीलैस्सह

भोजनादिव्यवहारमविगीतमाचरन्ति । ये तद्व्यवहारभाजस्तेऽपि त-
ज्जातय एव तद्व्यवहाराभावेपि तद्व्याप्यधर्मव्यवहारादपि व्यापक-
जातेर्निर्णयो भवति । यथा गर्गादिव्यवहारात्तद्व्यापकब्राह्मण्यनिर्णयः।
यथा वा यादवरघुवंशीयादिव्यवहारात्तद्व्यापकक्षत्रियत्वादिनिर्णयः।
अविगीततत्तद्वर्णव्यवहारे सति तज्जात्युचितधर्माचारवत्संसर्गवत्त्वं
तद्वर्णोचितवर्णान्तरसहभोजनादिकं च सुतरां तद्वर्णनिर्णायकम् ।
यथा क्षत्रियेषु तत्तज्जनपदस्थितेषु तदुचितधर्मवत्त्वं ब्राह्मणैस्सह
भोजनादि क्षत्रियत्वे सुतरां निर्णायकम् । ताम्रपर्णीदेशे दक्षिणका-
श्चीनगरेशानां शत्रूपद्रवेण पर्वतं समीप एवाधिरूढानां पाण्ड्यानां
क्षत्रोचितधर्माचरणतत्सहभोजनविवाहादि चाऽविगीतं क्षत्रियत्व-
निर्णायकम् । यथा वा गुर्जरक्षत्रियेषु क्षत्रियत्वव्यवहारस्तदुचितध-
र्माचरणं सारस्वतब्राह्मणैः सह भोजनादि च । यथा वा लाभपुरक्ष-
त्रियेषु तद्व्यवहारतद्धर्माचरणे सारस्वतानां पौरोहित्यसहभोजनादि
च । यथा वा प्रत्यन्तदेशेषु ब्राह्मणोचितधर्मव्यवहारस्य प्रायेणाऽ-
भावेऽपि ब्राह्मणव्यवहारोपि ब्राह्मण्यनिर्णायकः । यथा वा केरल-
द्रविडदेशेषु सर्वदेशवैलक्षण्येन पुरश्चूडत्वेऽपि ब्राह्मणव्यवहारेण
तदुचितधर्माचरणेन तदाचारवज्जनैः सह भोजनादिना च ब्राह्मण्यनि-
र्णयः । यथा वा गुर्जरतैलङ्गदेशेषु ब्राह्मणाऽनुचितहलचलनादिक्रिया-
वत्त्वेऽपि तुलुवकोङ्कणकर्णाटकवङ्गदेशेषु ब्राह्मणानुचितक्रमुकनाग-
वल्ल्यादिवनपालत्वेन तिष्ठन्मूत्रत्वेऽपि ब्राह्मण इत्यविगीतव्यवहारेण
ब्राह्मण्यनिर्णयः । एवमन्येष्वपि तैलङ्गनियोगिद्रविडकैशियतुतुवमु-
क्काणिप्रभृतिषु ब्राह्मणोचितधर्माचरणाभावेऽप्यविगीतव्यवहारेण ब्रा-
ह्मण्यनिर्णयः । एवं तुलुवदेशेषु विद्यारण्यादिकालमारभ्य किष्कि-
न्धाप्रदेशे वरपतिनामानो राजानस्तत्सम्बन्धिनश्च क्षत्रिया अविगी-
तव्यवहारेण । एवं त्रैलिङ्गदेशे राजसंज्ञया प्रसिद्धा युद्धवृत्त्या जी-
वन्तो यजनाध्ययनादिरहिताः क्षत्रियव्यवहारादेव सिद्धा । एवमेव

तैलङ्गदेशे वैश्याः कोमठीति व्यवहारार्हाः परम्परया सोपनयना वैश्या यजनादिधर्मरहिताः सहस्रशो भवन्ति। एवं कर्णाटकमहाराष्ट्रदेशयोरादियुध्वानाः चाटभटसंज्ञका ब्राह्मणव्यवहारमात्रेण ब्राह्मणाः। वैश्या अपि सुवर्णकारक्रियावन्तः केचन चन्द्रपुरादिषु ब्राह्मणैरतिसन्निहितयुगपद्भोजनादिव्यववहारादेव वैश्या भवन्ति। अध्नपुरादिषु पूर्वं वैश्याः केचनाऽग्निहोत्रादिशालिनोऽभूवन्। एवं कोङ्कणदेशे मत्स्यभुजोऽपि प्रायेण वेदाध्ययनशून्या नौकाव्यापारिणो ब्राह्मणव्यवहारेणैव ब्राह्मणा निर्णीयन्ते। एवं पुरुषोत्तमक्षेत्रे गजपतिं सोपनयनादिसंस्कारं तत्सम्बन्धिजनानपि क्षत्रियव्यवहारेण क्षत्रियान् अभिजना वदन्ति। एवं बान्धवरत्नपुरप्रदेशविन्ध्यवासिन्यादिप्रदेशेष्वपि राजपुत्रेषु नियतोपनयनादिदर्शनात् क्षत्रियत्वनिर्णयः। एवं कामरूपादिप्राच्यादिप्रदेशेषु वेदाध्ययनश्रौतकर्माद्यनुष्ठानाभावेप्युपनयनादिस्मार्तानुष्ठानब्राह्मण्यव्यवहारादिना ब्राह्मणत्वनिर्णयः। नीलकण्ठनेपालप्रदेशेपि नेवारब्राह्मणा इति व्यवहारादुपनयनाद्याभाससंस्कारदर्शनात्तद्राजस्वपि उपनयनादिधर्माभासदर्शनात् त्रैवर्णिकव्यवहारः। एवं प्रयागादिप्रदेशेषु ब्राह्मणा इति व्यवह्रियमाणाः सोपनयना विरलवेदाध्ययना राजपुत्रकन्योद्वाहका द्विकुलीना इति प्रसिद्धाः प्रयागपालसंज्ञया व्यवह्रियमाणा ब्राह्मणाः स्वसम्बन्धिराजपुत्रेषु क्षत्रियत्वव्यवस्थापकाः राजपुत्रेषूपनयनात् द्विकुलीनब्राह्मणैर्भोजनादिनिखिलसद्व्यवहारादव्यभिचरिताद्राजपुत्रेषु तेषु क्षत्रियत्वं निर्णयमेव। एवमेव गङ्गायमुनामध्यप्रदेशादिष्वविगीतोपनयनादिदर्शनाद्राजपुत्रत्वव्यवहाराच्च राजकुमाराः त्रैवर्णिका एव। एवं भद्रावराऽम्बापुरोदयपुरादिप्रदेशेषु राजपुत्रा यादवरघुवंशचन्द्रसोमवंशादिव्यवहारात्परम्परयाऽविगीतमागतादुपनयनादिदर्शनादुपनीतजनकन्याविवाहसहभोजनादित्रैवर्णिकव्यवहारादेस्तद्देशगता राजपुत्राः क्षत्रिया एव। एवं हिमाचलेष्वपि कूर्माचलश्रीनगरादिरा-

जानां नियतोपनयनादिदर्शनात् क्षत्रियत्वं निराघाटमेव । एवं कुरुक्षेत्रादिप्रदेशेषु हरियाणागौडैरध्ययनादिषट्कर्मनिरतैः सहाऽविगीततया परस्परया स्त्रीबालकादिद्वारा भोजनादिव्यवहारात् पुरोहितगोत्रेण परस्परया गर्गादिगोत्रव्यवहाराद्वणिज इत्यव्यभिचरिताविगीतव्यवहारात् अग्रवालाः सर्वेऽपि तृतीयवर्णाः प्रायेणोपनयनादिसंस्कारभाजः शिष्टैः परिगृह्यमाणा भवन्ति । एवं काश्मीरमण्डले श्रीनगरकूर्माचलादिमण्डलेषु सोपनयाध्ययनादिषट्कर्मशालिनो ब्राह्मणाः कठवाजसनेयादिशाखाध्यायिनो भवन्ति । एवं मूलस्थानादिष्वपि यथायोगं त्रैवर्णिका व्यवहारादिना समुन्नेयाः । एवं गुर्जरदेशेपि वैश्या वणिक्संज्ञया व्यवह्रियमाणा बहुकालमारभ्योपनयनरहिता आश्वलायनोक्तरीत्या रथकारपदार्हा भवन्ति । प्रायश्चित्ते तूपनयनार्हा भवेयुः । एवमन्यत्रापि निर्णयो विधेय इति दिक् ॥

इति श्रीजयपुराधीशश्रीमन्महाराजाधिराजमहाराजराजराजेन्द्र-

श्रीसवाईजयसिंहकारितो व्रात्यताशुद्धिसङ्ग्रहः समाप्तः ॥

काशीसंस्कृतसीरीज्–पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि । मूल्यम् ।

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १) रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १) रु० २—८
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः–प्रथम भाग अव्ययीभावः । रु० ५—०
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । द्वितीय भाग (व्याकरणं १) रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १) रु० ६—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया–तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २) रु० ०—८
८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १) रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध–शौच–स्नान–भोजन–कल्पसहितम् । (कर्मकाण्डम् १) रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य–महीधरभाष्य–मंगलभाष्य–निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । (वेदान्तं ३) रु० १—४

१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १—८
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६
१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०
१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्णं (वेदान्तं४) रु० ८—०
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः । (व्याकरणं २) रु० ०—८
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०
२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८
२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०
२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०
२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४
२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ४—८
२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्यवि० ३) रु० ०—१२